This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र M 253 विषय वैदिक

नाव. संहिता (१-५ अष्टके) (mss

लेखक/लिपीकार बाळंभट गोरे.

पृष्ठ 416 काळ शके 1712 पूर्ण/अपूर्ण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ष्टद्धिश्च मा प्टणाति विद्वान्येभिर्देवाꣳक्रतुभिः कल्पयाति॥ ४॥ ॥ जुषेथामा

सनोय जारात्रयो विꣳशतिश्च॥ १४॥ ॥ इषेत्वायज्ञस्य शुंधध्वंकर्मणे देवो

वधूतंध्व ष्टिः संवपाम्यादद्दे मल्फ ष्टंकुघ्मोसि भुवन म सिवाजस्योभावांच तुर्द

श॥ ॥ इषेद्दꣳह भुवनमष्टाविꣳशतिः॥ ॥ २८॥ ॥ १॥ ॥ ७॥ ॥

हरिः ॐ आप उंदंतु जीवसे दीर्घायुत्वाय वर्चस ओषधे त्रायस्वैनꣳ स्वधिते

मैनꣳ हिꣳसीर्देवश्रूरेतानिप्रवपे स्वस्त्युत्तराण्यशीयापो अस्मान्मातरः शुं

धंतु घृतेन नो घृतपुवः पुवः पुनंतु विश्वमस्मत्प्रवहंतु रिप्रमुदाभ्यः शुचिरा

पूत एमि सोमस्य तनूरसि तनुवं मे पाहि महीनां पयो सि वर्चोधा असि वर्चः॥ १॥

मयि धेहि वृत्रस्य कनीनिकासि चक्षुष्या असि चक्षुर्मे पाहि चित्पतिस्त्वा पुनातु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०१ वाक्पतिस्त्वापुनातुदेवस्त्वासविता पुनात्वच्छिद्रेणपवित्रेणवसोः सूर्यस्यर
८नि श्मिभिस्तस्यतेपवित्रपतेपवित्रेणयस्मैकंपुनेतच्छकेयमा वेदिवासदं महे स्वध स
र्मणोअध्वरेयद्वेदेवासआगुरेयज्ञियासोहवामह इंद्राग्नी द्यावापृथिवी
आपउ॒ऽषधीस्त्वंदीक्षाणामधिपतिरसीह मा संतं पाहि ॥२॥ वर्नेओषधीर
च्छेन्व॥३॥ ॥आकूत्यैप्रयुजेग्नयेस्वाहामेधायैमनसेग्नयेस्वाहादीक्षायैतपसे
ग्नयेस्वाहासरस्वत्यैपूष्णेग्नयेस्वाहापोदेवीर्बृहती र्विश्वशंभुवो द्यावापृथिवी
उर्वंतरिक्षबृहस्पतिर्नोहविषावृधातुस्वाहाविश्वेदेवस्य नेतुर्मर्तोवृणीतस
ख्यंविश्वेरायइषुध्यसिद्युम्नंवृणीतपुष्यसेस्वाहा ऋक्सामयोःशिल्पेस्थ ८
स्तेवामारभेतेमा॥३॥ पातमास्ययज्ञस्योदृच इमांधियंशिक्षमाणस्यदे

वऋतंदक्षंवरुणसंशिशाधियया तिविश्वादुरितातरेमसुतर्माणमधिनावंरु
हेमोर्गस्यांगिरस्यूर्णम्रदाऊर्जेमेयच्छपाहि मा मा माहिंसीर्विष्णोःशर्मासिश
र्मयजमानस्यशर्ममेयच्छनक्षत्राणांमातीकाशात्पाहीन्द्रस्ययोनिरसि॥
॥२॥ मामाहिंसीःकृष्यैत्वासुसस्यायैसुपिप्पलाभ्यस्त्वौषधीभ्यःसूप
स्थादेवोवनस्पतिरूर्ध्वोमापात्वोदृचःस्वाहायज्ञंमनसास्वाहाद्यावापृ
थिवीभ्यांस्वाहोरोरंतरिक्षात्स्वाहायज्ञंवातादारभे॥३॥ मायोनिरसि
त्रिंशाच्चि॥२॥ ॥दैवीधियंमनामहेसुमृडीकामभिष्टयेवर्चोधांयज्ञवाह
संसुपारानोअसद्वशे॥ येदेवामनोजातामनोयुजःसुदक्षादक्षपिता
रस्तेनःपातुतेनोवंतुतेभ्योनमस्तेभ्यःस्वाहाग्नेत्वंसुजागृहिवयंसु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०१ मंदिषीमहि गोपायनः स्वस्तये प्रबुधे नः पुनर्ददः ॥ त्वमग्ने व्रतपा असि देव आ २
१ मर्त्येष्वा ॥ त्वं ॥ ३ ॥ यज्ञेष्वीड्यः ॥ विश्वे देवा अभिमामावृत्रन्पूषा सन्यासोमो
राधसा देवः सविता वसोर्वसुदावा रास्वेयत्सोमाभूयो भर मा पृणन्पूर्त्या विरा
धि माहमायुषा चंद्रमसि मम भोगाय भव वस्त्रमसि मम भोगाय भवोस्रा
सि मम भोगाय भव हयोसि मम भोगाय भव ॥ ४ ॥ छागोसि मम भोगाय भ
व मेषोसि मम भोगाय भव वायवे त्वा वरुणाय त्वा निर्ऋत्यै त्वा रुद्राय त्वा देवी
रापो अपां नपाद्य ऊर्मिर्हविष्य इंद्रियावान्मदिन्तमस्तं वो माव क्रमिषं माछि
न्नं तंतुं पृथिव्या अनु गेषं भद्रादभि श्रेयः प्रेहि बृहस्पतिः पुरएता ते अस्त्व १
थेमव स्य वर आ पृथिव्या आरे शत्रून्कृणुहि सर्ववीर एदमगन्म देवयज

नं पृथिव्या विश्वे देवा यदजुषंत पूर्व ऋक्सामाभ्यां यजुषा संतरंतो रा
यस्पोषेण समिषा मदेम ॥ ५ ॥ आ लं॑ हयोसि मम भोगाय भव स्यु पंचविं॑
शतिश्च ॥ ३ ॥ ॥ इयं ते शुक्र तनूरिदं वर्चस्तया संभव भ्राजं गच्छ जूरसि धृ
ता मनसा जुष्टा विष्णवे तस्यास्ते सत्यसवसः प्रसवे वाचो यंत्रमशीय स्वाहा
शुक्रमस्यमृतमसि वैश्वदेवं॑ हविः सूर्यस्य चक्षुरारुहमग्नेरक्ष्णः कनीन
कां यदेतशेभिरीयसे भ्राजमानो विपश्चिता चिदसि मनासि धीरसि दक्षिणा
॥ ३ ॥ आसि यज्ञियासि क्षत्रियास्यदितिरस्युभयतः शीर्ष्णी सा नः सुप्राची सु
प्रतीची संसेव मित्रस्त्वा पदि बध्नातु पूषाध्वनः पात्विंद्रायाध्यक्षाया नु त्वा मा
ता मन्यतामनु पितानु भ्राता सगर्भ्योनु सखा सयूथ्यः सा देवि देवमच्छेहि
इंद्राय सोमं॑ रुद्रस्त्वा वर्तयतु मित्रस्य पथा स्वस्ति सोमसखा पुनरेहि सह

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०१ रय्या ॥ २ ॥ दक्षिणासो मं सखा पंचव ॥ ४ ॥ वस्व्यसि रुद्रास्यदितिरस्यादि
१० त्यासि शुक्रासि चंद्रासि बृहस्पतिस्त्वा सुम्ने रण्वतु रुद्रो वसुभिराचिके तु
पृथिव्यास्त्वा मूर्धन्नाजिघर्मि देवयजन इडायाः पदे घृतवति स्वाहा प
रिलिखितꣳ रक्षः परिलिखिता अरातय इदमहꣳ रक्षसो ग्रीवा अपिकृं
तामि योस्मान्द्वेष्टि यं च वयं द्विष्म इदमस्य ग्रीवाः ॥ १ ॥ अपिकृंतां म्यस्मे राय
स्त्वे रायस्तोते रायः सं देवि देव्योर्वश्या पश्यस्व त्वष्टीमती ते सपेय सुरेता
रेतो दधाना वीरं विदेय तव संदृशि माहꣳ रायस्पोषेण वि योषं ॥ २ ॥ अस्य
ग्रीवा एकान त्रिꣳशाच्च ॥ ५ ॥ ॥ अꣳशुना ते अꣳशुः पृच्यतां परुषा प १०
रु र्गंधस्ते कामं मवतु मदाय रसो अच्युतो मात्योसि शुक्रस्ते ग्रहो भि

त्यं देवꣳ सवितारं मोण्योः कविक्रतुमर्चामि सत्यसवसꣳ रत्नधामभिप्रियं २
मतिं मूर्ध्वा यस्यामतिर्भा अदिद्युतत्सवीमनि हिरण्यपाणिरमिमीत सुक्र
तुः कृपा सुवः ॥ प्रजाभ्यस्त्वा प्राणाय त्वा व्यानाय त्वा प्रजास्त्वमनुप्राणिहि
प्रजास्त्वामनुप्राणंतु ॥ १ ॥ अनुसप्त च ॥ ६ ॥ ॥ सोमं ते क्रीणाम्यूर्जस्वंतं
पयस्वंतं वीर्यावंतमभिमातिषाहꣳ शुक्रं ते शुक्रेण क्रीणामि चंद्रं चंद्रेणा
मृतममृतेन सम्यत्ते गोरस्मे चंद्राणि तपसस्तनूरसि प्रजापतेर्वर्णस्त
स्यास्ते सहस्रपोषं पुष्यंत्याश्चरमेण पशुना क्रीणाम्यस्मे ते बंधुर्मयि ते
रायः श्रयंतामस्मे ज्योतिः सोमविक्रयिणि तमो मित्रो न एहि सुमित्रधा
इंद्रस्योरुमाविश दक्षिणमुशन्नुशंतꣳ स्योनः स्योनꣳ स्वान भ्राजांघा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०१ रैवं भारि हस्त सुहस्त कृशानवेते वः सोमक्रयणास्तान्रक्षध्वं मा वो दभन्
३३ ॥१॥ उरु ह्यविँ शतिश्च ॥७॥ ॥उदायुषा स्वायुषोदोषधीनाँ रसेनोत्प
र्जन्यस्य शुष्मेणोदस्थाममृताँ२ अनु॥ उर्वन्तरिक्षमन्विह्यदित्याः सदोस्य
दित्याः सद आसीदास्तभ्नाद्द्यामृषभो अन्तरिक्षममिमीत वरिमाणं पृथि
व्या आसीदद्विश्वा भुवनानि सम्राड्विश्वेत्तानि वरुणस्य व्रतानि वनेषु व्यन्तरि रुण
क्षं ततान वाजमर्वत्सु पयो अघ्नियासु हृत्सु॥१॥ क्रतुं वरुणो विक्ष्वग्निं
दिवि सूर्यमदधात्सोममद्रावुदु त्यं जातवेदसं देवं वहन्ति केतवः॥ दृ
हा शे विश्वाय सूर्यं॥ उस्रावेतं धूर्षाहौ वनश्रू अवीरहणौ ब्रह्मचोदनौ व ३३
रुणस्य स्कंभनमसि वरुणस्य स्कंभसर्जनमसि प्रत्यस्तो वरुणस्य

पाशः॥२॥ हृत्सु पंच त्रिँशच्च॥८॥ ॥प्रत्यवस्य भुवस्पते विश्वान्यभिधा २
मानि मा त्वा परिपरी विदन्मा त्वा परिपंथिनो विदन्मा त्वा वृका अघायवो मा
गंधर्वो विश्वावसुरादघच्छ्येनो भूत्वा परापत यजमानस्य नो गृहे देवैः
सँस्कृतं यजमानस्य स्वस्त्ययन्यस्यपि पंथामगस्महि स्वस्ति गा
मनेहसं येन विश्वाः परि द्विषो वृणक्ति विंदते वसु नमो मित्रस्य वरुण
स्य चक्षसे महो देवाय तदृतँ सपर्यत दूरे दृशे देव जाताय केतवे दिव
स्पुत्राय सूर्याय शँसत वरुणस्य स्कंभनमसि वरुणस्य स्कंभस
र्जनमस्युन्मुक्तो वरुणस्य पाशः॥३॥ मित्रस्य त्रयोदिँ शतिश्च॥
॥९॥ ॥अग्नेरातिथ्यमसि विष्णवे त्वा सोमस्यातिथ्यमसि विष्ण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०१ वेत्वातिथेरातिथ्यमसि विष्णवे त्वाग्नये त्वा रायस्पोषदाव्ने विष्णवे त्वा श्ये
१२ नाय त्वा सोमभृते विष्णवे त्वा या ते धामानि हविषा यजंति ता ते विश्वा प
रिभूरस्तु यज्ञं गयस्फानः प्रतरणः सुवीरो वीरहा प्रचरा सोम दुर्यान
दित्याः सदोस्यदित्याः सद आ ॥१॥ सीद वरुणोसि धृतव्रतो वारुण
मसि शंयोर्देवानां सख्यान्मा देवानामपसाश्छित्स्म त्वापतये त्वा गृ
ह्णामि परिपतये त्वा गृह्णामि तनूनप्त्रे त्वा गृह्णामि शाक्वराय त्वा गृ
ह्णामि शक्मन्नोजिष्ठाय त्वा गृह्णाम्यनाधृष्टमस्यनाधृष्यं देवानामो
जोभिशस्तिपा अनभिशस्तेन्यमनु मे दीक्षां दीक्षापतिर्मन्यतामनु १२
तपस्तपस्पतिरंजसा सत्यमुपगेषं सुविते मा धाः ॥२॥ आमेकं च ॥

॥१०॥ ॥ अंशुरंशुष्टे देव सोमाप्यायतामिंद्रायैकधनविद आ तुभ्यमिं
द्रः प्यायतामा त्वमिंद्राय प्यायस्वाप्याययास्मान्त्सखीन्त्सन्या मेधया स्वस्ति ते देव
सोम सुत्यामशीय एष्टा रायः प्रेषे भगायर्तमृतवादिभ्यो नमो दिवे नमः पृथिव्या
अग्ने व्रतपते त्वं व्रतानां व्रतपतिरसि या मम तनूरेषा सा त्वयि ॥१॥ या तव त
नूरियं सा मयि सह नौ व्रतपते व्रतिनोर्व्रतानि या ते अग्ने रुद्रिया तनूस्तया
नः पाहि तस्यास्ते स्वाहा या ते अग्नेयाशया रजाशया हराशया तनूर्वर्षि
ष्ठा गह्वरेष्ठोग्रं वचो अपावधीं त्वेषं वचो अपावधीं स्वाहा ॥२॥ ॥ त्वायि च त्वा
रिंशच्च ॥११॥ ॥ विन्नायनी मेसि तिक्तायनी मेस्यवतान्मा नाथितमव
तान्मा व्याथितं विदेरग्निर्नभो नामाग्ने अंगिरो यो स्यां पृथिव्यामस्यायुषा व्या
नाम्नेहि यत्तेनाधृष्टं नाम यज्ञियं तेन त्वा दधेग्ने अंगिरो यो द्वितीयस्यां

सं०५ तीयस्यां पृथिव्यामस्यायुषा नाम्नेहि यत्तेनाधृष्टं नाम ॥ १ ॥ यज्ञियं तेन त्वाद २
१३ धे सिꣳहीरसि महिषीरस्युरु प्रथस्वोरु ते यज्ञपतिः प्रथतां ध्रुवासि देवे
भ्यः शुंधस्व देवेभ्यः शुंभस्वेंद्रघोषस्त्वा वसुभिः पुरस्तात्पातु मनोजवा
स्त्वा पितृभिर्दक्षिणतः पातु प्रचेतास्त्वा रुद्रैः पश्चात्पातु विश्वकर्मा त्वादि
त्यैरुत्तरतः पातु सिꣳहीरसि सपत्नसाही स्वाहासिꣳहीरसि सुप्रजाव
निः स्वाहा सिꣳहीः ॥ २ ॥ असि रायस्पोषवनिः स्वाहासिꣳहीरस्यादित्य
वनिः स्वाहासिꣳहीरस्यावह देवां देवयते यजमानाय स्वाहा भूतेभ्यस्त्वा
विश्वायुरसि पृथिवीं दृꣳह ध्रुवक्षिदस्यंतरिक्षं दृꣳहाच्युतक्षिदसि दि
वं दृꣳहाग्नेर्भस्मास्यग्नेः पुरीषमसि ॥ ३ ॥ नाम सुप्रजावनिः स्वाहा २३
सिꣳहीः पंचत्रिꣳशच्च ॥ १२ ॥ ॥ युंजते मन उत युंजते धियो विप्रा वि

प्रस्य बृहतो विपश्चितः ॥ विहोत्रा दधे वयुनाविदेक इन्मही देवस्य सवितुः प
रिष्टुतिः ॥ सुवाग्देव दुर्याꣳ आवद देवश्रुतौ देवेघाघोषेथा मा नो वीरो जाय
तां कर्मण्योयꣳ सर्वेनु जीवाम यो बहूनामसद्वशी ॥ इदं विष्णुर्विचक्रमे त्रे
धा निदधे पदं ॥ समूढमस्य ॥ १ ॥ पाꣳसुर इरावती धेनुमती हि भूतꣳ सूय
वसिनी मनवे यशस्ये ॥ व्यस्कभ्नाद्रोदसी विष्णुरेते दाधार पृथिवीमभितो
मयूखैः ॥ प्राची प्रेतमध्वरं कल्पयंती ऊर्ध्वं यज्ञं नयतं मा जीह्वरत मत्र २
रमेथां वर्ष्मन्पृथिव्या दिवो वा विष्णवुत वा पृथिव्या महो वा विष्णवुत वांतरि
क्षाद्धस्तौ पृणस्व बहुभिर्वसव्यैरा प्रयच्छ ॥ २ ॥ दक्षिणादोत सव्यात् ॥
विष्णोर्नु कं वीर्याणि प्र वोचं यः पार्थिवानि विममे रजाꣳसि यो अस्कभाय
दुत्तरꣳ सधस्थं विचक्रमाणस्त्रेधोरुगायो विष्णो रराटमसि विष्णोः पृष्ठ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०३ मसि विध्मोः अयमें स्त्वो विध्मोः स्यूरसि विध्मो र्ध्ववमासि वैध्मव मसि विध्म
१४ वेला॥२॥ अस्य यच्छे कान्न वेलां रिःं शाचे॥२३॥ ॥ कृणुष्व पाजः प्रसि
तिं न पृथ्वीं याहि राजेवामवांऽइभेन॥ तृष्वीमनु प्रसितिं द्रूणानोस्तासि वि
ध्यरक्षसस्तपिष्ठैः॥ तव भ्रमास आशुया पतंत्यनुस्पृश धृषता शोशु
चानः॥ तपूंऽष्यग्ने जुह्वा पतंगानसंदितो विसृज विष्वगुल्काः॥ प्रतिस्प
शो विसृज तूर्णितमो भवा पायुर्विशो अस्या अदब्धः॥ यो नो दूरे अघ
शंसो यः॥१॥ यो अंत्यग्ने माकिष्टे व्यथिरादधर्षीत्॥ उदग्ने तिष्ठ प्र
त्यातनुष्व न्यमित्रांऽओषतात्तिग्महेते॥ यो नो अरातिंऽसमिधान १८
चक्रे नीचातंधक्ष्यतसं न शुष्कं॥ ऊर्ध्वो भव प्रतिविध्याध्यस्मदाविष्कृणुष्व

दैव्यान्यग्ने॥ अवस्थिरातनुहि यातुजूनां जामिमजामिं प्रमृणीहि शत्रू
न्॥ सते॥२॥ जानाति सुमतिं यविष्ठ यईवते ब्रह्मणे गातुमैरत्॥ विश्वान्य २
स्मै सुदिनानि रायो द्युम्नान्यर्यो विदुरो अभिद्यौत्॥ सेदग्ने अस्तु सुभगः
सुदानुर्यस्त्वा नित्येन हविषा यउक्थैः॥ पिप्रीषति स्व आयुषि दुरोणे विश्वे
दस्मै सुदिना सासदिष्टिः॥ अर्चामि ते सुमतिं घोष्यर्वाक् संते वावाता जर
तां॥३॥ इयंगीः॥ स्वश्वास्त्वा सुरथा मर्जयेमास्मे क्षत्राणि धारयेरनु
द्यून्॥ इह त्वा भूर्याचरेदुप त्मन् दोषावस्तर्दीदिवांऽसमनुद्यून्॥ क्रीडं
तस्त्वा सुमनसः सपेमाभि द्युम्नातस्थिवांऽसो जनानां॥ यस्त्वा स्व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०१ श्वः सुहिरुण्यो अंग्न उपयाति वसुमता रथेन ॥ तस्य त्राता भवसि तस्य स
१५ खायस्त आतिथ्यमानुषग्जुजोषत् ॥ महो रुजामि ॥ ४ ॥ बंधुता वचोभिस्त
न्मापितुर्गोतमादन्वियाय ॥ त्वंनो अस्य वचसश्चिकिद्धि होतर्यविष्ठ सुक्र
तोदमूनाः ॥ अस्वप्नजस्तरणयः सुशेवा अतंद्रासोवृका अश्रमिष्ठाः ॥ ते
पायवः सध्रियंचो निषद्याग्ने तव नः पांतु मूर ॥ ये पायवो मामतेयंते अ
ग्ने पश्यंतो अंधं दुरितादरक्षन् ॥ ररक्ष तान्त्सुकृतो विश्ववेदा दिप्सं
त इद्रिपवो नाह ॥ ५ ॥ देभुः ॥ त्वया वयं सधन्यस्त्वोतास्तव प्रणीत्यश्या
म वाजान् ॥ उभा शंसा सूदय सत्यताते नुष्ठुया कृणुह्यह्रयाण ॥ ३५
अया ते अग्ने समिधा विधेम प्रति स्तोमं शस्यमानं गृभाय ॥ द

हाशसो रक्षसः पाह्यस्मान्द्रुहो निदो मित्रमहो अवद्यात् ॥ रक्षोहणं वा
जिनमाजिघर्मि मित्रं प्रथिष्ठमुप यामि शर्म ॥ शिशानो अग्निः क्रतु
भिः समिद्धः स नो दिवा ॥ ६ ॥ स रिषः पातु नक्तं ॥ वि ज्योतिषा बृहता
भात्यग्निराविर्विश्वानि कृणुते महित्वा ॥ प्रादेवीर्मायाः सहते दुरे
वाः शिशीते शृंगे रक्षसे विनिक्षे ॥ उत स्वानासो दिवि षंत्वग्नेस्तिग्मा
युधा रक्षसे हंतवा उ ॥ मदे चिदस्य प्ररुजंति भामा न वरंते परिबाधो
अदेवीः ॥ ७ ॥ अघशंसः सनेजरतां रुजामिह द्विवेक चत्वारिं
शच्च ॥ १४ ॥ ॥ आ पतुं दंत्वा कूलैर्दैवी मियं वस्यस्यं शुनासो म
मुदा युषाप्न च्यवस्वाग्ने रातिथ्यमं भुरं भुर्वि त्तायनीमेसि युं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०१ जतेक्षुणुषपाजश्चतुर्दश॥ ॥आपोवस्व्यसियातवेयंगी॥श्चतुस्त्रिंश
१६ त्॥३४॥ ॥२॥ हरिः ऽ ओं॥देवस्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्यां
पूष्णोहस्ताभ्यामाददेत्रिरसिनारिरसिपरिलिखितꣳरक्षःपरिलिखिताअ
रातयइदमहꣳरक्षसोग्रीवाअपिकृंतामियोस्मान्द्वेष्टियंचवयंद्विष्मइदमस्य
ग्रीवाअपिकृंतामिदिवेत्वांतरिक्षायत्वापृथिव्यैत्वाशुंधतांलोकःपितृषदनो
यवोसियवयास्मद्द्वेषः॥१॥यवयारातीःपितृणाꣳसदनमसिस्कद्दिवꣳस्त
भानांतरिक्षंपृणपृथिवींदृꣳहद्युतानस्त्वामारुतोमिनोतुमित्रावरुणयोर्ध्रु
वेणधर्मणाब्रह्मवनिंत्वाक्षत्रवनिꣳसुप्रजावनिꣳरायस्पोषवनिंपर्यूहामि १६
ब्रह्मदृꣳहक्षत्रंदृꣳहप्रजांदृꣳहरायस्पोषंदृꣳहघृतेनद्यावापृथिवीआ
पृणेथामिंद्रस्यसदोसिविश्वजनस्यछायापरित्वागिर्वणोगिरइमाभवंतु

विश्वतोवृद्धायुमनुवृद्धयोजुष्टाभवंतुजुष्टयइंद्रस्यस्यूरसींद्रस्यध्रुवम
सैंद्रमसींद्रायत्वा॥२॥द्वेषइमाअष्टादशान्च॥१॥ ॥रक्षोणोहंवलगह २
नोवैष्णवान्खनामीदमहंतंवलगमुद्वपामियन्नःसमानोयमसमानोनिच
खानेदमेनमधरंकरोमियोनःसमानोयोसमानोरातीयतिगायत्रेणछंद
सावबाढोवलगःकिमत्रभद्रंतन्नौसहविराडसिसपत्नहासं
म्राडसिभ्रातृव्यहास्वराडस्यभिमातिहाविश्वाराडसिविश्वासांनाष्ट्राणाꣳ
हंता॥१॥रक्षोहणोवलगहनःप्रोक्षामिवैष्णवान्रक्षोहणोवलगहनोवन
यामिवैष्णवान्यवोसियवयास्मद्द्वेषोयवयारातीरक्षोहणोवलगहनोवस्तृ
णामिवैष्णवान्रक्षोहणोवलगहनोभिजुहोमिवैष्णवान्रक्षोहणोवलग
हनावुपदधामिवैष्णवीरक्षोहणोवलगहनौपर्यूहामिवैष्णवीरक्षोहणो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०१ वलगहनोपरिस्तृणामिवैष्णवीरक्षोहणोवलगहनौवैष्णवीबृहन्नसिबृह
१७ द्ग्रावाबृहतीमिंद्रायवाचंवद॥२॥हंतंद्रायद्वेन॥२॥ ॥विभूरसिप्रवाह
णोवह्निरसिहव्यवाहनः श्वात्रोसिप्रचेतास्तुथोसिविश्ववेदाउशिगसि
कविरंघारिरसिबंभारिरवस्युरसिदुवस्वान्छुंध्यूरसिमार्जालीयः सम्रा
डसिकृशानुः परिषद्योसिपवमानः प्रतक्वासिनभस्वानसंमृष्टोसिहव्य
सूदऋतधामासिसुवर्ज्योतिर्ब्रह्मज्योतिरसिसुवर्धामाजोस्येकपा
दहिरसिबुध्नियोरौद्रेणानीकेनपाहिमाग्नेपिपृहिमामामाहिंसीः॥१॥
अनीकेनाष्टौच॥३॥ ॥त्वंसोमतनूकृद्भ्योद्वेषोभ्योन्यकृतेभ्यउरु
यंतासिवरूथंस्वाहाजुषाणोअप्तुराज्यस्यवेतुस्वाहायंनोअग्नि १७
र्वरिवः कृणोत्वयंमृधः पुरएतुप्रभिंदन्॥ अयंशत्रूञ्जयतुजर्हृ

विष्णोः कर्माणिपश्यतयतोव्रतानिपस्पशे॥ इंद्रस्ययुज्यः सखा॥
तद्विष्णोः परमंपदंसदापश्यंतिसूरयः॥ दिवीवचक्षुराततं॥ ब्रह्म
वनित्वाक्षत्रवनिंसुप्रजावनिंरायस्पोषवनिंपर्यूहामिब्रह्मदृंह
क्षत्रंदृंहप्रजांदृंहरायस्पोषंदृंहपरिवीरसिपरित्वादैवीर्विशोव्ययं
तांपरीमंरायस्पोषोयजमानंमनुष्याअंतरिक्षस्यत्वासानावववगू
हामि॥२॥ उश्मसीपोषमेकान्नविंशतिश्च॥६॥ ॥दूषेत्वोपवीर
स्यपोदेवांदैवीर्विशः प्रागुर्वह्नीरुशिजोबृहस्पतेधारयावसूनिहव्या
तेस्वदंतांदेवत्वष्टर्वसुरण्वरेवतीरमध्वमग्नेर्जनित्रमसिवृषणौस्थउ
र्वश्यस्यायुरसिपुरूरवाघृतेनाक्तेवृषणंदधाथांगायत्रंछंदोनुप्र

सं०१ जायस्वत्रैष्टुभं जागतं छंदोनुप्रजायस्वभवतं॥ १॥ नः समनसौसमोकसाव
१९ रेपसो॥ मायज्ञ ँ हिँ सिष्टंमायज्ञपतिंजातवेदसौशिवौभवतमद्यनः॥ अ
ग्नावग्निश्चरतिप्रविष्ट ऋषीणांपुत्रोअधिराजएषः॥ स्वाहाकृत्यब्रह्मणा
४ या तेजुहोमिमादेवानांमिथुकर्भागधेयं॥ २ ॥ भवतमेकत्रिंशच्च॥ ७॥ ॥
आददृक्तस्यलादेवहविः पाशोनारभेधर्षामानुषानद्भ्यस्त्वौषधीभ्यः प्रो
क्षाम्यपांपेरुरसिस्वात्तंचित्तंदेवँ हव्यमापोदेवीः स्वदतैनँ संतेप्राणोवा
युनागच्छतां संयजत्रैरंगानिसंयज्ञपतिराशिषाघृतेनाक्तौपशुंत्रायेथां
रेवतीर्यज्ञपतिंप्रियधाविशतोरोअंतरिक्षसजूर्देवेन॥ १॥ वातेनास्यहवि
षस्त्मनायजसमस्यतनुवाभववर्षोवर्षीयसियज्ञेयज्ञपतिंधाः पृथि
व्याः संपृचः पाहिनमस्तआतानानर्वाप्रेहिघृतस्यकुल्यामनुसहप्र

जयासहरायस्पोषेणापोदेवीः शुद्धायुवः शुद्धायूयंदेवाँ ऊढ्वँ शुद्धाव
यंपरिविष्टाः परिवेष्टारोवोभूयास्म॥ २॥ देवेनचतुश्चत्वारिंशच्च॥ ८॥ ॥
वाक्तआप्यायतांप्राणस्तआप्यायतांचक्षुस्तआप्यायतांश्रोत्रंतआप्या
यतांयातेप्राणांछुग्जगामयाचक्षुर्याश्रोत्रंयत्तेक्रूरंयदास्थितंतत्तआ
प्यायतांतत्तएतेनशुंधतांनाभिस्तआप्यायतांपायुस्तआप्यायतां शु
द्धाश्चरित्राः शमद्भ्यः॥ १॥ शमोषधीभ्यः शंपृथिव्यैशमहोभ्यामोषधे
त्रायस्वैनँ स्वधितेमैनँ हिँ सीरक्षसांभागोसीदमहँ रक्षोधमंतमो
नयामियोस्मान्द्वेष्टियंचवयंद्विष्मइदमेनमधमंतमोनयामीषेत्वाघृते
नद्यावापृथिवीप्रोर्ण्वाथामच्छिन्नोरायः सुवीरउर्वंतरिक्षमन्विहिवा
योवीहिस्तोकानाँ स्वाहोर्ध्वनभसंमारुतंगच्छतं॥ २॥ अंद्भ्योवीहि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०१ पंचच॥ ९॥ ॥ संते मनसा मनः संप्राणेन प्राणो जुष्टं देवेभ्यो हव्यं घृतवत्स्वा
२० हेंद्रः प्राणो अंगे अंगे निदीध्यदैंद्रो पानो अंगे अंगे विबोभुवद्देवत्वष्टर्भूरि ते सꣳ
समेतु विषुरूपाय त्सलक्ष्माणो भवथ देवत्रायंतमवसे सखायो नु त्वा माता
पितरो मदंतु श्रीरस्यग्निस्त्वा श्रीणात्वापः समरिणन्वातस्य॥ ३॥ त्वाध्र
ज्यै पूष्णो रꣳ ह्या अपामोषधीनाꣳ रोहिष्यै घृतं घृतपावानः पिबत वसां व
सापावानः पिबतांतरिक्षस्य हविरसि स्वाहा त्वांतरिक्षाय दिशः प्रदिश आ
दिशो विदिश उद्दिशः स्वाहा दिग्भ्यो नमो दिग्भ्यः॥ २॥ वातस्या ष्टाविꣳ शति
श्च॥ १०॥ समुद्रं गच्छ स्वाहांतरिक्षं गच्छ स्वाहा देवꣳ सवितारं गच्छ
स्वाहाहोरात्रे गच्छ स्वाहा मित्रावरुणौ गच्छ स्वाहा सोमं गच्छ स्वाहा य २०
ज्ञं गच्छ स्वाहा छंदाꣳसि गच्छ स्वाहा द्यावापृथिवी गच्छ स्वाहा नभो दिव्यं हा

गच्छ स्वाहाग्निं वैश्वानरं गच्छ स्वाहाद्भ्यस्त्वौषधीभ्यो मनो मे हार्दि यच्छ तन्नूं
त्वचं पुत्रं नप्तारमशीय शुगसि तमभिशोच यो स्मान्द्वेष्टि यं च वयं द्विष्मो धाम्नो
धाम्नो राजन्नितो वरुण नो मुंच यदापो अघ्न्या वरुणेति शपामहे ततो वरु
ण नो मुंच॥ ३॥ आसिषड्विꣳ शतिश्च॥ ११॥ ॥ हविष्मतीरिमा आपो ह
विष्मान्देवो अध्वरो हविष्माꣳ आविवासति हविष्माꣳ अस्तु सूर्यः॥ अग्ने
र्वो पन्नगृहस्य सदसि सादयामि सुम्नाय सुम्निनीः सुम्ने मा धत्तेंद्राग्नि
यो र्भागधेयीः स्थ मित्रावरुणयो र्भागधेयीः स्थ विश्वेषां देवानां भाग
धेयीः स्थ यज्ञे जागृत॥ १॥ हविष्मतीश्चतुस्त्रिꣳ शत्॥ १२॥ ॥
हृदे त्वा मनसे त्वा दिवे त्वा सूर्याय त्वोर्ध्वमिममध्वरं कृधि दिवि देवेषु होत्रा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०१ होत्रायछसोमराजन्नेत्यवैरोह मा भेर्मासंविक्था मा त्वाहिꣳसिषं प्रजास्त्व
२१ मुपावरोह प्रजास्त्वामुपावरोहं तु शृणोत्वग्निः समिधा हवं मे शृण्वंत्वापो
धिषणाश्च देवीः॥ शृणोत ग्रावाणो विदुषो नु॥१॥ यन्नꣳ शृणोतु देवः सवि
ताहवं मे॥ देवीरापो अपांनपाद्य ऊर्मिर्हविष्यइंद्रियवान्मदिन्तमस्तं देवेभ्यो
देवत्राधत्त शुक्रꣳ शुक्रपेभ्यो येषां भागः स्थ स्वाहा कार्षिरस्यपपाप्मानꣳ
॥२॥ समुद्रस्य वोक्षित्या उन्नये॥ यमग्ने पृत्सु मर्त्यमावा वाजेषु यं जुनाः॥
स यंता शश्वतीरिषः॥ ४॥ तुस्तस्चत्वारिꣳशाच्च॥२३॥ ॥त्वमग्ने रु
द्रो असुरो महो दिवस्त्वꣳ शर्धो मारुतं पृक्ष ईशिषे॥ त्वं वातैररुणैर्या २१
सि शंगयस्त्वं पूषा विधतः पासि नु त्मना॥ आ वो राजानमध्वरस्य रु

द्रꣳ होतारꣳ सत्ययजꣳ रोदस्योः॥ अग्निं पुरा तनयित्नोरचित्ताद्धिरण्य
रूपमवसे कृणुध्वं॥ अग्निर्होता नि षसादा यजीयानुपस्थे मातुः सुरभा
वु लोके॥ युवा कविः पुरु निष्ठः॥१॥ ऋतावा धर्ता कृष्टीनामुत मध्य इद्धः॥
साध्वीमकर्देववीतिं नो अद्य यज्ञस्य जिह्वामविदाम गुह्यां॥ स आयुरा
गात्सुरभिर्वसानो भद्रामकर्देवहूतिं नो अद्य॥ अक्रंददग्निः स्तनय
न्निव द्यौः क्षामा रेरिहद्वीरुधः समंजन्॥ सद्यो जज्ञानो वि हीमिद्धो अ
ख्यदा रोदसी भानुना भात्यंतः॥ त्वे वसूनि पुर्वणीक॥२॥ होतर्दोषा वस्तो
रेरिरे यज्ञियासः॥ क्षामेव विश्वा भुवनानि यस्मिन्त्सꣳसौभगानि दधिरे
पावके॥ तुभ्यं ता अंगिरस्तम विश्वाः सुक्षितयः पृथक्॥ अग्ने कामाय ये

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०१ मिरे॥ अश्यामतंकाममग्नेतवोत्यश्यामरयिंॅरयिवः सुवीरं॥ अश्याम
२२ वाजमभिवाजयंतोश्यामद्युम्नमजराजरंते॥ श्रेष्ठंयविष्ठभारताग्नेद्युमं
तमाभर॥ ३॥ वसोपुरुस्पृहंॅरयिं॥ सश्वितानस्तन्यतूरोचनस्थाअजरे
भिर्नानदद्भिर्यविष्ठः॥ यः पावकः पुरुतमः पुरूणिपृथून्यग्निरनुयाति
भर्वन्॥ आयुष्टेविश्वतोदधदयमग्निर्वरेण्यः॥ पुनस्तेप्राणआयति
परायक्ष्मंॅसुवामिते॥ आयुर्दाअग्नेहविषोजुषाणोघृतप्रतीकोघृत
योनिरेधि॥ घृतंपीत्वामधुचारुगव्यंपितेवपुत्रमभिरक्षतात् ४॥ रक्षता
दिमं॥ तस्मैतेप्रतिहर्यतेजातवेदोविचर्षणे॥ अग्नेजनामिसुष्टुतिं॥ २२
दिवस्परिप्रथमंजज्ञेअग्निरस्मद्द्वितीयंपरिजातवेदाः॥ तृतीयमप्सु

नृमणाअजस्रमिंधानएनंजरतेस्वाधीः॥ शुचिः पावकवंद्योग्नेबृह
द्विरोचसे॥ त्वंघृतेभिराहुतः॥ दृशानोरुक्मउर्व्याव्यद्यौद्दुर्मर्षमायुः श्रि
येरुचानः॥ अग्निरमृतोअभवद्वयोभिः॥ ५॥ यदेनंद्यौरजनयत्सु
रेताः॥ आयदिषेनृपतिंतेजआनट्छुचिरेतोनिषिक्तंद्यौरभीके॥ अग्निः
शर्धमनवद्यंयुवानंॅस्वाधियंजनयत्सूदयच्च॥ सतेजीयसामन
सात्वोतउताशिक्षस्वपत्यस्याशिक्षोः॥ अग्नेरायोनृतमस्यप्रभूतौभूया
मतेसुष्टुतयश्चवस्वः॥ अग्नेसहंतमाभरद्युम्नस्यप्रासहारयिं॥
विश्वायः॥ ६॥ चर्षणीरभ्यासावाजेषुसासहत्॥ तमग्नेपृतनासहंॅ
रयिंॅसहस्वआभर॥ त्वंॅहिसत्योअद्भुतोदातावाजस्यगोमतः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०१ उक्षान्नायवशान्नायसोमपृष्ठायवेधसे॥स्तोमैर्विधेमाग्नये॥वद्माहिसूनोअस्यद्मस
२३ द्वाचक्रेअग्निर्जनुषाज्मान्नं॥सत्वंनऊर्जसनऊर्जंधाराजेवजेरवृकेक्षेष्यंतः॥अग्नआयूं
षि॥७॥ ॥पवसआसुवोर्जमिषंचनः॥आरेबाधस्वदुच्छुनां॥अग्नेपवस्वस्वपाअस्मे
वर्च्चः सुवीर्यं॥दधत्पोषंरयिंमयि॥अग्नेपावकरोचिषामंद्रयादेवजिह्वया॥आदेवा
न्वक्षियक्षिच॥सनःपावकदीदिवोग्नेदेवाँइहावह॥उपयज्ञंहविश्चनः॥अग्निः
शुचिव्रततमःशुचिर्विप्रःशुचिःकविः॥शुचीरोचतआहुतः॥उदग्नेशुचयस्तवशु
क्राभ्राजंतईरते॥तवज्योतींष्यर्चयः॥८॥पुरुनिष्ठःपुर्वणीकभराभितयोभिर्यआ
यूंषिविप्रःशुचिश्चतुर्दशान॥१४॥ ॥देवस्यरक्षोहणोविभूरस्त्वंसोमास्यन्यानगां २३
पृथिव्याइषेत्वाददेवाक्तेसंतेसमुद्रंहविष्मतीर्इदेत्वमग्नेरुद्रश्चतुर्दश॥ ॥
देवस्यगमध्येहविष्मतीःपवसएकत्रिंशत्॥ ॥३१॥ ॥२॥ ७ ॥

हरिः ऽ ओं आददे ग्रावास्यध्वरकृद्देवेभ्यो गंभीरमिममध्वरं कृध्युत्तमेनपवि
नेंद्रायसोमं सुषुतं मधुमंतं पयस्वंतं वृष्टिवनिमिंद्रायत्वावृत्रघ्न इंद्रायत्वा
वृत्रतुर इंद्रायत्वाभिमातिघ्न इंद्रायत्वादित्यवत इंद्रायत्वाविश्वदेव्यावते श्वात्राः
स्थवृत्रतुरोराधोगूर्त्ताअमृतस्यपत्नीस्तादेवीर्देवत्रेमंयज्ञंधत्तोपहूताः सोम
स्यपिबतोपहूतोयुष्माकं॥१॥ सोमः पिबतुयत्तेसोमदिविज्योतिर्यत्पृथि
व्यांयदुरावंतरिक्षेतेनास्मैयजमानायोरुरायाकृध्यधिदात्रेवोचोधिष
णेवीडूसतीवीडयेथामूर्जंदधाथामूर्जंमेधत्तंमावांहिंसिषंमामाहिं
सिष्टंप्रागपागुदगधराक्तास्त्वादिशआधावंत्वंबनिष्परा॥यत्तेसोमादाभ्यं
नामजागृवितस्मैतेसोमसोमायस्वाहा॥२॥युष्माकंस्वरयत्तेनवच॥
॥१॥ ॥वाचस्पतयेपवस्ववाजिन्वृषावृष्णोअंशुभ्यांगभस्तिपूतोदेवो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०१ देवानांपवित्रमसियेषांभागोसितेभ्यस्त्वास्वांकृतोसिमधुमतीर्नइषस्कृधिवि
२४ श्वेभ्यस्त्वेंद्रियेभ्योदिव्येभ्यः पार्थिवेभ्योमनस्त्वाष्टूर्वंतरिक्षमन्विहिस्वाहात्वा
सुभवः सूर्यायदेवेभ्यस्त्वामरीचिपेभ्यएषतेयोनिः प्राणायत्वा॥१॥वान्वः स
सत्वत्वारिंशात्॥२॥ ॥उपयामगृहीतोस्यंतर्यच्छमघवन्पाहि सोममुरु
ष्यरायः समिषोयजस्वांतस्तेदधामिद्यावापृथिवीअंतरुर्वंतरिक्षं सजो
षादेवैरवरैः परैश्चांतर्यामेमघवन्मादयस्वस्वांकृतोसिमधुमतीर्नइषस्कृ
धिविश्वेभ्यस्त्वेंद्रियेभ्योदिव्येभ्यः पार्थिवेभ्योमनस्त्वाष्टूर्वंतरिक्षमन्विहिस्वा हि
हात्वासुभवः सूर्यायदेवेभ्यस्त्वामरीचिपेभ्यएषतेयोनिरपानायत्वा॥ २४
॥३॥देवेभ्यःसृष्टन॥३॥ ॥आवायोभूषशुचिपाउपनःसहस्रंतेनियुतो

८ अयंयांमिद्धःउ तिः॥

विश्ववार॥उपोतेअंधोमद्यमयामियस्यदेवदधिषेपूर्वपेयं॥उपयामगृही
तोसिवायवेत्वेंद्रवायूइमेसुताः॥उपप्रयोभिरागतमिंदवोवामुशंतिहि॥उप
यामगृहीतोसींद्रवायुभ्यांत्वैषतेयोनिः सजोषाभ्यांत्वा॥१॥आवायोत्रिंश
त्वारिंशात्॥४॥ ॥अयंवांमित्रावरुणासुतःसोमऋतावृधा॥ममेदिहश्रुतं
हवं॥उपयामगृहीतोसिमित्रावरुणाभ्यांत्वैषतेयोनिर्ऋतायुभ्यांत्वा॥५॥ ॥
यावांकशामधुमत्यश्विनासूनृतावती॥तयायज्ञंमिमिक्षतं॥उपयामगृही
तोस्यश्विभ्यांत्वैषतेयोनिर्माध्वीभ्यांत्वा॥१॥यावामिष्टादश॥६॥ ॥प्रातर्युजौ
विमुच्येथामश्विनावेहगच्छतं॥अस्यसोमस्यपीतये॥उपयामगृहीतोस्यश्वि
भ्यांत्वैषतेयोनिरश्विभ्यांत्वा॥प्रातर्युजावेकान्नविंशतिः॥७॥ ॥अयंवेन
१॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वे

सं०१ श्वोदयत्स्पृश्निगर्भा ज्योतिर्जरायूरजसोविमाने॥इममपाᳫं संगमेसूर्यस्य
२५ शिशुंनविप्रामतिभीरिहंति॥उपयामगृहीतोसिशंडायत्वेषतेयोनिर्वीरतांपाहि॥१॥ अयंवेनःपंचविᳫंशातिः॥८॥ ॥तंप्रत्नथापूर्वथाविश्वथेमथाज्येष्ठतातिंबर्हिषदᳫं स्वर्विदंप्रतीचीनंवृजनंदोहसेगिराशुंजयंतमनुयासुवर्धसे॥उपयामगृहीतोसिमर्कायत्वेषतेयोनिःप्रजाःपाहि॥॥१॥तंᳫंषड्विᳫंशातिः॥९॥ ॥येदेवादिव्येकादशस्थपृथिव्यामध्येकादशस्थाप्सुक्षदोमहिनैकादशस्थतेदेवायज्ञमिमंजुषध्वमुपयामगृहीतोस्याग्रयणोसिस्वाग्रयणोजिन्वयज्ञंजिन्वयज्ञपतिमभिसवनापाहि २५
विष्णुस्त्वांपातुविशंत्वंपाहींद्रियेणैषतेयोनिर्विश्वेभ्यस्त्वादेवेभ्यः॥१॥

येदेवास्त्रिंचत्वारिᳫंशत्॥१०॥ ॥त्रिᳫंशत्त्रयश्चगणिनोरुजंतोदिवᳫंरुद्राःपृथिवींनसचंते॥एकादशासोअप्सुक्षदःसुतᳫंसोमंजुषंताᳫंसवनायविश्वे॥उपयामगृहीतोस्याग्रयणोसिस्वाग्रयणोजिन्वयज्ञंजिन्वयज्ञपतिमभिसवनापाहिविष्णुस्त्वांपातुविशंत्वंपाहींद्रियेणैषतेयोनिर्विश्वेभ्यस्त्वादेवेभ्यः॥१॥त्रिᳫंशद्विचत्वारिᳫंशत्॥११॥ ॥उपयामगृहीतोसींद्रायत्वाबृहद्वतेवयस्वतउक्थायुवेयत्तइंद्रबृहद्वयस्तस्मैत्वाविष्णवेत्वैषतेयोनिरिंद्रायत्वोक्थायुवे॥१॥उपयामगृहीतोद्वाविᳫंशातिः॥१२॥ ॥मूर्धानंदिवोअरतिंपृथिव्यावैश्वानरमृतायजातमग्निं॥कविᳫंसम्राजमतिथिंजनानामासन्नापात्रंजनयंत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०१ देवाः॥ उपयामगृहीतोस्यग्नये त्वा वैश्वानराय ध्रुवोसि ध्रुवक्षितिर्ध्रुवाणां
२६ ध्रुवतमोऽच्युतानामच्युतक्षित्तम एष ते योनिरग्नये त्वा वैश्वानराय॥ २॥ मूर्धा
नं पंचत्रिꣳशत्॥ ३३॥ ॥ मधश्च माधवश्च शुक्रश्च शुचिश्च नभश्च नभस्य
श्चेषश्चोर्जश्च सहश्च सहस्यश्च तपश्च तपस्यश्चोपयामगृहीतोसि सꣳ
सर्पोस्यꣳहस्पत्याय त्वा॥ ३॥ मधुश्चꣳ शत्॥ ३४॥ ॥ इंद्राग्नी आग
तꣳ सुतं गीर्भिर्नभो वरेण्यं॥ अस्य पातं धियेषिता॥ उपयामगृहीतोसींद्रा
ग्निभ्यां त्वैष ते योनिरिंद्राग्निभ्यां त्वा॥ ३५॥ ओमासश्चर्षणीधृतो विश्वे
देवास आगत॥ दाश्वाꣳसो दाशुषः सुतं॥ उपयामगृहीतोसि विश्वेभ्य २६
स्त्वा देवेभ्य एष ते योनिर्विश्वेभ्यस्त्वा देवेभ्यः॥ १॥ इंद्राग्नी ओमासो विꣳ

शतिः॥ २६॥ ॥ मरुत्वंतं वृषभं वावृधानमकवारिं दिव्यꣳ शासमिंद्रं॥
विश्वासाहमवसे नूतनायोग्रꣳ सहोदामिह तꣳ हुवेम॥ उपयामगृही
तोसींद्राय त्वा मरुत्वत एष ते योनिरिंद्राय त्वा मरुत्वते॥ १॥ मरुत्वंतꣳ
षड्विꣳशतिः॥ १७॥ इंद्र मरुत्व इह पाहि सोमं यथा शार्याते अपिबः सु
तस्य॥ तव प्रणीती तव शूर शर्मन्नाविवासंति कवयः सुयज्ञाः॥ उपया
मगृहीतोसींद्राय त्वा मरुत्वत एष ते योनिरिंद्राय त्वा मरुत्वते॥ १॥
॥ १८॥ मरुत्वाꣳ इंद्र वृषभो रणाय पिबा सोममनुष्वधं मदाय॥ आ
सिंचस्व जठरे मध्व ऊर्मिं त्वꣳ राजासि प्रदिवः सुतानां॥ उपयामगृ
हीतोसींद्राय त्वा मरुत्वत एष ते योनिरिंद्राय त्वा मरुत्वते॥ १॥ इंद्रम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स०१ रुक्लोमरुत्वानेकान्नविꣳशत्॥१९॥ ॥महाꣳइंद्रोयओजसापर्ज
२७ न्योवृष्टिमाꣳइव॥स्तोमैर्वत्सस्यवावृधे॥उपयामगृहीतोसिम
हेंद्रायत्वैषतेयोनिर्महेंद्रायत्वा॥१॥महानेकान्नविꣳशतिः॥
॥२०॥ महाꣳइंद्रोनृवदाचर्षणिप्राउतद्विबर्हाअमिनःसहोभिः॥
अस्मद्र्यग्वावृधेवीर्यायोरुःपृथुःसुकृतःकर्तृभिर्भूत्॥
उपयामगृहीतोसिमहेंद्रायत्वैषतेयोनिर्महेंद्रायत्वा॥१॥म
हान्नृवत्षड्विꣳशतिः॥२१॥ ॥कदाचनस्तरीरसिनेंद्रसश्च २८
सिदाशुषे॥उपोपेन्नुमघवन्भूयइन्नुतेदानंदेवस्यपृच्यते॥

उपयामगृहीतोस्यादित्येभ्यस्त्वा॥कदाचनप्रयुच्छस्युभेनिपासिजन्म
नी॥तुरीयादित्यसवनंतइंद्रियमातस्थावमृतंदिवि॥यज्ञोदेवानांप्रत्ये
तिसुम्नमादित्यासोभवतामृडयंतः॥आवोर्वाचीसुमतिर्ववृत्यादꣳहो
श्चिद्यावरिवोवित्तरासत्॥विवस्वआदित्यैषतेसोमपीथस्तेनमंदस्व
तेनतृप्यतृप्यास्मतेवयंतर्पयितारोयादिव्यावृष्टिस्तयात्वाश्रीणामि॥
॥१॥वःसप्तविꣳशतिश्च॥२२॥ ॥वाममद्यसवितर्वाममुश्वोदिवेदि
वेवाममस्मभ्यꣳसावीः॥वामस्यहिक्षयस्यदेवभूरेरयाधियावामभाजः
स्याम॥उपयामगृहीतोसिदेवायत्वासवित्रे॥१॥वामंचतुर्विꣳशतिः॥२३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०१ अदब्धेभिः सवितः पायुभिष्ट्वꣳ शिवेभिरद्य परि पाहि नो गयं ॥ हिरण्यजि
२८ ह्वः सुविताय नव्यसे रक्षा माकिर्नो अघशꣳस ईशत ॥ उपयामगृहीतोसि
देवाय त्वा सवित्रे ॥१॥ अदब्धेभिस्त्रयोविꣳशतिः ॥२४॥ ॥हिरण्यपा
णिमूतये सवितारमुपह्वये ॥ स चेत्ता देवता पदं ॥ उपयामगृहीतोसि देवा
य त्वा सवित्रे ॥१॥ हिरण्यपाणिं चतुर्दश ॥२५॥ ॥ सुशर्मासि सुप्र
तिष्ठानो बृहदुक्षे नम एष ते योनिर्विश्वेभ्यस्त्वा देवेभ्यः ॥१॥ सुशर्मा द्वाद
श ॥२६॥ ॥बृहस्पतिसुतस्य त इन्दो इन्द्रियावतः पत्नीवन्तं ग्रहं गृह्णा
म्यग्ना ३ इ पत्नीवा ३ः सजूर्देवेन त्वष्ट्रा सोमं पिब स्वाहा ॥१॥ बृहस्पतिसु २८

तस्य पंचदश ॥२७॥ ॥हरिरसि हारियोजनो हर्योः स्थाता वज्रस्य भर्त्ता
पृश्नेः प्रेता तस्य ते देव सोमेष्टयजुषः स्तुतस्तोमस्य शस्तोक्थस्य हरिवन्तं
ग्रहं गृह्णामि हरीः स्थ हर्योर्धाना सहसोमा इन्द्राय स्वाहा ॥१॥ हरिः षड्विꣳ
शतिः ॥२८॥ ॥अग्न आयूꣳषि पवस आ सुवोर्जमिषं च नः ॥ आरे बा
धस्व दुच्छुनां ॥ उपयामगृहीतोस्यग्नये त्वा तेजस्वत एष ते योनिरग्न
ये त्वा तेजस्वते ॥१॥ अग्ने त्रयोविꣳशतिः ॥२९॥ ॥उत्तिष्ठन्नोजसा
सह पीत्वा शिप्रे अवेपयः ॥ सोममिन्द्र चमू सुतं ॥ उपयामगृहीतोसी
न्द्राय त्वौजस्वत एष ते योनिरिन्द्राय त्वौजस्वते ॥१॥ उत्तिष्ठन्नेकविꣳ
शतिः ॥ तरणिर्विश्वदर्शतो ज्योतिष्कृदसि सूर्य ॥ विश्वमाभासि रो
॥ꣳ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ज्योतिष्मतीं त्वा सादयामि ज्योतिर्विदं त्वा सादयामि भास्वतीं त्वा सा०मि

सं०१ २९ चनं॥ उपयामगृहीतोसि सूर्याय त्वा भ्राजस्वत एष ते योनिः सूर्याय त्वा भ्रा
जस्वते॥१॥ तरणिर्विंꣳशतिः॥ ३१॥ ॥आप्यायस्व मदिन्तम सोम विश्वा
भिरूतिभिः॥ भवानः सप्रथस्तमः॥१॥ आनव॥ ३२॥ ॥ईयुष्टे ये पूर्वत
राम पश्यन्व्युच्छंतीमुषसं मर्त्यासः॥ अस्माभिरू नु प्रतिचक्ष्याभूदो ते यं
ति ये अपरीषु पश्यान्॥१॥ ईयुरेकान्नविंꣳशतिः॥ ३३॥ ॥ज्योतिष्म
तीं त्वा सादयामि ज्वलंतीं त्वा सादयामि मल्मलाभवंतीं त्वा सादयामि दीप्य
मानां त्वा सादयामि रोचमानां त्वा सादयाम्यजस्रां त्वा सादयामि बृहज्ज्यो
तिषं त्वा सादयामि बोधयंतीं त्वा सादयामि जाग्रतीं त्वा सादयामि॥१॥ २९
ज्योतिष्मतीꣳ षड्विंꣳशतिः॥ ३४॥ ॥प्रयासाय स्वाहा यासाय स्वाहा

वियासाय स्वाहा संयासाय स्वाहोद्यासाय स्वाहावयासाय स्वाहा शुचे स्वा
हा शोकाय स्वाहा तप्यत्वै स्वाहा तपते स्वाहा ब्रह्महत्यायै स्वाहा सर्वस्मै
स्वाहा॥१॥ प्रयासाय चतुर्विंꣳशतिः॥ ३५॥ ॥चित्तꣳ संतानेन भवं य
क्ना रुद्रं तनिम्ना पशुपतिꣳ स्थूलहृदयेनाग्निꣳ हृदयेन रुद्रं लोहितेन शर्वं
मतस्नाभ्यां महादेवमंतःपार्श्वेनौषिष्ठहनꣳ शिंगीनिकोश्याभ्यां॥१॥
चित्तमष्टादश॥ ३६॥ ॥आतिष्ठ वृत्रहन्रथं युक्ता ते ब्रह्मणा हरी॥ अ
र्वाचीनꣳ सुते मनो ग्रावा कृणोतु वग्नुना॥ उपयामगृहीतोसीन्द्राय त्वा
षोडशिन एष ते योनिरिन्द्राय त्वा षोडशिने॥१॥ आतिष्ठ षड्विंꣳशतिः॥ ३७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स०१ इंद्रमिद्धरीवहतोप्रतिधृष्टशवसमृषी णांचस्तुतीरुपयज्ञंचमानुषाणां॥
३० उपया०॥१॥इंद्रंत्रयोविंशतिः॥३८॥ ॥असाविसोमइंद्रतेशविष्ठधृ
ष्णवागहि॥आत्वापृणक्त्विंद्रियंरजःसूर्यंनरश्मिभिः॥उपया०॥१॥
असाविसप्तविंशतिः॥३९॥ ॥सर्वस्यप्रतिशीवरीभूमिस्त्वोपस्थ
आधित॥स्योनास्मैसुषदाभवयछास्मैशर्मसप्रथाः॥उपया०॥१॥
॥४०॥ ॥महांइंद्रोवज्रबाहुःषोडशीशर्मयछतु॥स्वस्तिनोमघ
वाकरोतुहंतुपाप्मानंयोस्मांद्वेष्टि॥उप०॥१॥सर्वस्यमहान्षड्विंश
तिः॥४१॥ ॥सजोषाइंद्रसगणोमरुद्भिःसोमंपिबवृत्रहञ्छूरविद्वा ३०
न्॥जहिशत्रूंरपमृधोनुदस्वाथाभयंकृणुहिविश्वतोनः॥उपया

मगृहीतोसींद्रायत्वाषोडशिनएषतेयोनिरिंद्रायत्वाषोडशिने॥१॥स
जोषास्त्रिंशत्॥४२॥ ॥उदुत्यंजातवेदसंदेवंवहंतिकेतवः॥दृशेवि
विश्वायसूर्यं॥चित्रंदेवानामुदगादनीकंचक्षुर्मित्रस्यवरुणस्याग्नेः॥
आप्राद्यावापृथिवीअंतरिक्षंसूर्यआत्माजगतस्तस्थुषश्च॥अग्नेन
यसुपथाराये अस्मान्विश्वानिदेववयुनानिविद्वान्॥युयोध्यस्मज्जुहु
राणमेनोभूयिष्ठांतेनमउक्तिंविधेम॥दिवंगछसुवःपतरूपेण॥१॥वो
रूपमभ्यैमिवयसावयः॥तुथोवोविश्ववेदाविभजतुवर्षिष्ठेअधिनाके
॥एतत्तेअग्नेराधऐतिसोमच्युतंतन्मित्रस्यपथानयर्तस्यपथाप्रेत
चंद्रदक्षिणायज्ञस्यपथासुवितानयंतीब्राह्मणमद्यराध्यासमृषिमा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मं१४ र्षेयंपितृमंतंपेतृमत्यꣳसुधातुदक्षिणंविस्क्रवःपश्यव्यंतरिक्षंयतस्वसद्स्यै
३१ रस्मद्दूत्रादेवत्रागच्छतमधुमतीःप्रदातारमाविशतानवहायास्मांदेवयाने
नपथेतसुकृतांलोकेसीदततन्नःसꣳस्कृतं॥२॥रूपेणदंसेस्यैरष्टादशाच॥
॥४३॥ ॥धातारातिःसवितेदंजुषंतांप्रजापतिर्निधिपतिर्नोअग्निः॥त्वष्टा
विष्णुःप्रजयासꣳरराणोयजमानायद्रविणंदधातु॥समिंद्रणोमनसानेषि
गोभिःसꣳसूरिभिर्मघवन्त्सꣳस्वस्त्या॥संब्रह्मणादेवकृतंयदस्तिसंदेवा
नाꣳसुमत्यायज्ञियानां॥संवर्चसापयसासंतनूभिरगन्महिमनसासꣳशि
वेन॥त्वष्टानोअत्रवरिवःकृणोतु॥१॥अनुमार्ष्टुतनुवोयद्विलिष्टं॥यदद्यत्वा ३९
प्रयतियज्ञेअस्मिन्नग्नेहोतारमवृणीमहीह॥ऋधगयाडृधगुताशमिष्ठाः
ता

प्रजानन्यज्ञमुपयाहिविद्वान्॥स्वगावोदेवाःसदनमकर्मयआजग्मेदंसव
नेदंजुषाणाः॥जक्षिवाꣳसःपपिवाꣳसश्चविश्वेस्मेधत्तवसवोवसूनि॥यान्ना
वहउशतोदेवदेवांतान्॥२॥प्रेरयस्वेअग्नेसधस्थे॥वहमानाभरमाणाह
वीꣳषिवसुंघर्मंदिवमातिष्ठतानु॥यज्ञयज्ञंगच्छयज्ञपतिंगच्छस्वांयोनिं
गच्छस्वाहैषतेयज्ञोयज्ञपतेसहसूक्तवाकःसुवीरःस्वाहादेवागातुविदोगा
तुंवित्वागातुमितमनसस्पतइमन्नोदेवदेवेषुयज्ञꣳस्वाहावाचिस्वाहावाते
धाः॥३॥कृणोतुतानध्वाचतारिꣳशच्च॥४४॥ ॥उरुꣳहिराजावरुण
श्चकारसूर्यायपंथामन्वेतवाउ॥अपदेपादाप्रतिधातवेकरुतापवक्ताहृ
दयाविधश्चित्॥शतंतेराजन्भिषजःसहस्रमुर्वीगंभीरासुमतिष्टे
अस्तु॥बाधस्वद्वेषोनिर्ऋतिंपराचैःकृतंचिदेनःप्रमुमुग्ध्यस्मत्॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०१ अभिष्ठितो वरुणस्य पाशोग्नेरनीकमप आविवेश॥ अपांनपात्प्रतिरक्षंनसु
३२ र्यंदमेदमे॥१॥ समिधंयस्यग्ने॥ प्रतिते जिह्वा घृतमुच्चरण्येत्समुद्रेते हृ
दयमप्स्वंतः॥ संत्वाविशं त्वोषधीरुतापोयज्ञस्यत्वायजतपते हविर्भिः॥ सूक्त
वाकेन मोवाके विधेमावभृथनिचुंकुणनिचेरुरसि निचुंकुणावदेवै
र्देवकृतमेनोयाडवमर्त्यैर्मर्त्यकृतमुरोराणोदेवरिषस्पाहि सुमित्रानआ
पओषधयः॥२॥ संतु दुर्मित्रास्तस्मै भूयासुर्योस्मान्द्वेष्टि यंचवयंद्वि
ष्मोदेवीरापएषवोगर्भस्तंवः सुप्रीतꣳ सुभृतमकर्मदेवेषुनः सुकृतो ३२
ब्रूतात्प्रतियुक्तो वरुणस्य पाशः प्रत्यस्तो वरुणस्य पाशः एधोस्येधिषीम
हि समिदसि तेजोसि तेजो मयि धेह्यपो अन्वचारिषꣳ रसेन समसृक्ष्महि॥

पयस्वाꣳ अग्न आगमंतंमासꣳसृजवर्चसा॥३॥ इदमेदमु ओषधय आ
पट्स्वे॥४५॥ ॥यस्त्वाहृदाकीरिणामन्यमानो मर्त्यंमर्त्यो जोहवीमि॥ जात
वेदोयशो अस्मासु धेहि प्रजाभिरग्ने अमृतत्वमश्यां॥ यस्मैत्वꣳ सुकृतेजात ७
वेद उलोकमग्ने कृणवः स्योनं॥ अश्विनꣳ सपुत्रिणंवीरवंतंगोमंतꣳ रयिं
नशाते स्वस्ति॥ त्वेसु पुत्र शवसो हृत्रन्कामकातयः॥ नत्वामिंद्रातिरिच्यते॥
उक्थउक्थे सोमइंद्रंममादनीथेनीथे मघवानं॥१॥ सुतासः॥ यदीꣳ
सबाधः पितरंनपुत्राः समानदक्षा अवसेहवंते॥ अग्नेरसेनतेजसाजा
तवेदोविरोचसे॥ रक्षोहामीवचातनः॥ अपो अन्वचारिषꣳ सैरेनसम
सृक्ष्महि॥ पयस्वाꣳ अग्न आगमंतंमासꣳसृजवर्चसा॥ वसुर्वसुप

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०१ तिर्हि कमस्यग्ने विभावसुः॥ स्याम ते सुमताववपि॥ त्वामग्ने वसुपतिं वसूना
३३ मभिप्रमंदे॥२॥ अध्वरेषु राजन्॥ त्वया वाजं वाजयंतो जयेमाभिष्याम पृ
त्सुतीर्मर्त्यानां॥ त्वामग्ने वाजसातमं विप्रा वर्धंति सुष्टुतं॥ स नो रास्व सुवीर्यं
अयं नो अग्निर्वरिवः कृणोत्वयं मृधः पुर एतु प्रभिंदन्॥ अयं शत्रूञ्जयतु जर्हृषाणोयं वाजं जयतु वाजसातौ॥ अग्निनाग्निः समिध्यते कविर्गृ
हपतिर्युवा॥ हव्यवाड्जुह्वास्यः॥ त्वं ह्यग्ने अग्निना विप्रो विप्रेण सन्त्सता॥
सखा सख्या समिध्यसे॥ उदग्ने शुचयस्तव वि ज्योतिषा॥३॥ मघवानं
मंदेत्यग्ने चतुर्दशानि॥४६॥ ॥आददे वाचस्पतय उपयामगृहीतो ३३
स्यावायो अयं वां यावां प्रातर्युजावयं वेनस्तं प्रत्नथाये देवास्त्रिंशाद्

सा

पयामगृहीतोसि मूर्धानं मधुश्चेंद्राग्नी ओमासो मरुत्वंतमिंद्र मरुत्वो
मरुत्वान्महान्महान्नृवत्तुरा मामं मदब्धेभिर्हिरण्यपाणिं सुशर्मा
बृहस्पतिर्हरिरस्यग्न उत्तिष्ठंतरणिराप्यायस्वे पुष्टे ये ज्योतिष्मती प्रया
यचित्तमातिष्ठेंद्र मसावि सर्वस्य महान्त्सजोषा उदुत्यं धातोरुं हियस्ता
षट् चत्वारिंशत्॥ ॥ ॥आददे ये देवा महानुत्तिष्ठन्त्सर्वस्य संतु
दुर्मित्राश्चतुः पंचाशत्॥ ॥५४॥ ॥४॥ ७ ॥ ७ ॥ ७ ॥
हरिः ओम्॥ देवासुराः संयत्ता आसं ते देवा विजयमुपयंतोग्नौ वामं वसु
संन्यदधत इदमु नो भविष्यति यदि नो जेष्यंतीति तदग्निर्न्यकामयत तेना
पाक्रामत्तद्देवा विजित्यावरुरुत्समाना अन्वायंतदस्य सहसादित्सं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०१ तसो रोदीद्यदरोदीत्तद्रुद्रस्य रुद्रत्वंयदश्र्वशीयत तद्र॥१॥ रजतꣳ हिर
३४ ण्यमभवत्तस्माद्रजतꣳ हिरण्यमदक्षिण्यमश्रुजꣳ हियो बर्हिषि दद्याति
पुरास्य संवत्सराद्गृहे रुदंति तस्माद्बर्हिषि न देयꣳ सोग्निरब्रवीद्भाग्य
सान्यथ वइदमिति पुनराधेयंते केवलमित्यब्रुवन्नृध्नवत्खलु सइत्य
ब्रवीद्यो मद्देवत्यमग्निमादधाता इति तंपूषाधत्त तेन॥२॥ पूषार्ध्नोत्तस्मा
त्पौष्णाः पशवउच्यंते तंत्वष्टाधत्त तेन त्वष्टार्ध्नोत्तस्मात्त्वाष्ट्राः पशवउ
च्यंते तं मनुराधत्त तेन मनुरार्ध्नोत्तस्मान्मानव्यः प्रजाउच्यंते तंधा ३४
ताधत्त तेन धातार्ध्नोत्संवत्सरो वै धाता तस्मात्संवत्सरंप्रजाः पशवो

नुप्रजायंते यएवंपुनराधेयस्यर्धिंवेद॥३॥ ऋध्नोत्येवयो स्यैवंबंधुतां वेद
बंधुमान्भवति भागधेयंवा अग्नि राहित इच्छमानः प्रजांपशून्यजमानस्यो
पदोद्रावोद्वास्य पुनरादधीत भागधेयेनैवैनꣳ समर्धयत्यथो शांतिरेवास्यै
षा पुनर्वस्वोरादधीतैतद्वै पुनराधेयस्यनक्षत्रं यत्पुनर्वसू स्वायामेवैनं दे
वतायामाधाय ब्रह्मवर्चसी भवति दर्भैरादधात्ययातयामत्वाय दर्भै
रादधात्यद्भ्य एवैनमोषधीभ्योवरुध्याधत्ते पंचकपालः पुरोडाशो भव
ति पंचवाऋतवऋतुभ्य एवैनमवरुध्याधत्ते॥४॥ अशांतियंत त्तेनवेदद
र्भैः पंचविꣳशतिश्च॥१॥ ॥परावाएषयज्ञंपशून्वपति योग्निमुद्वासयते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

५०१ तेपंचकपालः पुरोडाशो भवति पांक्तो यज्ञः पांक्ताः पशवो यज्ञमेव पशून्
३५ वरुंधे वीरहा वा एष देवानां योग्निमुद्वासयते न वा एतस्य ब्राह्मणा ऋतायवः
पुरान्नमक्षन्पंक्त्यो याज्यानुवाक्या भवंति पांक्तो यज्ञः पांक्तः पुरुषो देवाने
ववीरं निरवदायाग्निं पुनरा॥१॥ धत्ते शताक्षरा भवंति शतायुः पुरुषः शतेंद्रि
य आयुष्येवेंद्रिये प्रतितिष्ठति यद्वा अग्निराहितो नर्ध्यैते ज्यायो भागधेयं नि
कामयमानो यदाग्नेयꣳ सर्वं भवति सैवास्यर्धिः सं वा एतस्य गृहे वाक्सृज्य
ते योग्निमुद्वासयते स वाचꣳ सꣳसृष्टां यजमान ईश्वरोनु पराभवितोर्वि ३५
भक्तयो भवंति वाचो विधृत्यै यजमानस्यापराभावाय॥२॥ विभक्तिं करोति

ब्रह्मैव तदकरुपाꣳशु यजति यथा वामं वसु विविदानो गूहति तादृगेव तदग्निं
प्रतिस्विष्टकृतं निराह यथा वामं वसु विविदानः प्रकाशं जिगमिषति तादृगेव त
द्विभक्तिमुक्त्वा प्रयाजेन वषट्करोत्यायतनादेव नैति यजमानो वै पुरोडाशः
पशव एते आहुती यदभितः पुरोडाशमेते आहुती॥३॥ जुहोति यजमानमे
वोभयतः पशुभिः परिगृह्णाति कृतयजुः संभृतसंभार इत्याहुर्न संभृत्याः
संभारा न यजुः कर्तव्यमित्यथो खलु संभृत्या एव संभाराः कर्तव्यं यजुर्यज्ञ
स्य समृद्ध्यै पुनर्निष्कृतो रथो दक्षिणा पुनरुत्स्यूतं वासः पुनरुत्सृष्टोन
ड्वान्पुनराधेयस्य समृद्ध्यै सप्त ते अग्ने समिधः सप्त जिह्वा इत्यग्निहोत्रं
जुहोति यत्र यत्रैवास्य न्यक्तं ततः॥४॥ एवैनमवरुंधे वीरहा वा एष देवानां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०१ योग्निमुद्वासयते तस्य वरुणएव र्णयाद्याग्निवारुणमेकादशकपालमनुनिर्वपेद्यं
३६ चैवहंति यश्चास्यर्णयात्तौ भागधेयेन प्रीणाति नार्तिमार्च्छति यजमानः॥५॥ आप
राभावाय पुरोडाशमेते आहुती ततः षट्त्रिंशश्च॥२॥ ॥भूमिर्भूम्ना द्यौर्व
रिणांतरिक्षं महित्वा॥ उपस्थे ते देव्यदितेग्निमन्नादमन्नाद्यायादधे॥ आयं गौः
न पृश्निरक्रमीदसदन्मातरं पुरः॥ पितरं च प्रयन्त्स्वः॥ न्त्स्कन्नः॥ त्रिंशद्धाम वि
राजति वाक्पतंगाय शिश्रिये॥ प्रत्यस्य वह द्युभिः॥ अस्य प्राणादपान
त्यंतश्चरति रोचना। व्यख्यन्महिषः सुवः॥ यत्वा॥१॥ क्रुद्धः परीवपमन्
न्युना यदवर्त्या॥ सुकल्पमग्ने तत्तव पुनस्त्वोद्दीपयामसि॥ यत्ते मन्यु

परोप्तस्य पृथिवीमनुदध्वसे॥ आदित्या विश्वे तद्देवा वसवश्च समाभरन्॥ म
नो ज्योतिर्जुषतामाज्यं विच्छिन्नं यज्ञँ समिमं दधातु॥ बृहस्पतिस्तनुतामि
मं नो विश्वेदेवा इह मादयंतां॥ सप्त ते अग्ने समिधः सप्त जिह्वाः सप्त॥२॥
ऋषयः सप्त धाम प्रियाणि॥ सप्त होत्राः सप्तधा त्वा यजंति सप्त योनीरा पृ
णस्वा घृतेन॥ पुनरूर्जा निवर्तस्व पुनरग्न इषायुषा॥ पुनर्नः पाहि विश्व
तः॥ सह रय्या निवर्तस्वाग्ने पिन्वस्व धारया॥ विश्वप्स्निया विश्वतस्प
रि॥ लेकः सलेकः सुलेकस्ते न आदित्या आज्यं जुषाणा वियंतु केतः सके
तः सुकेतस्ते न आदित्या आज्यं जुषाणा वियंतु विवस्वाँ अदितिर्देवजू

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

५०१ तिस्तेन आदित्या आज्यं जुषाणा वियंतु ॥ ३ ॥ त्वा जिह्वाः सप्तस्फके तस्तेन
३७ स्त्रयोदश च ॥ ३ ॥ ॥ भूमिर्भूम्ना द्यौर्वरिणेत्याहाशिषैवैनमाधत्ते सर्पा वै जी
र्यंतोमन्यंत स एतं कसर्णीरः काद्रवेयो मंत्रमपश्यत्ततो वै ते जीर्णास्तनू
रपाघ्नत सर्पराज्ञिया ऋग्भिर्गार्हपत्यमादधाति पुनर्नवमेवैनमजरं कृत्वा
धत्ते अथो पूतमेव पृथिवीमन्नाद्यं नोपानमत्सैतं ॥ ३ ॥ मंत्रमपश्यत्ततो वै ता
मन्नाद्यमुपानमद्यत्सर्पराज्ञिया ऋग्भिर्गार्हपत्यमादधात्यन्नाद्यस्याव
रुध्या अथो अस्यामेवैनं प्रतिष्ठितमाधत्ते यत्वाक्रुद्धः परोवपेत्याहाप ३७
ह्नुत एवास्मै तत्पुनस्त्वोद्दीपयामसीत्याह समिंध एवैनं यत्ते मन्युपरोप्त

स्येत्याह देवताभिरेव ॥ २ ॥ एनं संभरति वि वा एतस्य यज्ञश्छिद्यते योग्नि
मुद्वासयते बृहस्पतिर्वत्यर्चो पतिष्वते ब्रह्म वै देवानां बृहस्पतिर्ब्रह्मणैव यज्ञं
संदधाति विच्छिन्नं यज्ञं समिमं दधात्वित्याह संतत्यै विश्वे देवा इह मादयंता
मित्याह संतत्यै वयज्ञं देवेभ्यो नुदिशति सप्त ते अग्ने समिधः सप्तजिह्वाः ॥
॥ ३ ॥ इत्याह सप्त सप्त वै सप्तधाग्नेः प्रियास्तनुव स्ता एवावरुंधे पुनरूर्जा
सह रय्येत्यभितः पुरोडाशमाहुतीर्जुहोति यजमानमेवोर्जा च रय्या चो
भयतः परिगृह्णात्यादित्या वा अस्माल्लोकादमुं लोकमायंते मुष्मिंल्लोके
व्यतृष्यंत इमं लोकं पुनरभ्यवेत्याग्निमाधायैतान्होमानजुहवुस्त आर्ध्नुवं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०१ तेस्वर्गंलोकमायन्यः पराचीनंपुनराधेयादग्निमादधीत सएतान्होमाञ्जु
३८ हुयाद्यामेवादित्याऋद्धिमार्ध्नुवंतामेवर्ध्नोति ॥ ७ ॥ सैतंदेवताभिरेवविजिक्का
एतान्यंचविंशतिश्च ॥ ४ ॥ ॥ उपप्रयंतोअध्वरंमंत्रंवोचेमाग्नये ॥ आ
रेअस्मेचशृण्वते ॥ अस्यप्रत्नामनुद्युतंशुक्रंदुदुह्रेअह्रयः ॥ पयःस
हस्रसामृषिं ॥ अग्निर्मूर्धादिवःककुत्पतिःपृथिव्याअयं ॥ अपांरेतां
सिजितिन्व ॥ अयमिहप्रथमोधायिधातृभिर्होतायजिष्ठोअध्वरेष्वीड्यः ॥
यमप्नवानोभृगवोविरुरुचुर्वनेषुचित्रंविभुवंविशेविशे ॥ उभावामिंद्रा
ग्नीआहुवध्यै ॥ १ ॥ उभाराधसःसहमादयध्यै ॥ उभादातारावि षांर ३८

यीणामुभावाजस्यसातयेहुवेवां ॥ अयंतेयोनिर्ऋत्वियोयतोजातोअरो
चथाः ॥ तंजानंनग्नआरोहाथानोवर्धयारयिं ॥ अग्नआयूंषिपवसआ
सुवोर्जमिषंचनः ॥ आरेबाधस्वदुच्छुनां ॥ अग्नेपवस्वस्वपाअस्मेवर्चः
सुवीर्यं ॥ दधत्पोषंरयिं ॥ २ ॥ मयि ॥ अग्नेपावकरोचिषामंद्रयादेवजि
ह्वया ॥ आदेवान्वक्षियक्षिच ॥ सनःपावकदीदिवोग्नेदेवांइहावह ॥
उपयज्ञंहविश्चनः ॥ अग्निःशुचिव्रततमःशुचिर्विप्रःशुचिःकविः ॥ शु
चीरोचतआहुतः ॥ उदग्नेशुचयस्तवशुक्राभ्राजंतईरते ॥ तवज्योतीं
ष्यर्चयः ॥ आयुर्दाअग्नेस्यायुर्मे ॥ ३ ॥ देहिवर्चोदाअग्नेसिवर्चोमेदे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं११ हितन्नूपा अग्नेसितनुवं मेपाह्यग्नेयन्मेंतनुवाऊनंतन्मआपृणाचित्रा
वसोस्वस्तितेपारमशीयेंचांमास्त्वाशतंॱ्हिमाद्युमंतःसमिधीम
३८ हिवयस्वंतोवयस्कृतंयशस्वंतोयशस्कृतंॱ्सुवीरासोअदाभ्यं॥अ
ग्नेसपत्नदंभनंवर्षिष्ठेअधिनाके॥संत्वमग्नेसूर्यस्यवर्चसागथाःस
मृषीणांॱ्स्तुतेनसंप्रियेणधाम्ना॥त्वमग्नेसूर्येवर्चाअसिसंमामा
युषावर्चसाप्रजयासृज॥७॥आप्यायध्वेपोषंॱ्रयिंमेवर्चसासप्तद
शत्र॥५८॥ संपश्यामिप्रजाअहमिडप्रजसोमानवीः॥सर्वाभवंतुनो ३८
गृहे॥अंभःस्थांभोवोभक्षीयमहःस्थ॥महोवोभक्षीयसहःस्थसहो

वोभक्षीयोर्जःस्थोर्जंवोभक्षीयरेवतीरमध्वमास्मिन्लोकेस्मिन्गोष्ठेस्मिन्क्षये
स्मिन्योनाविहैवस्तेतोमापगातबह्वीर्मेभूयास्त॥१॥सॱ्हितासिविश्व
रूपीरामोर्जाविशागौपत्येनारामस्पोषेणसहस्रपोषंवःपुष्यासंमयिवो
रायःश्रयंतां॥उपत्वाग्नेदिवेदिवेदोषावस्तर्धियावयं॥नमोभरंतएम
सि॥राजंतमध्वराणांगोपामृतस्यदीदिविं॥वर्धमानॱ्स्वेदमे॥सनः
पितेवसूनवेग्नेसूपायनोभव॥सचस्वानःस्वस्तये॥अग्ने॥२॥त्वंनो
अंतमःउतत्राताशिवोभववरूथ्यः॥तंत्वाशोचिष्ठदीदिवः॥सुम्नायनूंन
मीमहेसखिभ्यः॥वसुरग्निर्वसुश्रवाः॥अच्छानक्षिद्युमत्तमोरयिंदाः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०१ ऊर्जांवः पश्यामूर्जामापश्यतरायस्पोषेणवः पश्यामिरायस्पोषेणमाप
३९ श्यतेडाः स्थ मधुकृतः स्योना माविशतेरामदः ॥ सहस्रपोषंवः पुष्यासं ॥
॥३॥ मयिवोरायः श्रयंतां ॥ तत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहि ॥ धि
योयोनः प्रचोदयात् ॥ सोमानं स्वरणंकृणुहिब्रह्मणस्पते ॥ कक्षीवं
तंयऔशिजं ॥ कदाचनस्तरीरसिनेंद्रसश्चसिदाशुषे ॥ उपोपेन्नुमघ
वन्भूयइन्नुतेदानंदेवस्यपृच्यते ॥ परित्वाग्नेपुरंवयंविप्रं सहस्य
धीमहि ॥ धृषद्वर्णंदिवेदिवेभेत्तारंभंगुरावतः ॥ अग्नेगृहपतेसुगृ ३९
हपतिरहंत्वयागृहपतिनाभूयासं सुगृहपतिर्मयात्वंगृहपति

नाभूयाः शतं हिमास्तामाशिषमाशासेतंतवेज्योतिष्मतींतामाशिषमाशा
सेमुष्मैज्योतिष्मती ॥४॥ भूयास्त्वस्वस्तयेग्नेपुष्यासंधृषद्वर्णमेकान्नविंश
द्वा ॥६॥ अयज्ञोवाएषयोसामोपप्रयंतोअध्वरमित्याह स्तोममेवास्मैयु
नक्त्युपेत्याहप्रजावैपशवउपेमंलोकंप्रजामेवपशून्निमंलोकमुपैत्यस्य
प्रत्नामनुद्युतमित्याहसुवर्गोवैलोकः प्रत्नः सुवर्गमेवलोकं समारोहत्य
ग्निर्मूर्धादिवः ककुदित्याहमूर्धानं ॥१॥ एवैनं समानानांकरोत्यथोदेवलोका
देवमनुष्यलोकेप्रतितिष्ठत्ययमिहप्रथमोधायिधातृभिरित्याहमुख्यमेवैनं
करोत्युभावामिंद्राग्नीआहुवध्याइत्याहोजोबलमेवावरुंधेयंतेयोनिर्ऋत्वि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०२ यइत्याह पशवो वै रयिः पशूनेवावरुंधे षड्भिरुपतिष्ठते षड्वै ॥२॥ ऋतव
४० ऋतुष्वेव प्रतितिष्ठति षड्भिरुत्तराभिरुपतिष्ठते द्वादश संपद्यंते द्वादश
ति मासाः संवत्सरः संवत्सर एव प्रतितिष्ठति यथा वै पुरुषो श्वो गौर्जीर्यत्ये
वमग्निराहितो जीर्यति संवत्सरस्य परस्तादाग्निपावमानीभिरुपति
ष्ठते पुनर्नवमेवैनमजरं करोत्यथो पुनात्येवोपतिष्ठते योग एवास्यै
ष उपतिष्ठते ॥३॥ दम एवास्यैष उपतिष्ठते याञ्ञैवास्यैषोपतिष्ठते य
था पापीयाञ्छ्रेयस आहृत्य नमस्यति तादृगेव तदायुर्दा अग्नेस्यायु
र्मे देहीत्याहायुर्दा ह्येष वर्चोदा अग्नेसि वर्चो मे देहीत्याह वर्चोदा ह्येष त ४०

दो

नूपा अग्ने सि तनुवं मे पाहीत्याह ॥४॥ तनूपा ह्येषो ग्नेयन्मे तनुवा ऊनं त
न्म आपृणेत्याह यन्मे प्रजायै पशूनामूनं तन्म आपूरयेति वावैतदाह
चित्रावसो स्वस्ति ते पारमशीयेत्याह रात्रिर्वै चित्रावसुरव्युष्ट्यै वा एत
स्यै पुरा ब्राह्मणा अभैषुर्व्युष्टिमेवावरुंध इंधानास्त्वा शतं ॥५॥ हिमा
इत्याह शतायुः पुरुषः शतेंद्रिय आयुष्येवेंद्रिये प्रतितिष्ठत्येषा वै सूर्मी
कर्णकावत्येतयाह स्म वै देवा असुराणां शततर्हांस्तृंहंति यदेत
या समिधमादधाति वज्रमेवैतच्छतघ्नीं यजमानो भ्रातृव्याय प्रहरति
स्तृत्या अछंबट्कारं सं त्वमग्ने सूर्यस्य वर्चसागथा इत्याहैतत्त्वमसी ग
दमहं भूयासमिति वावैतदाह त्वमग्ने सूर्यवर्चा असीत्याहाशिष

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०१॥ मेवैतामाशास्ते ॥६॥ मूर्धानꣳ षड्वा एष उपतिष्ठते पाहीत्याह शतमहꣳ षो
॥४१॥ डशाव ॥७॥ ॥ संपश्यामि प्रजा अहमित्याह यावंत एव ग्राम्याः पशव
स्तानेवावरुंधेंभः स्थांभो वो भक्षीयेत्याहांभो ह्येता महः स्थ महो वो भक्षी
येत्याह महो ह्येताः सहः स्थ सहो वो भक्षीयेत्याह सहो ह्येता ऊर्जः स्थो
र्जं वो भक्षीयेति ॥९॥ आहोर्जो ह्येता रेवती रमध्वमित्याह पशवो वै रे ६
वतीः पशूनेवात्मन्रमयत इहैव स्तेतो मापगातेत्याह ध्रुवा एवै
ना अनपगाः कुरुत इष्टकचिद्वा अन्योग्निः पशुचिदन्यः संहिता
सि विश्वरूपीरिति वत्समभिमृशत्युपैवैनं धत्ते पशुचितमेनं कु

रुते ॥२॥ वा एषोस्माल्लोका व्यवर्तते य आहवनीयमुपतिष्ठते गार्हपत्य
मुपतिष्ठतेस्मिन्नेव लोके प्रतितिष्ठत्यथो गार्हपत्यायैव निह्नुते गायत्रीभि
रुपतिष्ठते तेजो वै गायत्री तेज एवात्मंधत्ते थो यदेतं तृचमन्वाह संतत्यै ५
गार्हपत्यं वा अनुद्विपादो वीराः प्रजायंते य एवं विद्वान्द्विपदाभिर्गार्हपत्य
मुपतिष्ठते ॥३॥ आस्य वीरो जायत ऊर्जा वः पश्याम्यूर्जा मा पश्यतेत्या
हाशिषमेवैतामाशास्ते तत्सवितुर्वरेण्यमित्याह प्रसूत्यै सोमानꣳ स्व
रणमित्याह सोमपीथमेवावरुंधे कृणुहि ब्रह्मणस्पत इत्याह ब्रह्मव
र्चसमेवावरुंधे कदाचन स्तरीरसीत्याह न स्तरीꣳ रात्रिं वसति ॥४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०१ यएवंविद्वानग्निमुपतिष्ठते परित्वाग्ने पुरंवयमित्याह परिधिमेवैतंपरि
४२ दधात्यस्कंदायाग्ने गृहपत इत्याह यथायजुरेवैतच्छतꣳ हिमा इत्याह
शतंत्वाहेमंतान्निंधिषीयेतिवावैतदाह पुत्रस्यनामगृह्णात्यन्नादमेवैनं
करोतितामाशिषमाशासे तंतवे ज्योतिष्मतीमितिब्रूयाद्यस्य पुत्रोजा
तःस्यात्तेजस्व्येवास्यब्रह्मवर्चसीपुत्रोजायते तामाशिषमाशासे मु
ष्मैज्योतिष्मतीमितिब्रूयाद्यस्य पुत्रोजातःस्यात्तेजएवास्मिन्ब्रह्मवर्चसं त
दधाति ॥५॥ ऊर्जंवोभक्षीयेति प्रगार्हपत्यमुपतिष्ठतेवसतिज्योतिष्म ४२
तीमेकान्नत्रिꣳशच्च ॥ ८ ॥ ॥ अग्निहोत्रंजुहोतियदेवकिंचयज

मानस्यस्वंतस्यैवतद्रेतः सिंचतिप्रजननेप्रजननꣳ हिवाअग्निरथौ
षधीरंतगताददहति तास्ततोभूयसीः प्रजायंते यत्सायंजुहोतिरेतएवत
त्सिंचतिप्रैवप्रातस्तनेनजनयति तद्रेतः सिक्तंनत्वष्ट्राविकृतंप्रजाय
तेयावच्छोवैरेतसः सिक्तस्य ॥१॥ त्वष्टारूपाणिविकरोतितावच्छोवैतत्प्र
जायतएषवैदैव्यस्त्वष्टायोयजतेबह्वीभिरुपतिष्ठतेरेतसएवसिक्त
स्यबहुशोरूपाणिविकरोतिसप्रैवजायतेश्वःश्वोभूयान्भवतियए
वंविद्वानग्निमुपतिष्ठतेऽहर्देवानामासीद्रात्रिरसुराणांतेसुरायद्देवा
नांवित्तंवेद्यमासीत्तेनसहा॥२॥रात्रिंप्राविशंतेदेवाहीनाअमन्यंतते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०१ पशव्यं नाग्नेयी रात्रिराग्नेयाः पशव इममेवाग्निँ स्तवाम स नः स्तुतः प
४२ शून्पुनर्दास्यतीति तेऽग्निमस्तुवन्त्स एभ्यः स्तुतो रात्रिया अध्यहरभि
पशून्निरार्जत्ते देवाः पशून्वित्त्वा कामाँ अकुर्वत य एवं विद्वान
ग्निमुपतिष्ठते पशुमान्भवति ॥ ३ ॥ आदित्यो वा अस्माल्लोकादमुं लो
कमैत्सोऽमुं लोकं गत्वा पुनरिमं लोकमभ्यध्यायत्स इमं लोकमागत्य मृ
त्योरबिभेन्मृत्युसंयुत इव ह्ययं लोकः सोऽमन्यतेममेवाग्निँ स्तवा
नि स मा स्तुतः स्वर्गं लोकं गमयिष्यतीति सोऽग्निमस्तौत्स एनँ स्तु ४२
तः स्वर्गं लोकमगमयद्य ॥ ४ ॥ एवं विद्वानग्निमुपतिष्ठते स्वर्ग

मेव लोकमेति सर्वमायुरेत्यभि वा एषोऽग्नी आरोहति य एनावुपतिष्ठते
यथा खलु वै श्रेयानभ्यारूढः कामयते तथा करोति नक्तमुपतिष्ठते
न प्रातः सँ हि नक्तं व्रतानि सृज्यन्ते सह श्रेयाँश्च पापीयाँश्चासा
ते ज्योतिर्वा अग्निस्तमो रात्रिर्यत् ॥ ५ ॥ नक्तमुपतिष्ठते ज्योतिषैव त
मस्तरत्युपस्थेयोऽग्नी३र्नोपस्थेया३ इत्याहुर्मनुष्यायिन्न्वै योऽह
रहराहृत्याथैनं याचति स इन्न्वै तमुपार्च्छत्यथ को देवानहरहर्या
चिष्यतीति तस्मान्नोपस्थेयोऽथो खल्वाहुराशिषे वै कं यजमानो
यजत इत्येषा खलु वै ॥ ६ ॥ आहिताग्नेराशीर्यदग्निमुपतिष्ठते त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं.१
४४

स्मादुपस्थेयः प्रजापतिः पशून्सृजत ते सृष्टा अहोरात्रे प्राविशं
तां छंदोभिरन्वविंदद्यच्छंदोभिरुपतिष्ठति स्वमेव तदन्विच्छति न तत्र जा
म्यस्तीत्याहुर्योऽहरहरुपतिष्ठत इति यो वा अग्निं प्रत्यङ्ङुपतिष्ठते प्रत्येन
मोषति यः पराङ्विष्वङ्प्रजया पशुभिरेति कवातिर्यङ्ङिवोपतिष्ठेत
नैनं प्रत्योषति न विष्वङ्प्रजया पशुभिरेति ॥ ७ ॥ सिक्तस्यसहभव
ति योयत्खलु वै पशुभिस्त्रयोदशा च ॥ ९ ॥ ॥ मम नाम प्रथमं जात
वेदः पिता माता च दधातु यदग्रे ॥ तत्त्वं बिभृहि पुनरामदेतोस्तवाहं ४४
नाम बिभराण्यग्ने ॥ मम नाम तव च जातवेदो वाससी इव विवसा

नौ ये चराव ॥ आयुषे त्वं जीवसे वयं यथायथं वि परि दधावहै पुनस्ते ॥
नमोऽग्नये प्रतिविद्धाय नमोऽनाधृष्टाय नमः सम्राजे ॥ अषाढः ॥ १ ॥ अ
ग्निर्हि ह्व्या विश्वजित्सहन्त्यश्श्रेष्ठो गंधर्वः ॥ त्वत्पितारो अग्ने देवास्त्वा
माहुतय स्त्वद्विवाचनाः ॥ सं मा मा युषा सं गौपत्येन सुहिते मा धाः ॥
श्र॰ अयमग्निश्रेष्ठतमोयं भगवत्तमोयꣳ सहस्रसातमः ॥ अस्मा अस्तु सुवी सु
र्यं ॥ मनो ज्योतिर्जुषतामाज्यं विच्छिन्नं यज्ञꣳ समिमं दधातु ॥ याइष्टा
उषसो निम्रुचश्च ताः संदधामि हविषा घृतेन ॥ पयस्वतीरोषधयः ॥
॥ २ ॥ पयस्वद्वीरुधां पयः ॥ अपां पयसो यत्पयस्तेन मा [illegible] धत्त ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०१ मिंदुसꣳसृज॥ अग्ने व्रतपते व्रतं चरिष्यामि तच्छकेयं तन्मे रा
४५ ध्यतां॥ अग्निꣳ होतारमिह तꣳ हुवे देवान्यज्ञियानिह यान्हवामहे॥
आ यंतु देवाः सुमनस्यमाना वियंतु देवा हविषो मे अस्य॥ कस्त्वा यु
नक्ति स त्वा युनक्तु यानि घर्मे कपालान्युपचिन्वंति॥ ३॥ वेधसः॥
पूष्णस्तान्यपि व्रत इंद्रवायू विमुंचतां॥ अभिन्नो घर्मो जीरदानुर्यत
आत्तस्तदगन्पुनः॥ इध्मो वेदिः परिधयश्च सर्वे यज्ञस्यायुरनु
संचरति॥ त्रयस्त्रिꣳशत्तंतवो ये वितत्निरे य इमं यज्ञꣳ स्वधया द ४५
दंते तेषां छिन्नं प्रत्येतद्दधामि स्वाहा घर्मो देवाꣳ अप्येतु॥ ४॥ ॥

अषाढꣳ ओषधय उपचिन्वंति पंचचत्वारिꣳशच्च॥ १०॥ ॥ वैश्वानरो
न ऊत्या प्र यातु परावतः॥ अग्निरुक्थेन वाहसा॥ ऋतावानं वैश्वानरमृ
तस्य ज्योतिषस्पतिं॥ अजस्रं घर्ममीमहे॥ वैश्वानरस्य दꣳसनाभ्यो बृ
हदरिणादेकः स्वपस्यया कविः॥ उभा पितरा महयन्नजायताग्निर्द्या
वापृथिवी भूरिरेतसा॥ पृष्टो दिवि पृष्टो अग्निः पृथिव्यां पृष्टो विश्वा ओ
षधीरा विवेश॥ वैश्वानरः सहसा पृष्टो अग्निः स नो दिवा सः॥ १॥ रिषः
पातु नक्तं॥ जातो यदग्ने भुवना व्यख्यः पशुं न गोपा इर्यः परिज्मा॥
वैश्वानर ब्रह्मणे विंद गातुं यूयं पात स्वस्तिभिः सदा नः॥ त्वमग्ने शो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं॰२ त्विषा शोशुचानआरोदसीअपृणाजायमानः॥ त्वंदेवाँ॑अभिशस्तेरमुं
४६ चोवैश्वानरजातवेदोमहित्वा॥ अस्माकमग्नेमघवत्सुधारयाऽनामि
क्षत्रमजरं॑सुवीर्यं॥ वयंजयेमशतिनं॑सहस्त्रिणंवैश्वानर॥२॥
वाजमग्नेतवोतिभिः॥ वैश्वानरस्यसुमतौस्यामराजाहिकंभुवनानाम
भिश्रीः॥ इतोजातोविश्वमिदंविचष्टेवैश्वानरोयततेसूर्येण॥ अवतेहेडो
वरुणनमोभिरवयज्ञेभिरीमहेहविर्भिः॥ क्षयन्नस्मभ्यमसुरप्रचे
तोराजन्नेनां॑सिशिश्रथःकृतानि॥ उदुत्तमंवरुणपाशमस्मदवा ४६
धमंविमध्यमं॑श्रथाय॥ अथावयमादित्य॥३॥ व्रतेतवानागसो

अदितयेस्याम॥ दधिक्राव्णोअकारिषंजिष्णोरश्वस्यवाजिनः॥ सु
सुरभिनोमुखाकरत्प्रणआयूं॑षितारिषत्॥ आदधिक्राःशवसापं
चकृष्टीःसूर्यइवज्योतिषापस्ततान॥ सहस्रसाःशतसावाज्यर्वापृण
क्तुमध्वासमिमावचां॑सि॥ अग्निर्मूर्धाभुवःमरुतोयद्वोदिवःसु
म्नायंतोहवामहे॥ आतून॥४॥ उपगंतन॥ यावःशर्मशशमानाय
संतित्रिधातूनिदाशुषेयच्छताधि॥ अस्मभ्यंतानिमरुतोवियंतर
यिंनोधत्तवृषणःसुवीरं॥ अदितिर्नउरुष्यत्वदितिःशर्मयच्छतु॥
नावतो अत्यान्कक्षीवंत उदमृक्षंत पज्राः ॥ पूर्वामनु प्रयतिमाददे ॥ ७॥
वस्त्रीन्युक्ताँ अष्टावरिधायसो गाः ॥ सुबंधवो ये विश्या इव
एम

श्री पुत्रं वस्कमतारयेन॥ अंगोः स्कृतं पाययमृत्तारस्य क्षयद्वीरं वर्धय सू
नृताभिः॥ उप क्षरंति सिंधवो मयोभुव ईजानं च यक्ष्यमाणं च धेन
वः॥ पृणंतं च पपुरिं च श्रवस्यवो घृतस्य धारा उप यंति विश्वतः॥ ना श्रि
कस्य पृष्ठे अधि तिष्ठति श्रितो यः पृणाति स ह देवेषु गच्छति॥
तस्मा आपो घृतमर्षंति सिंधवस्तस्मा इयं दक्षिणा पिन्वते सदा॥
दक्षिणावतामिदिमानि चित्रा दक्षिणावतां दिवि सूर्यासः॥ दक्षि
णावंतो अमृतं भजंते दक्षिणावंतः प्रतिरंत आयुः॥ मा पृणंतो
दुरितमेन आरन्मा जारिषुः सूरयः सुव्रतासः॥ अन्यस्तेषां प
रिधिरस्तु क॰ दपृणंतमभि सं यंतु शोकाः॥ १०॥ ॥ अमंदान्स्तो

द्वि॰ सं॰ ०२

मा
॥७॥ णं यमिं विप्राः प्रावंतु जूतये विप्राः॥ स हि पुरू चिदोजसा
विरुक्मता दीद्यानो भवति द्रुहंतरः परशुर्न द्रुहंतरः॥ वीळु
चिद्यस्य समृतौ श्रुवद्वनेव यत्स्थिरं॥ निःषहमाणो य
मते नायते धन्वासहा नायते॥ दृळ्हा चिदस्मा अनु दु
र्यथा विदे तेजिष्ठाभिररणिभिर्दाष्ट्यवसेऽग्नये दाष्ट्य
वसे॥ प्र यः पुरूणि गाहते तक्षद्वनेव शोचिषा॥ स्थि
रा चिदन्ना नि रिणात्योजसा नि स्थिराणि चिदोजसा॥
तमस्य पृक्षमुपरासु धीमहि नक्तं यः सुदर्शतरो दि ॥७॥
वातरादप्रायुषे दिवातरात्॥ आदस्यायुर्ग्रभणवद्वी राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

व्रा॥ अनस्वंतः श्रवऐषंत पज्राः॥ आगधिता परिगधिता
या कशीकेव जंगहे। ददाति मह्यं यादुरी याशूनां भोज्याश
ता॥ उपोप मे परा मृश मा मे दभ्राणि मन्यथाः॥ सर्वाहमस्मि
रोमशा गंधारीणामिवाविका॥११॥ ॥अग्निं होतारं मन्ये
दास्वंतं वसुं सूनुं सहसो जातवेदसं विप्रं न जातवेदसं॥ य ऊ
र्ध्वया स्वध्वरो देवो देवाच्या कृपा॥ घृतस्य विभ्राष्टि म
नु वष्टि शोचिषाजुह्वानस्य सर्पिषः॥ यजिष्ठं त्वा यजमा
ना हुवेम ज्येष्ठमंगिरसां विप्र मन्मभिर्विप्रेभिः शुक्र मन्म
भिः॥ परिज्मानमिव द्यां होतारं चर्षणीनां॥ शोचिष्केशं वृष

द्वि०सं०२

॥८॥ सहंतमः शुष्मिंतमो जायसे देवतातये रयिर्न देवतातये॥ शु
ष्मिंतमो हि ते मदो द्युम्निंतम उत क्रतुः॥ अध स्मा ते परि च
रंत्यजर श्रुष्टीवानो नाजर॥ प्र वो महे सहसा सहस्वत उष
र्बुधे पशुषे नाग्नये स्तोमो बभूत्वग्नये॥ प्रति यदीं हविष्मा
न्विश्वासु क्षासु जोगुवे। अग्रे रेभो न जरत ऋषूणां जूर्णि
र्होत ऋषूणां॥ स नो नेदिष्ठं ददृशान आ भराग्ने देवेभिः
सचनाः सुचेतुना महो रायः सुचेतुना॥ महि शविष्ठ नस्कृ
धि संचक्षे भुजे अस्यै॥ महि स्तोतृभ्यो मघवन्सुवीर्यं ॥८॥
मथीरुग्रो न शवसा॥१३॥ ॥अयं जायत मनुषो धरीमणि राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

५ हिता यदीं कीस्ता सो अभिद्यवो नमस्यं त उपबोधंत भगवो मधूनं तो हस्राभ ५ गवः॥
क्षुशमेनसूनवे॥ भक्तमभक्तमवो व्यंतो अजरा अग्नयो व्यंतो
अजराः॥१२॥ ॥ सहि द्युतो नमारतंतु विष्वणि रप्नस्वती
षूर्वरास्विष्टनि स्वर्तनास्विष्टनिः॥ आदस्य व्यान्यो द्यर्यं जस्य
व केतुरर्हणा॥ अध स्मास्य हर्षतो हृषीवतो विश्वे जुषंत पंथां नरः तो
रे शुभे नपंथां॥ अग्निर्होवसूनां शुचिर्यो धर्णिरेषां॥ प्रियां अ
पिधी वैनिषीष्ट मेधिर आ वनिष्ट मेधिरः॥ विश्वासां त्वा वि
शांपतिं हवामहे सर्वासां समानं दंपतिं भुजे सत्य गिर्वाहसं
भुजे॥ अतिथिं मानुषाणां पितुर्न यस्यासया॥ अमी च वि
श्वे अमृतास आवयो हव्या देवेष्वा वयः॥ त्वमग्ने सहसा

होतायजिष्ठ उशिजामनुव्रतमग्निस्व मनुव्रतं॥ विश्वश्रुष्टिः स
खीयते रयिरिव श्रवस्यते॥ अदब्धो होता नि षदद्दिळस्पदे परि ळ२
वीत इळस्पदे॥ तं यज्ञसाधमपि वातयामस्यृतस्य पथा नमसा म२
हविष्मता देवताता हविष्मता॥ स न ऊर्जामुपाभृत्ययाकृपा
न जूर्यति॥ यं मातरिश्वा मनवे परावतो देवं भाः परावतः॥ ए
वेनसद्यः पर्येति पार्थिवं मुहुर्गी रेतो वृषभः कनिक्रदद्दधद्रे
तः कनिक्रदत्॥ शतं चक्षाणो अक्षभिर्देवो वनेषु तुर्वणिः॥
सदो दधान उपरेषु सानुष्वग्निः परेषु सानुषु॥ स सुक्रतुः पु
रोहितो दमेदमेऽग्निर्यज्ञस्याध्वरस्य चेतति क्रत्वा यज्ञस्य चेत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दि० सं० २

॥१॥ ति॥ क्रत्वा वेधा इषूयते विश्वा जातानि पस्पशे॥ यतो घृतश्री
रतिथिरजायत वह्निर्वेधा अजायत॥ क्रत्वा यदस्य तविषीषु पृं
चतेऽग्नेरवेण मरुतां न भोज्येषिराय न भोज्या॥ स हि ष्मा दानमि
न्वति वसूनां च मज्मना॥ स नस्त्रासते दुरितादभिह्रुतः शंसा
दघादभिह्रुतः॥१४॥ ॥विश्वो विहाया अरतिर्व सुर्दधे ह
स्ते दक्षिणे तरणिर्न शिश्रथच्छ्रवस्यया न शिश्रथत्॥ विश्व
स्मा इदिषुध्यते देवत्रा हव्यमोहिषे॥ विश्वस्मा इत्सुकृते वा
रमृण्वत्यग्निर्द्वारा व्यृण्वति॥ स मानुषे वृजने शंतमो हि ॥२॥
तोऽग्निर्यज्ञेषु जेन्यो न विश्पतिः प्रियो यज्ञेषु विश्पतिः॥ स ह राम

व्या मानुषाणामिळा कृतानि पत्यते॥ स नस्त्रासते वरुणस्य धू
र्तेर्महो देवस्य धूर्तेः॥ अग्निं होतारमीळते वसुधितिं प्रियं चे २
तिष्ठमरतिं न्येरिरे हव्यवाहं न्येरिरे॥ विश्वायुं विश्ववेदसं हो
तारं यजतं कविं॥ देवासो रण्वमवसे वसूयवो गीर्भी रण्वं वसू
यवः॥१५॥ ॥यं त्वं रथमिंद्र मेध सातयेऽपाका संतमिषिर प्रणयसि मि
प्रानवद्य नयसि॥ सद्यश्चित्तमभिष्टये करो वशश्च वा
तूतुजान जिनं॥ सोऽस्माकमनवद्य वेधसामिमां वाचं न वेधसां॥ स
श्रुधि यः स्मा पृतनासु कासु चिद्दक्षाय्य इंद्र भरहूतये नृभि
रसि प्रतूर्तये नृभिः॥ यः शूरैः स्वः सनिता यो विप्रैर्वाजं तरु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऋ० सं० २

॥१०॥ ता ॥ तमीशानास इरधंत वाजिनं पृक्षमत्यं न वाजिनं ॥
दस्मो हि ष्मा वृषणं पिन्वसि त्वचं कं चिद्यावीरररुं शूर म
र्त्यं परिवृणक्षि मर्त्यं ॥ इंद्रोत तुभ्यं तद्दिवे तद्रुद्राय स्वयश
से ॥ मित्राय वोचं वरुणाय सप्रथः सुमृळीकाय सप्रथः ॥ अ
स्माकं व इंद्रमुश्मसीष्टये सखायं विश्वायुं प्रासहं युजं वा
जेषु प्रासहं युजं ॥ अस्माकं ब्रह्मोतयेऽवा पृत्सु कासु चित् ॥
नहि त्वा शत्रुः स्तरते स्तृणोषि यं विश्वं शत्रुं स्तृणोषि यं ॥
नि षू नमातिमतिं कयस्य चित्तेजिष्ठाभिररणिभिर्नोतिभि ॥१०॥
रुग्राभिरुग्रोतिभिः ॥ नेषि णो यथा पुरानेनाः शूर मन्यसे ॥

विश्वानि पूरोरप पर्षि वह्निरासा वह्निर्नो अच्छ ॥१६॥ ॥ प्र त
द्वोचेयं भव्यायेंदवे हव्यो न य इषवान्मन्म रेजति रक्षोहा म
न्म रेजति ॥ स्वयं सो अस्मदा निदो वधैरजेत दुर्मतिं ॥ अव
स्रवेदघशंसोऽवतरमव क्षुद्रमिव स्रवेत् ॥ वनेम तद्धोत्रया
चि तंत्या वनेम रयिं रयिवः सुवीर्यं रण्वं संतं सुवीर्यं ॥ दु
र्मन्मानं सुमंतुभिरेमिषा पृचीमहि ॥ आ सत्याभिरिं
द्रं द्युम्नहूतिभिर्यजत्रं द्युम्नहूतिभिः ॥ प्रप्रा वो अस्मे
स्वयशोभिरूती परिवर्ग इंद्रो दुर्मतीनां दरीमन्दुर्मतीनां ॥
स्वयं सा रिषयध्यै या न उपेषे अत्रैः ॥ हतेमसन्न वक्षति क्षि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्वि॰ सं॰ २

॥११॥ प्राजुर्णिर्न वक्षति॥ त्वं न इंद्र राया परीणसा याहि पथाँ अने
हसा पुरो याह्यरक्षसा॥ सचस्व नः पराक ऽआ सचस्वास्त
मीक ऽआ॥ पाहि नो दूरादारादभिष्टिभिः सदा पाह्यभिष्टिभिः॥
त्वं न इंद्र राया तरूषसोग्रं चित्त्वा महिमा सक्षदवसे महे मित्रं स ४
नावसे॥ ओजिष्ठ त्रातरविता रथं कं चिदमर्त्य॥ अन्यमस्म
द्रिरिषेः कं चिदद्रिवो रिरिक्षंतं चिदद्रिवः॥ पाहि न इंद्र सुष्टु
त स्रिधोवयाता सदमिद्दुर्मतीनां देवः संदुर्मतीनां॥ हंता पा
पस्य रक्षसस्त्राता विप्रस्य मावतः॥ अधा हि त्वा जनिता जी
जनद्वसो रक्षोहणं त्वा जीजनद्वसो॥ १७॥ ॥ एंद्र याह्युप नः॥११॥
परावतो नायमच्छा विदथानीव सत्पतिरस्तं राजेव सत्पतिः॥ राम

हितं गुहानि

स्वामहे त्वा वयं प्रयस्वंतः सुते सचा॥ पुत्रासो न पितरं वाजसा
तये मंहिष्ठं वाजसातये॥ पिबा सोममिंद्र सुवानमद्रिभिः कोशे
न सिक्तमवतं न वंसगस्तातृषाणो न वंसगः॥ मदाय हर्यता
य ते तुविष्टमाय धायसे॥ आ त्वा यच्छंतु हरितो न सूर्यमहा
विश्वेव सूर्यं॥ अविंदद्दिवो निधिं वेर्न गर्भं परिवीतमश्मन्य
नंते अंतरश्मनि॥ व्रजं वज्री गवामिव सिषासन्नंगिरस्तमः॥
अपावृणोदिष इंद्रः परीवृता द्वार इषः परीवृताः॥ दादृहाणो व
ज्रमिंद्रो गभस्त्योः क्षद्मेव तिग्ममसनाय संश्यदहिहत्या
य संश्यत्॥ संविव्यान ओजसा शवोभिरिंद्र मज्मना॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१२॥ तष्टेव वृक्षं वनिनो नि वृश्चसि परश्वेव नि वृश्चसि ॥ त्वं वृ
था नद्य इंद्र सर्तवेऽच्छा समुद्रमसृजो रथाँ इव वाजयतो र
थाँ इव ॥ इत ऊतीरयुंजत समानमर्थमक्षितं ॥ धेनूरिव म
नवे विश्वदोहसो जनाय विश्वदोहसः ॥१८॥ ॥इमां ते वा
चं वसूयंत आयवो रथं न धीरः स्वपा अतक्षिषुः सुम्ना य
य त्वामतक्षिषुः ॥ शुंभंतो जेन्यं यथा वाजेषु विप्र वाजिनं ॥
अत्यमिव शवसे सातये धना विश्वा धनानि सातये ॥ भि
नत्पुरो नवतिमिंद्र पूरवे दिवोदासाय महि दाशुषे नृतो वज्रे ॥१२॥
ण दाशुषे नृतो ॥ अतिथिग्वाय शंबरं गिरेरुग्रो अवा राम
वे२२२

भरत् ॥ महो धनानि दयमान ओजसा विश्वा धनान्योजसा ॥ इं
द्रः समत्सु यजमानमार्यं प्रावद्विश्वेषु शतमूतिराजि
षु स्वर्मीळ्हेष्वाजिषु ॥ मनवे शासदव्रतान्त्वचं कृष्णामरंधयत् ॥
दक्षन्न विश्वं ततृषाणमोषति न्यर्शसानमोषति ॥ सूरश्चक्रं
प्र वृहज्जात ओजसा प्रपित्वे वाचमरुणो मुषायतीशान आ मुषा
यति ॥ उशना यत्परावतोऽजगन्नूतये कवे ॥ सुम्नानि विश्वा मनु
व षेव तुर्वणिरह्ना विश्वेव तुर्वणिः ॥ स नो नव्येभिर्वृषकर्मन्नुक्थैः
पुरां दर्तः पायुभिः पाहि शग्मैः ॥ दिवोदासेभिरिंद्र स्तवानो वा
वृधीथा अहोभिरिव द्यौः ॥१९॥ ॥इंद्राय हि द्यौरसुरो अनम्न

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्वि० सं० २ इंद्रं विश्वे सजोषसो देवासो दधिरे पुरः॥ १

॥१२॥ न्नतेंद्राय मही पृथिवी वरीमभिर्द्युम्नसाता वरीमभिः॥ इंद्राय
विश्वा सवनानि मानुषा राता नि संतु मानुषा॥ विश्वेषु हि त्वा सव
नेषु तुंजते समानमेकं वृषमण्यवः पृथक्स्वः सनिष्यवः पृथ
क्॥ तं त्वा नावं न पर्षणिं शूषस्य धुरि धीमहि॥ इंद्रं न यज्ञैश्चि
तयंत आयवः स्तोमेभिरिंद्रमायवः॥ वि त्वा ततस्रे मिथुना अव
स्यवो व्रजस्य साता गव्यस्य निःसृजः सक्षंत इंद्र निःसृजः॥ यद्गव्यंता
द्वा जना स्वर्यंता समूहसि॥ आविष्करिक्रद्वृषणं सचाभुवं वज्र
मिंद्र सचाभुवं॥ विदुष्टे अस्य वीर्यस्य पूरवः पुरो यदिंद्र शारदी ॥१३॥
रवातिरः सासहानो अवातिरः॥ शासस्तमिंद्र मर्त्यमयज्युं शव राम

ष्ठाः १

सस्पते॥ महीममु पृथिवीमिमा अपो मंदसान इमा अपः॥
आदित्ते अस्य वीर्यस्य चर्किरन्मदेषु वृषन्नुशिजो यदाविथ सखी
यतो यदाविथ॥ चकर्थ कारमेभ्यः पृतनासु प्रवंतवे॥ ते अन्याम
न्यां नद्यं सनिष्णत श्रवस्यंतः सनिष्णत॥ उतो नो अस्या उषसो
जुषेत ह्य१र्कस्य बोधि हविषो हवीमभिः स्वर्षाता हवीमभिः॥
यदिंद्र हंतवे मृधो वृषा वज्रिं चिकेतसि॥ आ मे अस्य वेधसो नवी
यसो मन्म श्रुधि नवीयसः॥ त्वं तमिंद्र वावृधानो अस्मयुरमित्र
यंतं तुविजात मर्त्यं वज्रेण शूर मर्त्यं॥ जहि यो नो अघायति शृणु
ष्व सुश्रवस्तमः॥ रिष्टं न यामन्नप भूतु दुर्मतिर्विश्वाप भूतु दुर्मतिः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्वि०सं०२

॥१४॥ ॥२०॥ त्वया वयं मघवन्पूर्व्ये धन इंद्रत्वोताः सासह्याम पृतन्य
तो वनुयाम वनुष्यतः॥ नेदिष्ठे अस्मिन्नहन्यधि वोचा नु सु
न्वते॥ अस्मिन्यज्ञे वि चयेमा भरे कृतं वाजयंतो भरे कृतं॥ स्व
र्जेषे भर आप्रस्य वक्मन्युषर्बुधः स्वस्मिन्नंजसि क्राणस्य
स्वस्मिन्नंजसि॥ अहन्निंद्रो यथा विदे शीर्ष्णाशीर्ष्णोपवा
च्यः॥ अस्मत्रा ते सध्र्यक्सन्तु रातयो भद्रा भद्रस्य रातयः॥
तत्तु प्रयः प्रत्नथा ते शुशुक्वनं यस्मिन्यज्ञे वारमकृण्वत क्ष
यमृतस्य वारसि क्षयं॥ वि तद्वोचेरध द्वितांतः पश्यंति रश्मि ॥१४॥
भिः॥ स घा विदे अन्विंद्रो गवेषणो बंधुक्षिद्भ्यो गवेषणः॥ राम

नू इत्था ते पूर्वथा च प्रवाच्यं यदंगिरोभ्योऽवृणोरप व्रजमिंद्र शि
क्षन्नप व्रजं॥ ऐभिः समान्या दिशास्मभ्यं जेषि योत्सि च॥ सुन्व
द्भ्यो रंधया कं चिदव्रतं हृणायंतं चिदव्रतं॥ सं यज्जनान्क्रतुभिः शू
र ईक्षयद्धने हिते तरुषंत श्रवस्यवः प्र यक्षंत श्रवस्यवः॥ तस्मा
आयुः प्रजावदिद्बाधे अर्चंत्योजसा॥ इंद्र ओक्यं दिधिषंत धीतयो त५
देवाँ अच्छा न धीतयः॥ युवं तमिंद्रापर्वता पुरोयुधा यो नः पृत
न्यादप तंतमिद्धतं वज्रेण तंतमिद्धतं॥ दूरे चत्ताय च्छंत्सद्गहनं
यदिनक्षत्॥ अस्माकं शत्रून्परि शूर विश्वतो दर्मा दर्षीष्ट विश्वतः॥
॥२१॥ ॥उभे पुनामि रोदसी ऋतेन द्रुहो दहामि सं महीरनिंद्राः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्वि० सं० २

॥१५॥ अभिव्लग्य यत्र हता अमित्रा वैलस्थानं परि तृळ्हा अशेरन् ॥
अभिव्लग्या चिदद्रिवः शीर्षा यातुमतीनां ॥ छिंधि वटूरिणा पदा
महावटूरिणा पदा ॥ अवासां मघवंजहि शर्धो यातुमतीनां ॥
वैलस्थानके अर्मके महावैलस्थे अर्मके ॥ यासां तिस्रः पंचाश
तो अभिव्लंगैरपावपः ॥ तत्सु ते मनायति तकत्सु ते मनायति ॥ पि
शंगभृष्टिमंभृणं पिशाचिमिंद्र संमृण ॥ सर्वं रक्षो निबर्हय ॥
अवर्मह इंद्र दादृहि श्रुधी नः शुशोच हि द्यौः क्षा न भीषाँ अद्रिवो
घृणान्न भीषाँ अद्रिवः ॥ शुष्मिंतमो हि शुष्मिभिर्वधैरुग्रेभिरीय ॥१५॥
से ॥ अपूरुषघ्नो अप्रतीत शूर सत्वभिस्त्रिसप्तैः शूर सत्वभिः ॥ राम

भि २

वनोति हि सुन्वन्क्षयं परीणसः सुन्वानो हि ष्मा यजत्यव द्विषो
देवानामव द्विषः ॥ सुन्वान इत्सिषासति सहस्रा वाज्यवृतः ॥
सुन्वानायेंद्रो ददात्याभुवं रयिं ददात्याभुवं ॥२२॥ ॥
आ त्वा जुवो रारहाणा अभि प्रयो वायो वहंत्विह पूर्वपीतये
सोमस्य पूर्वपीतये ॥ ऊर्ध्वा ते अनु सूनृता मनस्तिष्ठतु जान
ती ॥ नियुत्वता रथेना याहि दावने वायो मखस्य दावने ॥ मं
दंतु त्वा मंदिनो वायविंदवोऽस्मत्क्राणाः सुकृता अभिद्यवो
गोभिः क्राणा अभिद्यवः ॥ यद्ध क्राणा इरध्यै दक्षं सचंत ऊत
यः ॥ सध्रीचीना नियुतो दावने धिय उप ब्रुवत ईं धियः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्वि० सं० २

॥१६॥ वायुर्युंक्ते रोहिता वायुररुणा वायू रथे अजिरा धुरि वोळ्ह
वे वहिष्ठा धुरि वोळ्हवे ॥ प्र बोधया पुरंधिं जार आ ससती
मिव ॥ प्र चक्षय रोदसी वासयोषसः श्रवसे वासयोषसः ॥ तु
भ्यमुषासः शुचयः परावति भद्रा वस्त्रा तन्वते दंसु रश्मिषु चि
त्रा नव्येषु रश्मिषु ॥ तुभ्यं धेनुः सबर्दुघा विश्वा वसूनि दुह
ते ॥ अजनयो वक्षणाभ्यो दिव आ वक्षणाभ्यः ॥ तुभ्यं शुक्रासः
मरुतो ४ शुचयस्तुरण्यवो मदेषूग्रा इषणंत भुर्वण्यपामिषंत भुर्व णंव
णि ॥ त्वां त्सारी दसमानो भगमीट्टे तक्ववीये ॥ त्वं विश्वस्माद्भु ॥१६॥
वनात्पासि धर्मणासुर्यात्पासि धर्मणा ॥ त्वं नो वायवेषाम एमे

पूर्व्यः सोमानां प्रथमः पीतिमर्हसि सुतानां पीतिमर्हसि ॥ उतो
विहुत्मतीनां विशां ववर्जुषीणां ॥ विश्वा इत्ते धेनवो दुह्र आ
शिरं घृतं दुह्रत आशिरं ॥२३॥ ॥ स्तीर्णं बर्हिरुप नो याहि
वीतये सहस्रेण नियुता नियुत्वते शतिनीभिर्नियुत्वते ॥ तु
भ्यं हि पूर्वपीतये देवा देवाय येमिरे ॥ प्र ते सुतासो मधुमंतो
अस्थिरन्मदाय क्रत्वे अस्थिरन् ॥ तुभ्यायं सोमः परिपू
तो अद्रिभिः स्पार्हा वसानः परि कोशमर्षति शुक्रा वसानो
अर्षति ॥ तवायं भाग आयुषु सोमो देवेषु हूयते ॥ वह वायो नि
युतो याह्यस्मयुर्जुषाणो याह्यस्मयुः ॥ आ नो नियुद्भिः

षु २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२ तवायंभाग ऋत्वियः सरश्मिः सूर्ये सचा॥ अध्वर्युभिर्भरमाणा अयंसत वायो २

द्वि॰ सं॰ २ शुक्रा अयंसत॥ आवां धियो नियुतां च क्ष द्दृ सु भिः प्रवां सु चि ये सुयितानि

२ वीतये वायो हव्यानि वीतये॥ रां पवलि २

॥७॥ आशतिनीभिरध्वरंसहस्रिणीभिरुपयाहिवीतयेवायोहव्या
निवीतये॥ पिबतंमध्वोअंधसःपूर्वपेयंहिवांहितं॥ वायवा
चंद्रेणराधसागतमिंद्रश्चराधसागतं॥ आवांधियोववृ
त्यरध्वरांउपेममिंदुंमर्मृजंतवाजिनमाशुमत्यंनवाजिनं॥
८ म तेषांपिबतमस्मयूआनोगंतमिहोत्या॥ इंद्रवायूसुतानां
मद्रिभिर्युवंमदाययवाजदायुवं॥२४॥ ॥इमेवांसोमाप्सु
स्वासुताइहाध्वर्युभिर्भरमाणाअयंसतवायोशुक्राअ
यंसत॥ एतेवामभ्यसृक्षततिरःपवित्रमाशवः॥ युवा ॥७॥
यवोतिरोमाण्यव्ययासोमासोअत्यव्यया॥ आतिवायोस राम

अं

तै२

सतोयाहिशश्वतोयत्रग्रावावदतितत्रगच्छतंगृहमिंद्रश्चगच्छतं॥
विसूनृतादद्दृशेरीयतेघृतमापूर्णयानियुतायाथोअध्वरमिंद्र
श्चयाथोअध्वरं॥ अत्राहतद्वहेथेमध्वआहुतिंयमश्वत्थमुप
तिष्ठंतजायवोस्मेतेसंतुजायवः॥ साकंगावःसुवतेपच्यतेय
वोनतेवायउपदस्यंतिधेनवोनापदस्यंतिधेनवः॥ इमेयेतेसु
वायोबाह्वोजसोंतर्नदीतेपतयंत्युक्षणोमहिव्राधंतउक्षणः॥
धन्वंचिद्येअनाशवोजीराश्चिदगिरौकसः॥ सूर्यस्येवरश्मय
योदुर्नियंतवोहस्तयोर्दुर्नियंतवः॥२५॥ ॥प्रसुज्येष्ठंनि
चिराभ्यांबृहन्नमोहव्यंमतिंभरतामृळयद्भ्यांस्वादिष्ठं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्वि॰सं॰२

॥१८॥ ळयज्ञं॥ ता सम्राजा घृतासुती यज्ञेयज्ञ उपस्तुता॥ अ
थैनोः क्षत्रं न कुतश्चनाधृषे देवत्वं नू चिदाधृषे॥ अदरि
गातुवित्तरो वरीयसी पथाऽऽ ऋतस्य समयंस्तर मिरश्मिर २
क्षुभगस्य रश्मिभिः॥ द्युक्षं मित्रस्य सादनमर्यम्णो व
रुणस्य च॥ अधा दधाते बृहदुक्थ्यं वय उपस्तुत्यं बृहद्
यः॥ ज्योतिष्मतीमदितिं धारयत्क्षितिं स्वर्वतीमा सचेते
दिवेदिवे जागृवांसा दिवेदिवे॥ ज्योतिष्मत्क्षत्रमाशा ते
आदित्या दानुनस्पती॥ मित्रस्तयोर्वरुणो यातयज्जनो ॥१८॥
ऽर्यमा यातयज्जनः॥ अयं मित्राय वरुणाय शंतमः सोमो भू राम
त

त्ववपानेष्वाभगो देवो देवेष्वाभगः॥ तं देवासो जुषेरत विश्वे अद्य
सजोषसः॥ तथा राजाना करथो यदीमह ऋतावाना यदीम
हे॥ यो मित्राय वरुणायाविधज्जनोऽनर्वाणं तं परि पातो अं ३
हसो दाश्वांसं मर्तमंहसः॥ तमर्यमाभिरक्षत्यृजूयंतमनु व्र
तं॥ उक्थैर्य एनोः परिभूषति व्रतं स्तोमैराभूषति व्रतं॥
नमो दिवे बृहते रोदसीभ्यां मित्राय वोचं वरुणाय मीळ्
हुषे सुमृळीकाय मीळ्हुषे॥ ज्योग्जीवंतः प्रजया सचेमा द
सोमस्योती सचेमहि॥ ऊती देवानां वयमिंद्रवंतो मंसीम
हि स्वयशसो मरुद्भिः॥ अग्निर्मित्रो वरुणः शर्म यंसंतद्
इदं भामग्निमुपस्तुहि द्युक्षमर्यम्णं भगं॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्वि॰सं॰२

॥१९॥ स्याम मघवानो वयं च ॥२८॥ ॥ इति द्वितीयाष्टके प्रथमोध्या
यः ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥
ॐ सुषुमा यातमद्रिभिर्गोश्रीता मत्सरा इमे सोमासो म
त्सरा इमे ॥ आ राजाना दिविस्पृशास्मत्रा गंतमुप नः ॥ इ
मे वां मित्रावरुणा गवाशिरः सोमाः शुक्रा गवाशिरः ॥
इम आ यातमिंदवः सोमासो दध्याशिरः सुतासो दध्या
शिरः ॥ उत वामुषसो बुधि साकं सूर्यस्य रश्मिभिः ॥ सु
तो मित्राय वरुणाय पीतये चारुर्ऋताय पीतये ॥ तां वां ॥१७॥
धेनुं न वासरीमंशुं दुहंत्यद्रिभिः सोमं दुहंत्यद्रिभिः ॥ अ राम

स्मत्रा गंतमुप नोर्वांचा सोमपीतये ॥ अयं वां मित्रावरुणा नृभिः सुतः सोम आ
पीतये सुतः ॥१॥ प्रप्र पूष्णस्तुविजातस्य शस्यते महित्वमस्य तवसो न तंदते
स्तोत्रमस्य न तंदते ॥ अर्चामि सुम्नयन्नहमंत्यूतिं मयोभुवं ॥ विश्वस्य यो मन
आयुयुवे मखो देव आयुयुवे मखः ॥ प्र हि त्वा पूषन्नजिरं न यामनि स्तोमेभिः
कृण्व ऋणवो यथा मृध उष्ट्रो न पीपरो मृधः ॥ हुवे यत्त्वा मयोभुवं देवं स ख्या
य मर्त्यः ॥ अस्माकमांगूषान्द्युम्निनस्कृधि वाजेषु द्युम्निनस्कृधि ॥ यस्य ते पू
षन्सख्ये विपन्यवः क्रत्वा चित्संतोवसा बुभुज्रिर इति क्रत्वा बुभुज्रिरे ॥ तामनु त्वा
नवीयसीं नियुतं राय ईमहे ॥ अहेळमान उरुशंस सरी भव वाजेवाजे सरी भव ॥
अस्या ऊ षु ण उप सातये भुवोहेळमानो ररिवां अजाश्व श्रवस्यतामजाश्व ॥ ओ
व षु त्वा वतीमहि स्तोमेभिर्दस्म साधु भिः ॥ नहि त्वा पूषन्नतिमन्य आघृणे न
ते सख्यमपह्नुवे ॥२॥ अस्तु श्रौषट् पुरो अग्निं धिया दध आ नु तच्छर्धो दिव्यं
वृणीमह इंद्रवायू वृणीमहे ॥ यद्ध क्राणा विवस्वति नाभा संदायि नव्यसी ॥ अध
व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्वि॰ सं॰ २

प्रसूनउपयंतु धीतयो देवांअच्छा न धीतयः॥ यद्धत्यन्मित्रावरुणावृतादध्याद
॥२०॥ दाथेअनृतंस्वेन मन्युना दक्षस्यस्वेन मन्युना॥ युवोरित्थाधिसद्मस्वपश्याम
२ हिरण्ययं॥ धीभिश्चन मनसा स्वेभिरक्षभिः सोमस्य स्वेभिरक्षभिः॥ युवांस्तोमेभि
र्देवयंतोअश्विनाश्रावयंतइव श्लोकमायवो युवांहव्याभ्यायवः॥ युवोर्विश्वाअ
धिश्रियः पृक्षश्चविश्ववेदसा॥ प्रुषायंतेवांपवयो हिरण्ययेरथेदस्रा हिरण्यये॥
अचेति दस्रा व्यू१ नाकमृण्वथो युंजतेवांरथयुजो दिविष्टि[illegible]ध्वस्मानो दिविष्टिषु॥ व ६
अधिवांस्थामवंधुरेरथेदस्रा हिरण्यये॥ पथेवयंतावनुशासता रजोंजसा शासता
रजः॥ शचीभिर्नः शचीवसू दिवानक्तंदशस्यतं॥ मावांरातिरुपदसत्कदाचनास्मद्रा
तिः कदाचन॥ ३॥ वृषन्निंद्र वृषपाणास इंदवइमेसुता अद्रिषुतास उद्भिदस्तुभ्यंसु
तासउद्भिदः॥ तेत्वामंदंतु दावने महे चित्राय राधसे॥ गीर्भिर्गिर्वाहस्तवमानआ
गहि सुमृळीको नआगहि॥ ओषूणोअग्ने शृणुहित्वमीळितो देवेभ्योब्रवसि॥२०॥
यज्ञियेभ्योराजभ्यो यज्ञियेभ्यः॥ यद्धत्यामंगिरोभ्यो धेनुंदेवाअदत्तन॥ वितांदु ६

॥ राम ॥

श्रीगुरु

ह्रेअर्यमाकर्तरीसचाँ एषतांवेदमेसचा॥ मोषुवोअस्मदभितानिपौंस्यासनाभू
वन्द्युम्नानिमोतजारिषुरस्मत्पुरोतजारिषुः॥ यद्वश्चित्रंयुगेयुगेनव्यंघोषादमर्त्यं॥
अस्मासुतन्मरुतोयच्चदुष्टरंदिधृतायच्चदुष्टरं॥ दध्यङ्हमेजनुषंपूर्वोअंगिराः
प्रियमेधः कण्वोअत्रिर्मनुर्विदुस्तेमेपूर्वेमनुर्विदुः॥ तेषांदेवेष्वायतिरस्माकंतेषु
नाभयः॥ तेषांपदेनमह्यानमेगिरेंद्राग्नीआनमेगिरा॥ होतायक्षद्वनिनोवंतवार्यं
बृहस्पतिर्यजतिवेनउक्षभिः पुरुवारेभिरुक्षभिः॥ जगृभ्मादूरआदिशंश्लोकम रं ६
द्रेरधत्मना॥ अधारयदररिंदानि सुक्रतुः पुरूसद्मानि सुक्रतुः॥ येदेवासो दिव्ये
कादशस्थपृथिव्यामध्येकादशस्थ॥ अप्सुक्षितोमहिनैकादशस्थतेदेवासो
यज्ञमिमंजुषध्वं॥ ४॥ वेदिषदेप्रियधामायसुद्युतेधासिमिवप्रभरायोनिमग्न रा
ये॥ वस्त्रेणेववासयामन्मनाशुचिंज्योतीरथंशुक्रवर्णंतमोहनं॥ अभिद्विजन्मा
त्रिवृदन्नमृज्यतेसंवत्सरेवावृधेजग्धमीपुनः॥ अन्यस्यासाजिह्वयाजेन्योन्या१ वृषा
न्येनवनिनोमृष्टवा रणः॥ कृष्णप्रुतौवेविजेअस्यसक्षिताउभातरेतेअभि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्वि० प० २

त

॥२१॥ मातरा शिशुं॥ आशाजिह्वं ध्वसयंतं त्विषुच्युतमा साच्यं कुपयं वर्द्धनं पितुः॥ मु
मुक्ष्वो३ मनवे मानवस्यते रघुद्रुवः कृष्णसीतास ऊजुवः॥ असमना अजिरासो
रघुष्यदो वातजूता उप युज्यंत आशवः॥ आदस्य ते ध्वसयंतो वृथेरते कृष्णमभ्वं
महि वर्पः करिक्रतः॥ यत्सीं महीमवनिं प्राभि मर्मृशदभिश्वसन्स्तनयन्नेति ना
नदत्॥५॥ भूषन्न यो ऽधि बभ्रूषु नम्नते वृषेव पत्नीरभ्येति रोरुवत्॥ ओजाय
मानस्तन्वश्च शुंभते भीमो न शृंगा दविधाव दुर्गृभिः॥ स संस्तिरो विष्टिरः सं गृभा
यति जानन्नेव जानतीर्नित्य आशये॥ पुनर्वर्द्धंते अपि यंति देव्यमन्यद्वर्पः पित्रोः
कृण्वते सचा॥ तमग्रुवः केशिनीः सं हि रेभिर ऊर्ध्वास्तस्थुर्मम्रुषीः प्रायवे पु
नः॥ तासां जरां प्रमुंचन्नेति नानदद्वसुं परं जनयंजीवमस्तृतं॥ अधीवासं परि
मातू रिहन्नह तुविग्रेभिः सत्वभिर्याति वि ज्रयः॥ वयो दधत्पद्वते रेरिहत्सदा
नु श्येनी सचते वर्तनीरह॥ अस्माकमग्ने मघवत्सु दीदिह्यध श्वसीवान्वृष ॥२१॥
भो दमूनाः॥ अवास्या शिशुमतीरदीदेर्वर्मेव युत्सु परिजर्भुराणः॥६॥ इदम ॥राम॥

राम

वह्निरर्कैः साम्राज्याय प्रतरं दधानः॥ अमी च ये मघवानो वयं च मिहं न सूरो अ
नि ति निष्टतन्युः॥९॥ समिद्धो अग्न आवह देवाँ अद्य यतस्रुचे॥ तंतुं तनुष्व पूर्व्यं सु
तसोमाय दाशुषे॥ घृतवंतमुप मासि मधुमंतं तनूनपात्॥ यज्ञं विप्रस्य मावत
तनू नः शशमानस्य दाशुषः॥ शुचिः पावको अद्भुतो मध्वा यज्ञं मिमिक्षति॥ नराशं
सस्त्रिरा दिवो देवो देवेषु यज्ञियः॥ ईळितो अग्न आवहेंद्रं चित्रमिह प्रियं॥ इ
यं हि त्वा मतिर्ममाच्छा सुजिह्व वच्यते॥ स्तृणानासो यतस्रुचो बर्हिर्यज्ञे स्वध्व
रे॥ वृंजे देवव्यचस्तममिंद्राय शर्म सप्रथः॥ वि श्रयंतामृतावृधः प्रयै देवे
भ्यो महीः॥ पावकासः पुरुस्पृहो द्वारो देवीरसश्चतः॥१०॥ आ भंदमाने उपा
के नक्तोषासा सुपेशसा॥ यह्वी ऋतस्य मातरा सीदतां बर्हिरा सुमत्॥ मंद्र
जिह्वा जुगुर्वणी होतारा दैव्या कवी॥ यज्ञं नो यक्षतामिमं सिध्रमद्य दिवि
स्पृशं॥ शुचिर्देवेष्वर्पिता होत्रा मरुत्सु भारती॥ इळा सरस्वती मही बर्हिः
सीदंतु यज्ञियाः॥ तन्नस्तुरीपमद्भुतं पुरु वारं पुरु त्मना॥ त्वष्टा पोषाय वि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हि० सं०२

॥२३॥ ऋतुरायेनाभानोऽस्य पुः॥अवसृजन्नुँप त्मनादेवान्यक्षिवनस्पते॥अग्नि
र्हव्यासुषूदतिदेवोदेवेषुमेधिरः॥पूषण्वतेमरुत्वतेविश्वदेवायवायवे॥स्वा
हागायत्रवेपसेहव्यमिंद्रायकर्तन॥स्वाहाकृतान्यागह्युपहव्यानिवीतये॥
इंद्रागहिश्रुधीहवंत्वांहवंतेअध्वरे॥११॥प्रतव्यसींनव्यसींधीतिमग्न
येवाचोमतिंसहसःसूनवेभरे॥अपांनपाद्योवसुभिःसहप्रियोहोतापृथि
व्यांन्यसीददृत्वियः॥सजायमानःपरमेव्योमन्याविरग्निरभवन्मात
रिश्वने॥अस्यक्रत्वासमिधानस्यमज्मनाप्रद्यावाशोचिःपृथिवीअरोच व
त॥अस्यत्वेषाअजराअस्यभानवःसुसंदृशःसुप्रतीकस्यसुद्युतः॥भा
त्वक्षसोअत्यक्तुर्नसिंधवोऽग्नेरेजंतेअससंतोअजराः॥यमेरिरेभृगवो
विश्ववेदसंनाभापृथिव्याभुवनस्यमज्मना॥अग्निंतंगीर्भिर्हिनुहिस्व
आदमेयएकोवस्वोवरुणोनराजति॥नयोवरायमरुतामिवस्वनःसेनेव ॥२३॥
सृष्टादिव्यायथाशनिः॥अग्निर्जंभैस्तिगितैरत्तिभर्वतियोधोनशत्रून्स राम

वनान्यृंजते॥कुविन्नोअग्निरुचथस्यवीरसद्वसुष्कुविद्वसुभिःकाममावर
त्॥चोदःकुवित्तुतुज्यात्सातयेधियःशुचिप्रतीकंतमयाधियागृणे॥घृ ग२
तप्रतीकंवऋतस्यधूर्षदमग्निंमित्रंनसमिधानऋंजते॥इंधानोअक्रो न३
विदथेषुदीद्यच्छुक्रवर्णामुदुनोयंसतेधियं॥अप्रयुच्छन्नप्रयुच्छद्भिर
ग्नेशिवेभिर्नःपायुभिःपाहिशग्मैः॥अदब्धेभिरदृपितेभिरिष्टेनिमि
षद्भिःपरिपाहिनोजाः॥१२॥एतिप्रहोताव्रतमस्यमाययोर्ध्वांदधानः
शुचिपेशसंधियं॥अभिस्रुचःक्रमतेदक्षिणावृतोयाअस्यधामप्रथ
मंहनिंसते॥अभीमृतस्यदोहनाअनूषतयोनौदेवस्यसदनेपरीवृ
ताः॥अपामुपस्थेविभृतोयदावसदधस्वधाअधयद्याभिरीयते॥युयू
षतःसवयसातदिद्वपुःसमानमर्थंवितरित्रतामिथः॥आदींभगोनह

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्त

व्यः समस्मदावोळ्हुर्नरश्मीन्त्समयंस्त सारथिः।। यमीं द्वा सवयसा सपर्यतः समा
।।२४।। नेयोना मिथुना समोकसा।। दिवा न नक्तं पलितो युवाजनि पुरू चरन्नजरो मा
नुषा युगा।। तमीं हिन्वंति धीतयो दश व्रिशो देवं मर्तास ऊतये हवामहे।। धनो
रधि प्रवत आ स ऋण्वत्यभिव्रजद्भिर्वयुना नवाधित।। त्वं ह्यग्ने दिव्यस्य
राजसि त्वं पार्थिवस्य पशुपा इव त्मना।। एनी त एते बृहती अभिश्रिया हि
रण्ययी वक्वरी बर्हिराशाते।। अग्ने जुषस्व प्रति हर्य तद्वचो मंद्र स्वधाव ऋत
जात सुक्रतो यो विश्वतः प्रत्यङ्ङसि दर्शतो रण्वः संदृष्टौ पितुमां इव क्षयः।।
।।१३।। तं पृच्छता स जगामा स वेद स चिकित्वां ईयते सान्वीयते।। तस्मिंत्संति
प्रशिषस्तस्मिन्निष्टयः स वाजस्य शवसः शुष्मिणस्पतिः।। तमित्पृच्छंति न ।।२४।।
सिमो वि पृच्छति स्वेनेव धीरो मनसा यदग्रभीत्।। न मृष्यते प्रथमं नापरं राम

वचोस्य क्रत्वा सचते अप्रदृपितः।। तमिद्गच्छंति जुह्वस्तमर्वतीर्विश्वान्येकः
शृणवद्वचांसि मे।। पुरुप्रैषस्ततुरिर्यज्ञसाधनोच्छिद्रोतिः शिशुरादत्त संरभः।।
उपस्थायं चरति यत्समारत सद्यो जातस्तत्सार युज्येभिः।। अभि श्वांतं मृशा स्तं २
ते नांद्ये मुदे यदीं गच्छंत्युशतीरपिष्ठितं।। स ईं मृगो अप्यो वनर्गुरुप त्वच्यु
पमस्यां नि धायि व्यब्रवीद्वयुना मर्त्येभ्योग्निर्विद्वां ऋतचिद्धि सत्यः।।१४।।
त्रिमूर्धानं सप्तरश्मिं गृणीषेनूनमग्निं पित्रोरुपस्थे।। निषत्तमस्य चरतो
ध्रुवस्य विश्वा दिवो रोचनापप्रिवांसं।। उक्षा महां अभि ववक्ष एने अजर
स्तस्थावितऊतिरृष्वः।। उर्व्याः पदो नि दधाति सानौ रिहंत्यूधो अरुषासो
अस्य।। समानं वत्समभि संचरंती विष्वग्धेनू वि चरतः सुमेके।। अनपवृ
ज्यां अध्वनो मिमाने विश्वान्केतां अधि महो दधाने।। धीरासः पदं कवयो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्वि॰सं॰२

नो

॥२५॥ नयंतिनानाहृदारक्षमाणाअजुर्यं॥ सिषासंतःपर्यपश्यंतसिंधुमाविरे
भ्योअभवत्सूर्योनॄन्॥ दिदृक्षेण्यःपरिकाष्ठासुजेन्यईळेन्योमहोअर्भा
यजीवसे॥ पुरुत्रायदभवत्सूरहैभ्योगर्भेभ्योमघवाविश्वदर्शतः॥ २५॥
कथातेअग्नेशुचयंतआयोर्ददाशुर्वाजेभिराशुषाणाः॥ उभेयत्तोकेतन
येदधानाऋतस्यसामन्रणयंतदेवाः॥ बोधामेअस्यवचसोयविष्ठमं
हिष्ठस्यप्रभृतस्यस्वधावः॥ पीयतित्वोअनुत्वोगृणातिवंदारुस्तेतन्वंवंदे
अग्ने॥ येपायवोमामतेयंतेअग्नेपश्यंतोअंधंदुरितादरक्षन्॥ ररक्षतां
सुकृतोविश्ववेदादिप्संतइद्रिपवोनाहदेभुः॥ योनोअग्नेररिवाँअघा
युरातीवामर्चयतिद्वयेन॥ मंत्रोगुरुःपुनरस्तुसोअस्माअनुमृक्षीष्टत ॥२५॥
न्वंदुरुक्तैः॥ उतवायःसहस्यप्रविद्वान्मर्तोमर्तंमर्चयतिद्वयेन॥ अतःपा राम

व१

स्कुवं१ हिस्तवमानस्तुवंतमग्नेमाकिर्नोदुरितायधायीः॥ २६॥ मथीद्यदींविष्टोमात
रिश्वाहोतारंविश्वाप्सुंविश्वदेव्यं॥ नियंदधुर्मनुष्यासुविक्षुस्वर्णचि
त्रंवपुषेविभावं॥ ददानमिन्नददभंतमन्माग्निर्वरूथंममतस्यचाकन्॥ जुष
तविश्वान्यस्यकर्मोपस्तुतिंभरमाणस्यकारोः॥ नित्येचिन्नुयंसदनेजगृभ्रे
प्रशस्तिभिर्दधिरेयज्ञियासः॥ प्रसूनयंतगृभयंतइष्टावश्वासोनरथ्या
रारहाणाः॥ पुरूणिदस्मोनिरिणातिजंभैराद्रोचतेवनआविभावा॥ आदस्य
वातोअनुवातिशोचिरस्तुर्नशर्यामसनामनुद्यून्॥ नयंरिपवोनरिषण्यवो
गर्भेसंतंरेषणारेषयंति॥ अंधाअपश्यानदभन्नभिख्यानित्यासईंप्रेता
रोअरक्षन्॥ २७॥ महःसरायएषतेपतिर्दन्निनइनस्यवसुनःपदआ॥
उपध्रजंतमद्रयोविधन्नित्॥ सयोवृषानरांनरोदस्योःश्रवोभिरस्तिजीवपी जी॰

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥२६॥ तसर्गः॥ प्र यः सस्राणः शिश्रीत योनौ॥ आ यः पुरं नार्मिणीमदीदेदत्यः क
विर्नभन्यो३ नार्वा॥ सूरो न रुरुक्वाञ्छतात्मा॥ अभि द्विजन्मा त्री रोचनानि
विश्वा रजांसि शुशुचानो अस्थात्॥ होता यजिष्ठो अपां सधस्थे॥ अयं स होता
यो द्विजन्मा विश्वा दधे वार्याणि श्रवस्या॥ मर्तो यो अस्मै सुतुको ददाश॥
॥१८॥ पुरु त्वा दाश्वान्वोचेऽरिरग्ने तव स्विदा॥ तोदस्येव शरण आ महस्य॥ व्य
निनस्य धनिनः प्रहोषे चिदररुषः॥ कदा चन प्रजिगतो अदेवयोः॥ स चन्द्रो वि न ६
प्र मर्त्यो महो व्राधन्तमो दिवि॥ प्रप्रेत्ते अग्ने वनुषः स्याम॥१९॥ मित्रं न यं
शिम्या गोषु गव्यवः स्वाध्यो विदथे अप्सु जीजनन्॥ अरेजेतां रोदसी पा ॥२६॥
जसा गिरा प्रति प्रियं यजतं जनुषामवः॥ यद्ध त्यद्वां पुरुमीळ्हस्य सोमि
नः प्र मित्रासो न दधिरे स्वाभुवः॥ अध क्रतुं विदतं गातुमर्चत उत श्रुतं वृ राम

न१

षणा पस्त्यावतः॥ आ वां भूषन्क्षितयो जन्म रोदस्योः प्रवाच्यं वृषणा दक्षसे म
हे॥ यदीमृताय भरथो यदर्वते प्र होत्रया शिम्या वीथो अध्वरं॥ प्र सा क्षितिर
यो सुर या महि प्रिय ऋतावानावृतमा घोषथो बृहत्॥ युवं दिवो बृहतो दक्षमाभु
वं गां न धुर्युप युञ्जाथे अपः॥ मही अत्र महिना वारमृण्वथोऽरेणवस्तुज आ
सद्मन्धेनवः॥ स्वरन्ति ता उपरताति सूर्यमा निम्रुच उषसस्तक्ववीरिव॥२०॥
आ वामृताय केशिनीरनूषत मित्र यत्र वरुणा गातुमर्चथः॥ अव त्मना सृजतं
पिन्वतं धियो युवं विप्रस्य मन्मनामिरज्यथः॥ यो वां यज्ञैः शशमानो ह दाश
ति कविर्होता यजति मन्मसाधनः॥ उपाह तं गच्छथो वीथो अध्वरमच्छा गिरः
सुमतिं गन्तमस्मयू॥ युवां यज्ञैः प्रथमा गोभिरञ्जत ऋतावाना मनसो न प्रयु
क्तिषु॥ भरन्ति वां मन्मना संयता गिरोऽदृप्यता मनसा रेवदाशाथे॥ रेवद्वयो दधा
थे रेवदाशाथे नरा मायाभिरितऊति माहिनं॥ न वां द्यावोऽहभिर्नोत सिन्धवो न

वां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्वि० सं० २

॥२७॥ देवत्वं पणयो नानशुर्मघं ॥२१॥ युवं वस्त्राणि पीवसा वसाथे युवोरच्छिद्रा मं
तवो ह सर्गाः ॥ अवातिरतमनृतानि विश्व ऋतेन मित्रावरुणा सचेथे ॥ एत
च्चन त्वो वि चिकेतदेषां सत्यो मंत्रः कविशस्त ऋघावान् ॥ त्रिरश्रिं हंति चतुरस्त्रि
रुग्रो देवनिदो ह प्रथमा अजूर्यन् ॥ अपादेति प्रथमा पद्वतीनां कस्तद्वां मित्राव
२ रुणा चिकेत ॥ गर्भो भारं भरत्या चिदस्य ऋतं पिपर्त्यनृतं नि तारीत् ॥ प्रयंत
मित्परि जारं कनीनां पश्यामसि नोपनिपद्यमानं ॥ अनवपृग्णा वितता वसा
नं प्रियं मित्रस्य वरुणस्य धाम ॥ अनश्वो जातो अनभीशुरर्वा कनिक्रदत्पत
यदूर्ध्वसानुः ॥ अचित्तं ब्रह्म जुजुषुर्युवानः प्र मित्रे धाम वरुणे गृणंतः ॥ आ
धेनवो मामतेयमवंतीर्ब्रह्मप्रियं पीपयन्त्सस्मिन्नूधन् ॥ पित्वो भिक्षेत वयुनानि
विद्वानासाविवासन्नदितिमुरुष्येत् ॥ आ वां मित्रावरुणा हव्यजुष्टिं नमसा देवाव ॥२७॥
वसा ववृत्यां ॥ अस्माकं ब्रह्म पृतनासु सह्या अस्माकं वृष्टिर्दिव्या सुपारा ॥२२॥

राम

ति॰

यजामहे वां महः सजोषा हव्येभिर्मित्रावरुणा नमोभिः ॥ घृतैर्घृतस्नू अध यद्वाम
स्मे अध्वर्यवो न धीतिभिर्भरंति ॥ प्रस्तुतिर्वां धाम न प्रयुक्तिरयामि मित्रावरु
णा सुवृक्तिः ॥ अनक्ति यद्वां विदथेषु होता सुम्नं वां सूरिर्वृषणावियक्षन् ॥ पी
पाय धेनुरदितिर्ऋताय जनाय मित्रावरुणा हविर्दे ॥ हिनोति यद्वां विदथे सपर्य
न्त्स रातहव्यो मानुषो न होता ॥ उत वां विक्षु मद्यास्वंधो गाव आपश्च पीपयंत
देवीः ॥ उतो नो अस्य पूर्व्यः पतिर्दन्वीतं पातं पयस उस्रियायाः ॥२३॥ विष्णोर्नु
कं वीर्याणि प्र वोचं यः पार्थिवानि विममे रजांसि ॥ यो अस्कभायदुत्तरं सधस्थं
विचक्रमाणस्त्रेधोरुगायः ॥ प्र तद्विष्णुः स्तवते वीर्येण मृगो न भीमः कुचरो गि
रिष्ठाः ॥ यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियंति भुवनानि विश्वा ॥ प्र विष्णवे
शूषमेतु मन्म गिरिक्षित उरुगायाय वृष्णे ॥ य ऽ इदं दीर्घं सधस्थमेको विममे
प्रयतं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हि॰सं॰२

वी

॥२९॥ त्रिभिरित्पदेभिः॥ यस्यत्रीपूर्णामधुनापदान्यक्षीयमाणास्वधयामदंति॥
यउत्रिधातुपृथिवीमुतद्यामेकोदाधारभुवनानिविश्वा॥ तदस्यप्रियमभि
पाथोअश्यांनरोयत्रदेवयवोमदंति॥ उरुक्रमस्यसहिबंधुरित्थाविष्णोःप
देपरमेमध्वउत्सः॥ तावांवास्तून्युश्मसिगमध्यैयत्रगावोभूरिशृंगाअया
गा सः॥ अत्राहतदुरुगायस्यवृष्णःपरमंपदमवभातिभूरि॥२४॥ प्रवःपांतमंध
सोधियायतेमहेशूरायविष्णवेचार्चत॥ यासानुनिपर्वतानामदाभ्यामहस्तस्थ स्तु ६
तुरर्वतेवसाधुना॥ त्वेषमित्थासमरणंशिमीवतोरिंद्राविष्णूसुतपावामुरु
ष्यति॥ यामर्त्यायप्रतिधीयमानमित्कृशानोरस्तुरसनामुरुष्यथः॥ ताईव ॥२९॥
र्धंतिमह्यस्यपौंस्यंनिमातरानयतिरेतसेभुजे॥ दधातिपुत्रोवरंपरंपितुर्ना राम
मतृतीयमधिरोचनेदिवः॥ तत्तदिदस्यपौंस्यंगृणीमसीनस्यत्रातुरवृकस्य

मीढुषः॥ यःपार्थिवानित्रिभिरिद्विगामभिरुरुक्रमिष्टोरुगायायजीवसे॥
द्वेइदस्यक्रमणेस्वर्दृशोभिख्यायमर्त्योभुरण्यति॥ तृतीयमस्यनकिरादधृ
षतिवयश्चनपतयंतःपतत्रिणः॥ चतुर्भिःसाकंनवतिंचनामभिश्चक्रंन
वृत्तंव्यतीं वीविपत्॥ बृहच्छरीरोविमिमानऋक्वभिर्युवाकुमारःप्रत्ये
त्याहवं॥२५॥ भवामित्रो नशेव्योघृतासुतिर्विभूतद्युम्नएवयाउसप्रथाः॥
अधातेविष्णोविदुषाचिदर्ध्यस्तोमोयज्ञश्चराध्योहविष्मता॥ यःपूर्व्याय
वेधसेनवीयसेसुमज्जानयेविष्णवेददाशति॥ योजातमस्यमहतोमहिब्र
वत्सेदुश्रवोभिर्युज्यंचिदभ्यसत्॥ तमुस्तोतारःपूर्व्यंयथाविदऋतस्यग
र्भंजनुषापिपर्तन॥ आस्यजानंतोनामचिद्विवक्तनमहस्तेविष्णोसुमतिं
भजामहे॥ तमस्यराजावरुणस्तमश्विनाक्रतुंसचंतमारुतस्यवेधसः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥२९॥ दाधार दक्षमुत्तममहर्विदं व्रजं च विष्णुः सखिवाँ अपोर्णुते॥ आ यो विवाय स
चथाय दैव्य इंद्राय विष्णुः सुकृते सुकृत्तरः। वेधा अजिन्वत्त्रिषधस्थ आ
र्यमृतस्य भागे यजमानमाभजत्॥ २५॥ अबोध्यग्निर्ज्म उदेति सूर्यो व्यु
षाः श्चंद्रा मह्यावो अर्चिषा॥ आयुक्षातामश्विना यातवे रथं प्रासावीद्देवः
सविता जगत्पृथक्॥ यद्युंजाथे वृषणमश्विना रथं घृतेन नो मधुना क्षत्र
मुक्षतं॥ अस्माकं ब्रह्म पृतनासु जिन्वतं वयं धना शूरसाता भजेमहि॥ अ
र्वाङ् त्रिचक्रो मधुवाहनो रथो जीराश्वो अश्विनोर्यातु सुष्टुतः॥ त्रिवंधुरो
मघवा विश्वसौभगः शं न आ वक्षद्द्विपदे चतुष्पदे॥ आ न ऊर्जं वहतमश्विना
युवं मधुमत्या नः कशया मिमिक्षतं॥ प्रायुस्तारिष्टं नीरपांसि मृक्षतं से ॥२९॥
धतं द्वेषो भवतं सचाभुवा॥ युवं ह गर्भं जगतीषु ध त्थो युवं विश्वेषु भुवने

राम

ष्वंतः॥ युवमग्निं च वृषणावपश्च वनस्पतींरश्विनावैरयेथां॥ युवं ह स्थो भिष
जा भेषजेभिरथो ह स्थो रथ्या राथ्येभिः॥ अथो ह क्षत्रमधि धत्थ उग्रा यो वां
हविष्मान्मनसा ददाश॥ २७॥ ॥ इति द्वितीयाष्टके द्वितीयोध्यायः॥ ॥ ॐ
वसू रुद्रा पुरुमंतू वृधंता दशस्यतं नो वृषणावभिष्टौ॥ दस्रा ह यद्रेक्ण औच
थ्यो वां प्र यत्सस्राथे अकवाभिरूती॥ को वां दाशत्सुमतये चिदस्यै वसू यद्धेथे
त ६ नमसा पदे गोः॥ जिगृतमस्मे रेवतीः पुरंधीः कामप्रेणेव मनसा चरंता॥ युक्तो
ह यद्वां तौग्र्याय पेरुर्वि मध्ये अर्णसो धायि पज्रः॥ उप वामवः शरणं गमेयं शू
ति रो नाज्म पतयद्भिरेवैः॥ उपस्तुतिरौचथ्यमुरुष्येन्मा मामिमे पतत्रिणी वि दुग्धां॥ पी
मा मामेधो दशतयश्चितो धाक् प्र यद्वां बद्धस्त्मनि खादति क्षां॥ न मा गर
त न्नद्यो मातृतमा दासा यदीं सुसमुब्धमवाधुः॥ शिरो यदस्य त्रैतनो वितक्ष

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥३०॥ त्वयं दासु उरो अंसावपि ग्धः ॥ दीर्घतमा मामतेयो जुजुर्वान्दशमे युगे ।
अपामर्थं यतीनां ब्रह्मा भवति सारथिः ॥ ६ ॥ चोरवर्गः ॥ ॥ ओंम् ॥ प्र द्यावा
यज्ञैः पृथिवी ऋतावृधा मही स्तुषे विदथेषु प्रचेतसा ॥ देवेभिर्ये देवपु
त्रे सुदंससेत्था धिया वार्याणि प्रभूषतः ॥ उत मन्ये पितुरद्रुहो मनो मा
तुर्महि स्वतवस्तद्धवीमभिः ॥ सुरेतसा पितरा भूम चक्रतुरुरु प्रजाया अ
मृतं वरीमभिः ॥ ते सूनवः स्वपसः सुदंससो मही जज्ञुः मातरा पूर्वचित्त
ये ॥ स्थातुश्च सत्यं जगतश्च धर्मणि पुत्रस्य पाथः पदमद्वयाविनः ॥ ते
मायिनो ममिरे सुप्रचेतसो जामी सयोनी मिथुना समोकसा ॥
नव्यंनव्यं तंतुमा तन्वते दिवि समुद्रे अंतः कवयः सुदीतयः ॥ तद्राधो अ ॥३०॥
द्य सवितुर्वरेण्यं वयं देवस्य प्रसवे मनामहे ॥ अस्मभ्यं द्यावापृथिवी सुचेतु राम

नारयिं धत्तं वसुमंतं शतग्विनं ॥ २ ॥ ते हि द्यावापृथिवी विश्वशंभुव ऋतावरी र
जसो धारयत्कवी ॥ सुजन्मनी धिषणे अंतरीयते देवो देवी धर्मणा सूर्यः शु
चिः ॥ उरुव्यचसा महिनी असश्चता पिता माता च भुवनानि रक्षतः ॥ सुधृष्ट
मे वपुष्ये न रोदसी पिता यत्सीमभि रूपैरवासयत् ॥ स वह्निः पुत्रः पित्रोः प
वित्रवान्पुनाति धीरो भुवनानि मायया ॥ धेनुं च पृश्निं वृषभं सुरेतसं विश्वा
हा शुक्रं पयो अस्य दुक्षत ॥ अयं देवानामपसामपस्तमो यो जजान रोदसी
विश्वशंभुवा ॥ वि यो ममे रजसी सुक्रतूययाजरेभिः स्कंभनेभिः समानृचे ॥
ते नो गृणाने महिनी महि श्रवः क्षत्रं द्यावापृथिवी धासथो बृहत् ॥ येनाभि
कृष्टीस्ततनाम विश्वहा पनाय्यमोजो अस्मे समिन्वतं ॥ ३ ॥ किमु श्रेष्ठः
किं यविष्ठो न आजगन्किमीयते दूत्यं १ कद्यदूचिम ॥ न निंदिम चमसं यो म

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्वि॰सं॰२

॥३१॥ हाकुलो अग्ने भ्रातर्द्रुण इद्भूतिमूदिम॥ एकं चमसं चतुरः कृणोतन तद्वो देवा अ
ब्रुवंतद्व आगमं॥ सौधन्वना यद्येवा करिष्यथ साकं देवैर्यज्ञियासो भविष्यथ॥
अग्निं दूतं प्रति यदब्रवीतनाश्वः कर्त्वो रथ उतेह कर्त्वः॥ धेनुः कर्त्वा युवशा
कर्त्वा द्वा तानि भ्रातरनु वः कृत्व्येमसि॥ चकृवांस ऋभवस्तदपृच्छत क्वेदभू
द्यः स्य दूतो न आजगन्॥ यदावाख्यच्चमसांश्चतुरः कृतानादित्त्वष्टा ग्नास्वंत
र्न्यानजे॥ हनामैनां इति त्वष्टा यदब्रवीच्चमसं ये देवपानमनिंदिषुः॥ अन्या ना
मानि कृण्वते सुते सचाँ अन्यैरेनान्कन्या३ नामभिः स्परत्॥४॥ इंद्रो हरी यु
युजे अश्विना रथं बृहस्पतिर्विश्वरूपामुपाजत॥ ऋभुर्विभ्वा वाजो देवाँ अ
गच्छत स्वपसो यज्ञियं भागमैतन॥ निश्चर्मणो गामरिणीत धीतिभिर्या ज ॥३१॥
रंता युवशा ताकृणोतन॥ सौधन्वना अश्वादश्वम नेयुक्त्वा रथमुपदेवा राम

क्षत

अयातन॥ इदमुदकं पिबतेत्यब्रवीतनेदं वा घा पिबता मुंजनेजनं॥ सौधन्वना यदि तं
नेव हर्यथ तृतीये घा सवने मादयाध्वै॥ आपो भूयिष्ठा इत्येको अब्रवीदग्निर्भूयिष्ठ इत्य
न्यो अब्रवीत्॥ वधर्यंतीं बहुभ्यः प्रैको अब्रवीदृता वदंतश्चमसाँ अपिंशत॥ श्रोणामे
क उदकं गामवाजति मांसमेकः पिंशति सूनयाभृतं॥ आ निम्रुचः शकृदेको अपाभ
रत्किं स्वित्पुत्रेभ्यः पितरा उपावतुः॥५॥ उद्वत्स्वस्मा अकृणोतना तृणं निवत्स्वपः स्व
पस्यया नरः॥ अगोह्यस्य यदसस्तना गृहे तदद्येदमृभवो नानु गच्छथ॥ संमील्य यद्भु
वना पर्यसर्पत क्व स्वित्तात्या पितरा व आसतुः॥ अशपत यः करस्नं व आददे यः प्राब्र
वीत्प्रो तस्मा अब्रवीतन॥ सुषुप्वांस ऋभवस्तदपृच्छतागोह्य क इदं नो अबूबुधत्॥
श्वानं बस्तो बोधयितारमब्रवीत्संवत्सर इदमद्या व्यख्यत॥ दिवा यांति मरुतो भूम्याग्नि
रयं वातो अंतरिक्षेण याति॥ अद्भिर्याति वरुणः समुद्रैर्युष्माँ इच्छंतः शवसो नपातः॥
॥६॥ मा नो मित्रो वरुणो अर्यमायुरिंद्र ऋभुक्षा मरुतः परिख्यन्॥ यद्वाजिनो देव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्वि० सं० २

स्य वु भी

||३२|| जातसप्तेः प्रवक्ष्यामो विदथे वीर्याणि॥ यन्निर्णिजा रेक्णसा प्रावृतस्य रातिं गृभीतां मुखतो
नयन्ति॥ सुप्राङजो मेम्यद्विश्वरूप इन्द्रापूष्णोः प्रियमप्येति पाथः॥ एष छागः पु
रो अश्वेन वाजिना पूष्णो भागो नीयते विश्वदेव्यः॥ अभिप्रियं यत्पुरोडाशमर्व
ता त्वष्टेदेनं सौश्रवसाय जिन्वति॥ यद्धविष्यमृतुशो देवयानं त्रिर्मानुषाः पर्यश्वं न
यन्ति॥ अत्रा पूष्णः प्रथमो भाग एति यज्ञं देवेभ्यः प्रतिवेदयन्नजः॥ होताध्वर्युराव ६५
याग्निमिन्धो ग्रावग्रा भ उत शंस्ता सुविप्रः॥ तेन यज्ञेन स्वरंकृतेन स्विष्टेन
वक्षणा आपृणध्वं॥ ७॥ यूपव्रस्का उत ये यूपवाहाश्चषालं ये अश्वयूपाय तक्षति॥
ये चार्वते पचनं संभरन्त्युतो तेषामभिगूर्तिर्न इन्वतु॥ उप प्रागात्सुमन्मे धायि म
न्म देवानामाशा उपवीतपृष्ठः॥ अन्वेनं विप्रा ऋषयो मदन्ति देवानां पुष्टे चकृमा
सुबन्धुं॥ यद्वाजिनो दाम संदानमर्वतो या शीर्षण्या रशना रज्जुरस्य॥ यद्वा घास्य ||३२||
प्रभृतमास्ये तृणं सर्वा ता ते अपि देवेष्वस्तु॥ यदश्वस्य क्रविषो मक्षिकाश यद्वा स्व राम

प१

रौ स्वधितौ रिप्तमस्ति॥ यद्धस्तयोः शमितुर्यन्नखेषु सर्वा०॥ यदूवध्यमुदरस्या
पवाति य आमस्य क्रविषो गन्धो अस्ति॥ सु कृता तच्छमितारः कृण्वन्तूत मेधं
शृतपाकं पचन्तु॥ ८॥ यत्ते गात्रादग्निना पच्यमानादभि शूलं निहतस्यावधावति॥
मा तद्भूम्यामाश्रिषन्मा तृणेषु देवेभ्यस्तदुशद्भ्यो रातमस्तु॥ ये वाजिनं परिपश्यं
ति पक्वं य ईमाहुः सुरभिर्निर्हरेति॥ ये चार्वतो मांसभिक्षामुपासत उतो तेषामभि
गूर्तिर्न इन्वतु॥ यन्नीक्षणं मांस्पचन्या उखाया या पात्राणि यूष्ण आसेचनानि॥ ऊ
ष्मण्यापिधाना चरूणामङ्काः सूनाः परिभूषन्त्यश्वं॥ निक्रमणं निषदनं विवर्तनं य
च्च पड्बीशमर्वतः॥ यच्च पपौ यच्च घासिं जघास सर्वा ता ते अपि देवेष्वस्तु॥ मा त्वाग्नि
र्ध्वनयीद्धूमगन्धिर्मोखा भ्राजन्त्यभि विक्त जघ्रिः॥ इष्टं वीतमभिगूर्तं वषट्कृतं तं दे
वासः प्रतिगृभ्णन्त्यश्वं॥ ९॥ यदश्वाय वास उपस्तृणन्त्यधीवासं या हिरण्यान्यस्मै॥
संदानमर्वन्तं पड्बीशं प्रिया देवेष्वा यामयन्ति॥ यत्ते सादे महसा शूकृतस्य पार्ष्ण्या वा क

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हि० सं० २

ते

।।२२।। कशयावातुतोद॥ स्रुचेवत्ताहविषोअध्वरेषुसर्वाताताब्रह्मणासूदयामि॥ चतुस्त्रिं
शद्वाजिनोदेवबंधोर्वंक्रीरश्वस्यस्वधितिःसमेति॥ अच्छिद्रागात्रावयुनाकृणोत
कु२ परुष्परुरनुघुष्याविशस्त॥ एकस्त्वष्टुरश्वस्याविशस्ताद्वायंताराभवतस्तथऽ
ऋतुः॥ यातेगात्राणामृतुथाकृणोमितांतापिंडानांप्रजुहोम्यग्नौ॥ मात्वातपत्प्रि
यआत्मापियंतंमास्वधितिस्तन्वाऽआतिष्ठिपत्ते॥ मातेगृध्नुरविशस्तातिहाय
छिद्रागात्राण्यसिनामिथूकः॥ नवाउएतन्म्रियसेनरिष्यसिदेवांइदेषिपथिभिःसुगेभिः॥
हरीतेयुंजापृषतीअभूतामुपास्थाद्वाजीधुरिरासभस्य॥ सुगव्यंनोवाजीस्व
श्व्यंपुंसःपुत्रांउतविश्वापुषंरयिं॥ अनागास्त्वंनोअदितिःकृणोतुक्षत्रंनोअ
श्वोवनतांहविष्मान्॥१०॥ यदक्रंदःप्रथमंजायमानउद्यन्त्समुद्रादुतवापुरीषा
त्॥ श्येनस्यपक्षाहरिणस्यबाहूउपस्तुत्यंमहिजातंतेअर्वन्॥ यमेनदत्तंत्रित ।।२३।।
१ मा एनमायुनगिंद्रएणंप्रथमोअध्यतिष्ठत्॥ गंधर्वोअस्यरशनामगृभ्णात्सूरा राम

दे

दश्वंवसवोनिरतष्ट॥ असियमोअस्यादित्योअर्वन्नसित्रितोगुह्येनव्रतेन॥ अ
सिसोमेनसमयाविपृक्तआहुस्तेत्रीणिदिविबंधनानि॥ त्रीणितआहुर्दिविबं
धनानित्रीण्यप्सुत्रीण्यंतःसमुद्रे॥ उतेवमेवरुणश्छंत्स्यर्वन्यत्रातआहुःपरमं प२
जनित्रं॥ इमातेवाजिन्नवमार्जनानीमाशफानांसनितुर्निधाना॥ अत्रातेभ
द्रारशनाअपश्यमृतस्ययाऽअभिरक्षंतिगोपाः॥१॥ आत्मानंतेमनसारा
दजानामवोदिवापतयंतंपतंगं॥ शिरोअपश्यंपथिभिःसुगेभिररेणुभिर्जे
५५ हमानंपतत्रि॥ अत्रातेरूपमुत्तममपश्यंजिगीषमाणमिषआपदेगोः॥ यदा
अ तेमर्तोअनुभोगमानळादिद्ग्रसिष्ठओषधीरजीगः॥ अनुत्वारथोअनुमर्यो
गावोनु अर्वन्ननुभगःकनीनां॥ अनुव्रातासस्तवसख्यमीयुरनुदेवाममिरेवीर्यंते॥
हिरण्यशृंगोयोअस्यपादामनोजवाअवरइंद्रआसीत्॥ देवाइदस्यहविरद्य
मायन्योअर्वंतंप्रथमोअध्यतिष्ठत्॥ ईर्मांतासःसिलिकमध्यमासःसंशूरणा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्वि॰ सं॰ २

त

॥३४॥ सो दिव्यासो अत्याः ॥ हंसा इव श्रेणिशो यतंते यदाक्षिषुर्दिव्यमज्ममश्वाः ॥
॥१२॥ तव शरीरं पतयिष्ण्वर्वन् तव चित्तं वात इव ध्रजीमान् ॥ तव शृंगाणि विष्ठि
ता पुरुत्रारण्येषु जर्भुराणा चरंति ॥ उप प्रागाच्छसनं वाज्यर्वा देवद्रीचा मनसा
दीध्यानः ॥ अजः पुरो नीयते नाभिरस्यानु पश्चात्कवयो यंति रेभाः ॥ उप प्रागात्प
रमं यत्सधस्थमर्वा अच्छा पितरं मातरं च ॥ अद्या देवां जुष्टतमो हि गम्या अथा
शास्ते दाशुषे वार्याणि ॥१३॥ ॥इत्यर्द्ध॥ ॥अस्य वामस्य पलितस्य होतुस्तस्य
ता भ्राता मध्यमो अस्त्यश्नः ॥ तृतीयो भ्राता घृतपृष्ठो अस्यात्रापश्यं विश्पतिं सप्त
पुत्रं ॥ सप्त युंजंति रथमेकचक्रमेको अश्वो वहति सप्तनामा ॥ त्रिनाभि चक्रमज
रमनर्वं यत्रेमा विश्वा भुवनाधि तस्थुः ॥ इमं रथमधि ये सप्त तस्थुः सप्तचक्रं स म३
प्त वहंत्यश्वाः ॥ सप्त स्वसारो अभि सं नवंते यत्र गवां निहिता सप्त नाम ॥ को ददर्श प्र ॥३४॥
थमं जायमानमस्थन्वंतं यदनस्था बिभर्ति ॥ भूम्या असुरसृगात्मा क्व स्वित्को राम

सु२

विद्वांसमुपगात्प्रष्टुमेतत् ॥ पाकः पृच्छामि मनसाविजानन्देवानामेना निहिता
पदानि ॥ वत्से बष्कयेधि सप्त तंतून्वि तत्निरे कवय ओतवा उ ॥१४॥ अचिकि
त्वांश्चिकितुषश्चिदत्र कवीन्पृच्छामि विद्मने न विद्वान् ॥ वि यस्तस्तंभ षळिमा
स्य४ रजांस्यजस्य रूपे किमपि स्विदेकं ॥ इह ब्रवीतु य ईमंग वेदास्य वामस्य निहितं प
दं वेः ॥ शीर्ष्णः क्षीरं दुह्रते गावो अस्य वव्रिं वसाना उदकं पदापुः ॥ माता पितृ
रमृत आ बभाज धीत्यग्रे मनसा सं हि जग्मे ॥ सा बीभत्सुर्गर्भरसा निविद्धा
नमस्वंत इदुपवाकमीयुः ॥ युक्ता मातासीद्धुरि दक्षिणाया अतिष्ठद्गर्भो वृज
नीष्वंतः ॥ अमीमेद्वत्सो अनु गामपश्यद्विश्वरूप्यं त्रिषु योजनेषु ॥ ति
स्रो मातॄस्त्रीन्पितॄन्बिभ्रदेक ऊर्ध्वस्तस्थौ नेमव ग्लापयंति ॥ मंत्रयंते दि
वो अमुष्य पृष्ठे विश्वविदं वाच मविश्वमिन्वां ॥१५॥ द्वादशारं न

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्वि॰ सं॰ २

॥ ३५ ॥ हितज्जरायवर्वर्तिचक्रंपरिद्यामृतस्य॥आपुत्राअग्नेमिथुनासोअत्रसप्तश
तानिविंशतिश्चतस्थुः॥पंचपादंपितरंद्वादशाकृतिंदिवआहुःपरेअर्द्धेपुरीषि
व ३ णं॥अथेमेअन्यउपरेविचक्षणंसप्तचक्रेषळरआहुरर्पितं॥पंचारेचक्रेपरिव
र्तमानेतस्मिन्नातस्थुर्भुवनानिविश्वा॥तस्यनाक्षस्तप्यतेभूरिभारःस
नादेवनशीर्यतेसनाभिः॥सनेमिचक्रमजरंविवावृतउत्तानायांदशयुक्तावहं
ति॥सूर्यस्यचक्षूरजसैत्यावृतंतस्मिन्नार्पिताभुवनानिवि
श्वा॥साकंजानांसप्तथमाहुरेकजंषळिद्यमाऋषयोदेवजाइति॥तेषामि
ष्टानिविहितानिधामशःस्थात्रेरेजंतेविकृतानिरूपशः॥१६॥स्त्रियःसती
स्तांउमेपुंसआहुःपश्यदक्षण्वान्नविचेतदंधः॥कविर्यःपुत्रःसईमाचिके ॥ ३५ ॥
तयस्ताविजानात्सपितुष्पितासत्॥अवःपरेणपरएनावरेणपदावत्संबि

राम

यः ईंचकारनसोअस्यवेदयईंददर्शहिरुगिंनुतस्मात्॥समातुर्योनापरिवी
तोअंतर्बहुप्रजानिर्ऋतिमाविवेश॥द्यौर्मेपिताजनितानाभिरत्रबंधुर्मेमा
तापृथिवीमहीयं॥उत्तानयोश्चम्वो३र्योनिरंतरत्रापितादुहितुर्गर्भमाधात्॥
पृच्छामित्वापरमंतंपृथिव्याःपृच्छामियत्रभुवनस्यनाभिः॥पृच्छामित्वावृष्णो
अश्वस्यरेतःपृच्छामिवाचःपरमंव्योम॥इयंवेदिःपरोअंतःपृथिव्याअयंय
ज्ञोभुवनस्यनाभिः॥अयंसोमोवृष्णोअश्वस्यरेतोब्रह्मायंवाचःपरमंव्यो
म॥२०॥सप्तार्धगर्भाभुवनस्यरेतोविष्णोस्तिष्ठंतिप्रदिशाविधर्मणि॥तेधी
तिभिर्मनसातेविपश्चितःपरिभुवःपरिभवंतिविश्वतः॥नविजानामियदिवे
दमस्मिनिण्यःसंनद्धोमनसाचरामि॥यदामागन्प्रथमजाऋतस्यादिद्वाचो
अश्नुवेभागमस्याः॥अपाङ्प्राङेतिस्वधयागृभीतोमर्त्योमर्त्येनासयोनिः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्वि० सं० २

॥३७॥ ताशश्वंताविषूचीनावियंतान्यन्यंचिक्युर्ननिचिक्युरन्यं॥ ऋचोअक्षरे
परमेव्योमन्यस्मिन्देवाअधिविश्वेनिषेदुः॥ यस्तन्नवेदकिमृचाकरिष्य
तियइत्तद्विदुस्तइमेसमासते॥ सूयवसाद्भगवतीहिभूयाअथोवयंभ
श्व गवंतस्याम॥ अद्धितृणमघ्न्येविश्वदानींपिबशुद्धमुदकमाचरंती॥२७॥ गौरी
र्मिमायसलिलानितक्षत्येकपदीद्विपदीसाचतुष्पदी॥ अष्टापदीनवपदी
बभूवुषीसहस्राक्षरापरमेव्योमन्॥ तस्याःसमुद्राअधिविक्षरंतितेनजी
वंतिप्रदिशश्चतस्रः॥ ततःक्षरत्यक्षरंतद्विश्वमुपजीवति॥ शकमयंधूमंमा
वि२ रादपश्यंविषूवतापरएनावरेण॥ उक्षाणंपृश्निमपचंतवीरास्तानिध
वत्स२ र्माणिप्रथमान्यासन्॥ त्रयःकेशिनऋतुथाविचक्षतेसंवत्सरेवपतएकएषां॥ ॥३७॥
विश्वमेकोअभिचष्टेशचीभिर्ध्राजिरेकस्यददृशेनरूपं॥ चत्वारिवाक्परिमि राम

तापदानितानिविदुर्ब्राह्मणायेमनीषिणः॥ गुहात्रीणिनिहितानेंगयंति
तुरीयंवाचोमनुष्यावदंति॥ इंद्रंमित्रंवरुणमग्निमाहुरथोदिव्यःससुपर्णो
गरुत्मान्॥ एकंसद्विप्राबहुधावदंत्यग्निंयमंमातरिश्वानमाहुः॥२२॥ कृष्णं
नियानंहरयःसुपर्णाअपोवसानादिवमुत्पतंति॥ तआववृत्रन्त्सदनादृ
तस्यादिद्घृतेनपृथिवीव्युद्यते॥ द्वादशप्रधयश्चक्रमेकंत्रीणिनभ्यानिक
उतच्चिकेत॥ तस्मिन्त्साकंत्रिशतानशंकवोर्पिताःषष्टिर्नचलाचलासः॥
यस्तेस्तनःशशयोयोमयोभूर्येनविश्वापुष्यसिवार्याणि॥ योरत्नधावसु
विद्यःसुदत्रःसरस्वतितमिहधातवेकः॥ यज्ञेनयज्ञमयजंतदेवास्तानि
धर्माणिप्रथमान्यासन्॥ तेहनाकंमहिमानःसचंतयत्रपूर्वेसाध्याः
संतिदेवाः॥ समानमेतदुदकमुच्चैत्यवचाहभिः॥ भूमिंपर्जन्याजिन्वंति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं० द्वि० २

॥३९॥ दिवंजिन्वंत्यग्नयः॥दिव्यंसुपर्णंवायसंबृहंतमपांगर्भंदर्शतमोषधीनां॥
अभीपतोवृष्टिभिस्तर्पयंतंसरस्वंतमवसेजोहवीमि॥२३॥कयाशुभासव
यसःसनीळाःसमान्यामरुतःसंमिमिक्षुः॥कयामतीकुतएतासएतेर्च
तिशुष्मंवृषणोवसूया॥कस्यब्रह्माणिजुजुषुर्युवानःकोअध्वरेमरुतआ
ववर्त॥श्येनाँइवध्रजतोअंतरिक्षेकेनमहामनसारीरमाम॥कुतस्त्वमिंद्रमा
हिनःसन्नेकोयासिसत्पतेकिंतइत्था॥संपृच्छसेसमराणःशुभानैर्वोचेस्त
न्नोहरिवोयत्तेअस्मे॥ब्रह्माणिमेमतयःशंसुतासःशुष्मइयर्तिप्रभृतो
मेअद्रिः॥आशासतेप्रतिहर्यंत्युक्थेमाहरीवहतस्तानोअच्छ॥अतोव
यमंतमेभिर्युजानाःस्वक्षत्रेभिस्तन्वः१शुंभमानाः॥महोभिरेताँउपयुज्म
हेन्विंद्रस्वधामनुहिनोबभूथ॥२४॥क्व१स्यावोमरुतःस्वधासीद्यन्मा ॥३९॥

राम

म १ स्य
मेकंसमधत्ताहिहत्ये॥अहंह्युग्रस्तविषस्तुविष्मा न्विश्वस्यशत्रोरनमं
वधस्नैः॥भूरिचकर्थयुज्येभिरस्मेसमानेभिर्वृषभपौंस्येभिः॥भूरीणिहिकृण
दूत्रा०३ वामाशविष्ठेंद्रक्रत्वामरुतोयद्वशाम॥वधींवृत्रं मरुतइंद्रियेणस्वेनभामेन
तविषोबभूवान्॥अहमेतामनवेविश्वश्चंद्राःसुगाअपश्चकरवज्रबाहुः॥अ
नुत्तमातेमघवन्नकिर्नुनत्वावाँअस्तिदेवताविदानः॥नजायमानोनशतेन
जातोयानिकरिष्याकृणुहिप्रवृद्ध॥एकस्यचिन्मेविभ्व१स्त्वोजोयानुदधृष्वा
हं ४ न्कृणवैमनीषा॥अहंह्यु१ग्रोमरुतोविदानोयानिच्यवमिंद्रइदीशएषां॥२५॥
अमंदन्मामरुतःस्तोमोअत्रयन्मेनरःश्रुत्यंब्रह्मचक्र॥इंद्रायवृष्णेसुमखा
यमह्यंसख्येसखायस्तन्वेतनूभिः॥एवेदेतेप्रतिमारोचमानाअनेद्यःश्रवए दे २
षोदधानाः॥संचक्ष्यामरुतश्चंद्रवर्णाअच्छांतमेछदयाथाचनूनं॥कोन्वत्रम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥३९॥ रुतो मामहे वः प्रयातन सखीँरछा सखायः॥ मन्मानि चित्रा अपिवातयंत एषां
भूत नवेदा म ऋतानां॥ आ यद्दुवस्याद्दुवसे न कारुरस्मांचक्रे मान्य मेधा॥ स्य
ओषु वर्तमरुतो विप्रमच्छेमा ब्रह्माणि जरिता वो अर्चत्॥ एष व स्तोमो मरुत इ
यं गीर्मांदार्यस्य मान्यस्य कारोः॥ एषा यासीष्ट तन्वे वयां विद्यामेषं वृजनं जीर
दानुं॥२८॥ ॥इति द्वितीयाष्टके तृतीयोध्यायः॥ ॥ॐ॥ तन्नु वोचाम रभसाय
जन्मने पूर्वं महित्वं वृषभस्य केतवे॥ ऐधेव यामन्मरुतस्तुविष्वणो युधेव शक्रा
स्तविषाणि कर्तन॥ नित्यं न सूनुं मधु बिभ्रत उप क्रीळंति क्रीळा विदथेषु घृष्व
यः॥ नक्षंति रुद्रा अवसा नमस्विनं न मर्धंति स्वतवसो हविष्कृतं॥ यस्मा ऊ
मासो अमृता अरासत रायस्पोषं च हविषा ददाशुषे॥ उक्षंत्यस्मै मरुतो हिता इ ॥३९॥
व पुरू रजांसि पयसा मयोभुवः॥ आ ये रजांसि तविषीभिरव्यत प्र व एवासः स्वयता भि राम

< वो मिथस्पृध्येव तविषाण्याहिता॥ अंसेष्वा वः प्रपथेषु <

सो अध्रजन्॥ भ यंते विश्वा भुवनानि हर्म्या चित्रो वो यामः प्रयतास्वृष्टिषु॥ यत्त्वेष
यामा नदयंत पर्वतान्दिवो वा पृष्ठं नर्या अचुच्यवुः॥ विश्वो वो अज्मन्भयते वनस्पती
२ ही रथीयंतीव प्रजिहीत ओषधिः॥१॥ यूयं न उग्रा मरुतः सुचेतुनारिष्टग्रामाः सुम
तिं पिपर्तन॥ यत्रा वो दिद्युद्रदति क्रिविर्दती रिणाति पश्वः सुधितेव बर्हणा॥ प्रस्कं
भदेष्णा अनवभ्रराधसो लातृणासो विदथेषु सुष्टुताः॥ अर्चंत्यर्कं मदिरस्य पीत
ये विदुर्वीरस्य प्रथमानि पौंस्या॥ शतभुजिभिस्तमभिह्रुतेरघात् भूः रक्षता म ते ६
रुतो यमावत॥ जनं यमुग्रास्तवसो विरप्शिनः पाथना शंसात्तनयस्य पुष्टिषु॥ वि
श्वानि भद्रा मरुत॰ रथेषु खादयो क्षो वश्चक्रा समया वि वावृते॥ भूरीणि भद्रा नर्ये
षु बाहुषु वक्षःसु रुक्मा रभसासो अंजयः॥ अंसेष्वेताः पविषु क्षुरा अधि वयो न अंजन ३
पक्षान्व्यनु श्रियो धिरे॥२॥ महांतो मह्ना विभ्वो विभूतयो दूरेदृशो ये दिव्या इव स्तृ
भिः॥ मंद्राः सुजिह्वाः स्वरितार आसभिः संमिश्ला इंद्रे मरुतः परिष्टुभः॥ तद्वः सु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्वि० सं० २

ता

॥४०॥ जां मरुतो महित्वनं दीर्घं वो दात्रमदितेरिव व्रतं ॥ इंद्रश्चन त्यजसा
वि ह्रुणाति तज्जनाय यस्मै सुकृते अराध्वं ॥ तद्वो जामित्वं मरुतः परे यु
गे पुरू यच्छंसममृतास आवत ॥ अया धिया मनवे श्रुष्टिमाव्या साकं न
रो दंसनैरा चिकित्रिरे ॥ येन दीर्घं मरुतः शूशवाम युष्माकेन परीणसा तु
रासः ॥ आ यत्ततनन्वृजने जनास एभिर्यज्ञेभिस्तदभीष्टिमश्यां ॥ एष व
स्तोमो० ॥ ३ ॥ सहस्रं त इंद्रोतयो नः सहस्रमिषो हरिवो गूर्ततमाः ॥ सहस्रं रा
यो मादयध्यै सहस्रिण उप नो यंतु वाजाः ॥ आ नो वोभिर्मरुतो यांत्वच्छा ज्ये
ष्ठेभिर्वा बृहद्दिवैः सुमायाः ॥ अध यदेषां नियुतः परमाः समुद्रस्य चिद्धनयंं
त पारे ॥ मिम्यक्ष येषु सुधिता घृताची हिरण्यनिर्णिगुपरा न ऋष्टिः ॥ गु ॥४०॥
हा चरंती मनुषो न योषा सभावती विदथ्येव सं वाक् ॥ पराशुभ्रा अयासो राम

यव्या साधारण्येव मरुतो मिमिक्षुः ॥ न रोदसी अप नुदंत घोरा जुषंत वृधं स
ख्याय देवाः ॥ जोषद्यदीमसुर्या सचध्यै विषितस्तुका रोदसी नृमणाः ॥
आ सूर्येव विधतो रथं गात्त्वेषप्रतीका नभसो नेत्या ॥ ४ ॥ आस्थापयंत युव
तिं युवानः शुभे निमिश्लां विदथेषु पज्राम् ॥ अर्को यद्वो मरुतो हविष्मान्
गायद्गाथं सुतसोमो दुवस्यन् ॥ प्र तं विवक्मि वक्म्यो य एषां मरुतां महिमा
सत्यो अस्ति ॥ सचा यदीं वृषमणा अहंयुः स्थिरा चिज्जनीर्वहते सुभागाः ॥
पांति मित्रावरुणाववद्याच्चयत ईमर्यमो अप्रशस्तान् ॥ उत च्यवंते अच्यु
ता ध्रुवाणि वावृध ईं मरुतो दातिवारः ॥ नही नु वो मरुतो अंत्यस्मे आरात्ता
च्चिच्छवसो अंतमापुः ॥ ५ ॥ ते धृष्णुना शवसा शूशुवांसोऽर्णो न द्वेषो धृषता परि
ष्ठुः ॥ वयमद्येंद्रस्य प्रेष्ठा वयं श्वो वोचेमहि समर्ये ॥ वयं पुरा महि च नो अनु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥४१॥ घृंतन्नंऋभुक्षानरामनुष्यात्॥ एषवस्तोमोम०॥५॥ यज्ञायज्ञावःसम
नातुतुर्वणिर्धियंधियंवोदेवयाउदधिध्वेआवोर्वाचःसुवितायरोदस्यो
र्म्महेववृत्यामवसेसुवृक्तिभिः॥ वव्रासोनयेस्वजाःस्वतवसइषंस्वरभिजा
यंतधूतयः॥ सहस्रियासोअपांनोर्मयआसागावोवंद्यासोनोक्षणः॥ सो
मासोनयेसुतास्तृप्तांशवोहृत्सुपीतासोदुवसोनासते॥ ऐषामंसेषुर
व भिणीवरारभेहस्तेषुखादिश्चकृतिश्चसंदधे॥ अवस्वयुक्तादिवआवृथा
ययुरमर्त्याःकशयाचोदतत्मना॥ अरेणवस्तुविजाताअचुच्यवुर्दृळ्हानि
चिन्मरुतोभ्राजदृष्टयः॥ कोवोंतर्म्मरुतऋष्टिविद्युतोरेजतित्मनाहन्वे
वजिह्वया॥ धन्वच्युतइषांनयामनिपुरुप्रेषाअहन्योनैतशः॥६॥ ॥४२॥
क्वस्विदस्यरजसोमहस्परंक्वावरंमरुतोयस्मिन्नायय॥ यच्यावयथ राम

हि

विथुरेवसंहितंव्यद्रिणापतथत्वेषमर्णवं॥ सातिर्न्नवोमवतीस्वर्वतीत्वेषा
विपाकामरुतःपिपिष्वती॥ भद्रावोरातिःपृणतोनदक्षिणापृथुज्रयीअ
सुर्येवजंजती॥ प्रतिष्टोभंतिसिंधवःपविभ्योयदभ्रियांवाचमुदीर
यंति॥ अवस्मयंतविद्युतःपृथिव्यांयदीघृतंमरुतःप्रुष्णुवंति॥ असू
तपृश्निर्म्महतेरणायत्वेषमयासांमरुतामनीकं॥ तेसप्सरासोजनयं
ताभ्वमादित्स्वधामिषिरांपर्यपश्यन्॥ एषवस्तोमो०॥७॥ महश्चित्व
दसि मिंद्रयतएतान्महश्चिदसित्यजसोवरूता॥ सनोवेधोमरुतांचिकित्वान्सुम्ना
व वनुष्वतवहिप्रेष्ठा॥ अयुज्रंतइंद्रविश्वकृष्टीर्विदानासोनिःषिधोमर्त्य
त्रा॥ मरुतांपृत्सुतिर्हासमानास्वर्मीळ्हस्यप्रधनस्यसातौ॥ अम्यक्सा
तइंद्रऋष्टिरस्मेसनेम्यभ्वंमरुतोजुनंति॥ अग्निश्चिद्धिष्मातसेशुशु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हि० सं० २

या ण

॥४२॥ क्वानापो न द्वीपं दधति प्रयांसि ॥ त्वं तू न इंद्र तं रयिं दा ओजिष्ठया दक्षिणयेव रातिं ॥ स्तु
म तश्च यास्ते चकनंत वायोः स्तनं न मध्वः पीपयंत वाजैः ॥ त्वे राय इंद्र तोशतमाः प्रणेता तेर
रः कस्य चिदृतायोः ॥ ते षु णो मरुतो मृळयंतु ये स्मा पुरा गातूयंतीव देवाः ॥ ८ ॥ प्र
ति प्र याहींद्र मीळ्हुषो नॄन्महः पार्थिवे सदने यतस्व ॥ अध यदेषां पृथुबुध्नास ए
तास्तीर्थे नार्यः पौंस्यानि तस्थुः ॥ प्रति घोराणामेतानामयासां मरुतां शृण्व
ना आयतामुपब्दिः ॥ ये मर्त्यं पृतनायंतमूमैरृणावानं न पतयंत सर्गैः ॥ त्वं मानेभ्य
इंद्र विश्वजन्या रदा मरुद्भिः शुरुधो गोअग्राः ॥ स्तवानेभिः स्तवसे देव देवैर्विद्यामे
षं वृजनं जीरदानुं ॥ ९ ॥ न नूनमस्ति नो श्वः कस्तद्वेद यदद्भुतं ॥ अन्यस्य चित्तम
भि संचरेण्यमुताधीतं वि नश्यति ॥ किं न इंद्र जिघांससि भ्रातरो मरुतस्तव ॥ ते
भिः कल्पस्व साधुया मा नः समरणे वधीः ॥ किं नो भ्रातरगस्त्य सखा सन्नति म ॥४२॥
हि न्यसे ॥ विद्मा हि ते यथा मनोऽस्मभ्यमिन्न दित्ससि ॥ अरं कृण्वंतु वेदिं समग्निमिं
साम्

ती इ२ वृ

नि ॥ युक्ष्वा हि वृषभ्यां वृषभा क्षितीनां हरिभ्यां याहि प्रवतोप मद्रिक् ॥ अयं यज्ञो
य याऽयं मियेधः इमा ब्रह्माण्ययमिंद्र सोमः ॥ स्तीर्णं बर्हिरा तु शक्र प्र याहि पि
निषद्या वि मुचा हरी इह ॥ ओ सुष्टुत इंद्र याह्यर्वाङुप ब्रह्माणि मान्यस्य का गी
विद्यामवस्तोरवसा गृणंतो विद्यामेषं वृ० ॥ २० ॥ यद्धस्यात इंद्र श्रुष्टिरस्ति
भ्य यया बभूथ जरितृभ्य ऊती ॥ मा नः कामं महयंतमा धग्विश्वा ते अश्यां प
र्याप आयोः ॥ न घा राजेंद्र आ दभन्नो या नु स्वसारा कृणवंत योनौ ॥ आपश्चि
दस्मै सुतुका अवेषन्गमन्न इंद्रः सख्या वयश्च ॥ जेता नृभिरिंद्रः पृत्सु शू
रः श्रोता हवं नाधमानस्य कारोः ॥ प्रभर्ता रथं दाशुष उपाक उद्यंता गिरो य
वो देवेष्वरतिर्निधायि ॥ होता यजिष्ठो मह्ना शुचध्यै हव्यैरग्निर्म
नुष ईरयध्यै ॥ इह त्वं सूनो सहसो नो अद्य जातो जाताँ उभयाँ अं

ऋ० सं० ३

६ रयिः पृथुबुध्नः सभा ६

॥४१॥ तरग्ने॥ दूत ईयसे युयुजान ऋ३ष्व ऋ३जुमुष्कान्वृषणः शुक्रांश्च॥ अ
त्या वृधस्नू रोहिता घृतस्नू ऋतस्य मन्ये मनसा जविष्ठा॥ अंतरीय
स अरुषा युजानो युष्मांश्च देवान्विश आ च मर्तान्॥ अर्यमणं वरु
णं मित्रमेषामिंद्राविष्णू मरुतो अश्विनोत॥ स्वश्वो अग्ने सुरथः सु
राधा एदु वह सुहविषे जनाय॥ गोमां अग्नेविमां अश्वी यज्ञो
स५ नृवत्सखा सदमिदप्रमृष्यः॥ इळावां एषो असुर प्रजावान्दीर्घो
स्रजावान्॥ ॥१६॥ ॥ यस्त इध्मं जभरत्सिष्विदानो मूर्धानं वा तत
पते त्वाया॥ भुवस्तस्य स्वतवां पायुरग्ने विश्वस्मात्सीमघायत उरु
ष्य॥ यस्ते भरादन्नियते चिदन्नं निशिषन्मंद्रमतिथिमुदीरत्॥ आ ॥४१॥
देवयुरिनधते दुरोणे तस्मिन्रयिर्ध्रुवो अस्तु दास्वान्॥ यस्त्वा राम

सा दोषा य उषसि प्रशंसात्प्रियं वा त्वा कृणवते हविष्मान्॥ अश्वो न स्वे दम
आ हेम्यावां तमंहसः पीपरो दाश्वांसं॥ यस्तुभ्यमग्ने अमृताय दा
शद्दुवस्त्वे कृणवते यतस्रुक्॥ न स राया शशमानो वि योषन्नैनमंहः विर
परि वरदघायोः॥ यस्य त्वमग्ने अध्वरं जुजोषो देवो मर्तस्य सुधि
५ सा तं रराणः॥ प्रीतेदसद्धोत्रा सा यविष्ठासाम यस्य विधतो वृधासः॥
॥१७॥ ॥ चित्तिमचित्तिं चिनवद्वि विद्वान्पृष्ठेव वीता वृजिना च म
र्तान्॥ राये च नः स्वपत्याय देव दितिं च रास्वादितिमुरुष्य॥ कविं शशासुः क
वयोदब्धा निधारयंतो दुर्यास्वायोः॥ अतस्त्वं दृश्यां अग्न एतान्पड्भिः प
श्यैरद्भुतां अर्य एवैः॥ त्वमग्ने वाघते सुप्रणीतिः सुतसोमाय विधते य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त॰सं॰२

श१

॥८२॥ विष्ठ॥ रत्नं भरत्‌शंमाना यच्छ बेषेपृथ्युश्रुंद्मवसे चर्षणिप्राः॥ अधा ह
यद्वयम्मे ग्ने त्वाया पड्भिर्हस्तेभिश्चकृमा तनूभिः॥ रथन्नक्रौन्तो अपसा भु
रिजोर्त्रतं येमुः सुध्य आशुषाणाः॥ अधा मातुरुषसः सप्तविप्रा जा
येमहि प्रथमा वेधसो नृन्॥ दिवस्पुत्रा अङ्गिरसो भवेमाद्रिं रुजेम धन
निनं शुचंतः॥१८॥ अधा यथा नः पितरः परासः प्रत्नासो अग्न ऋत
माशुषाणाः॥ शुचीदयन्दीधितिमुक्थशासः क्षामाभिंदंतो अरुणीर
पव्रन्॥ सुकर्माणः सुरुचो देवयंतो यो न देवा जनिमा धमंतः॥ शुचंतो
अग्निं ववृधंत इंद्रमूर्वं गव्यं परिषदंतो अग्मन्॥ आ यूथेव क्षुमति पश्वो
अख्यद्देवानां यज्जनिमांत्युग्र॥ मर्तानां चिदुर्वशीरकृप्रन्वृधे चिदर्य ॥८२॥
उपरस्यायोः॥ अकर्म ते स्वपसो अभूम ऋतमवस्रन्नुषसो विभातीः॥ राम

अनूनमग्निं पुरुधा सुश्चंद्रं देवस्य मर्मृजतश्चारु चक्षुः॥ एता ते अग्न उ
ष२ चथानि वेधो वोचाम कवये ता जुषस्व॥ उच्छोचस्व कृणुहि वस्यसो नो महो
रायः पुरुवार प्रयंधि॥१९॥ आ वो राजानमध्वरस्य रुद्रं होतारं सत्ययजं
रोदस्योः॥ अग्निं पुरा तनयित्नोरचित्ताद्धिरण्यरूपमवसे कृणुध्वं॥ अ
यं योनिश्चकृमा यं वयं ते जायेव पत्य उशती सुवासाः॥ अर्वाचीनः परि
वीतो निषीदेमा उ ते स्वपाक प्रतीचीः॥ आशृण्वते अदृपिताय मन्म नृ
से४ चक्षसे सुमृळीकाय वेधः॥ देवाय शस्तिममृताय शंस ग्रावेव सोता मधु
षुद्यमीळे॥ त्वं चिन्नः शम्या अग्ने अस्या ऋतस्य बोध्यृतचित्स्वा
धीः॥ कदा त उक्था सधमाद्यानि कदा भवंति सख्या गृहे ते॥ कथा
ह तद्वरुणाय त्वमग्ने कथा दिवे गर्हसे कन्न आगः॥ कथा मित्राय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऋ०सं०३

क

॥४३॥ मीळ्हुषे पृथिव्यै ब्रवः कदर्यम्णे कद्भगाय ॥२०॥ कद्धिष्ण्यासु वृधसा
नो अग्ने कद्वातायप्रतवसे शुभंये ॥ परिज्मने नासत्याय क्षे ब्रवः कद
ग्ने रुद्राय नृघ्ने ॥ कथा महे पुष्टिंभराय पूष्णे कद्रुद्राय सुमखाय ह
विर्दे ॥ कद्विष्णव उरुगायाय रेतो ब्रवः कदग्ने शरवे बृहत्यै ॥ कथा श
र्धाय मरुतामृताय कथा सूरे बृहते पृच्छ्यमानः ॥ प्रति ब्रवोऽदितये
तुराय साधा दिवो जातवेदश्चिकित्वान् ॥ ऋतेन ऋतं नियतमीळ आ
गोरामा सचा मधुमत्पक्वमग्ने ॥ कृष्णा सती रुशता धासिनैषा जाम पर्य
र्येण पयसा पीपाय ॥ ऋतेन हि ष्मा वृषभश्चिदक्तः पुमाँ अग्निः पय ॥४३॥
सा पृष्ठ्येन ॥ अस्पन्दमानो अचरद्वयोधा वृषा शुक्रं दुदुहे पृश्निरूधः ॥ राम
॥२१॥ ऋतेनाद्रिं व्यसन्भिदन्तः समङ्गिरसो नवन्त गोभिः ॥ शुनं नरः

परि षदन्नुषासमाविः स्वरभवज्जाते अग्नौ ॥ ऋतेन देवीरमृता अमृ
क्ता अर्णोभिरापो मधुमद्भिरापो मधुमद्भिरग्ने ॥ वाजी न सर्गेषु प्रस्तु
भानः प्र सदमित्स्रवितवे दधन्युः ॥ मा कस्य यक्षं सदमिद्धुरो गा
मा वेशस्य प्रमिनतो मापेः ॥ मा भ्रातुरग्ने अनृजोर्ऋणं वे मा
सख्युर्दक्षं रिपोर्भुजेम ॥ रक्षा णो अग्ने तव रक्षणेभी रारक्षाणः सुम
ख प्रीणानः ॥ प्रति ष्फुर वि रुज वीड्वंहो जहि रक्षो महि चिद्वावृधानं ॥ ए
भिर्भव सुमना अग्ने अर्कैरिमान्स्पृश मन्मभिः शूर वाजान् ॥ उत
ब्रह्माण्यङ्गिरो जुषस्व सं ते शस्तिर्देववाता जरेत ॥ एता विश्वा विदु
षे तुभ्यं वेधो नीथान्यग्ने निण्या वचांसि ॥ निवचना कवये काव्या
न्यशंसिषं मतिभिर्विप्र उक्थैः ॥२२॥ ॥ कृणुष्व पाजः प्रसितिं न

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्व॰ सं ३

॥४४॥ पृथ्वीं याहि राजेवामवाँ इभेन ॥ तृष्वीमनु प्रसितिं द्रूणानोऽस्तासि विध्य रक्षसस्तपिष्ठैः ॥ तव भ्रमास आशुया पतन्त्यनु स्पृश धृषता शो
शुचानः ॥ तपूंष्यग्ने जुह्वा पतंगानसंदितो वि सृज विष्वगु
३८ ल्काः ॥ प्रति स्पशो वि सृज तूर्णितमो भवा पायुर्विशो अस्या अदब्धः ॥
यो नो दूरे अघशंसो यो अन्त्यग्ने माकिष्टे व्यथिरा दधर्षीत् ॥ उदग्ने ति
ष्ठ प्रत्या तनुष्व न्यमित्राँ ओषतात्तिग्महेते ॥ यो नो अरातिं समिधा
न चक्रे नीचा तं धक्ष्यतसं न शुष्कं ॥ ऊर्ध्वो भव प्रति विध्याध्यस्म
दाविष्कृणुष्व दैव्यान्यग्ने ॥ अव स्थिरा तनुहि यातुजूनां जामिमजामिं
प्र मृणीहि शत्रून् ॥ २४ ॥ ॥ स ते जानाति सुमतिं यविष्ठ य ईवते ब्र ॥४४॥
३ ह्मणे गातुमैरत् ॥ विश्वान्यस्मै सुदिनानि रायो द्युम्नान्यर्यो वि रम

दुरो अभि द्यौत् ॥ सेदग्ने अस्तु सुभगः सुदानुर्यस्त्वा नित्येन हविषा
य उक्थैः ॥ पिप्रीषति स्व आयुषि दुरोणे विश्वेदस्मै सुदिना सासदि
ष्टिः ॥ अर्चामि ते सुमतिं घोष्यर्वाक्सं ते वावाता जरतामियं गीः ॥ स्वश्वा
स्त्वा सुरथा मर्जयेमास्मे क्षत्राणि धारयेरनु द्यून् ॥ इह त्वा भूर्या चरे
दुप त्मन्दोषावस्तर्दीदिवांसमनु द्यून् ॥ क्रीळन्तस्त्वा सुमनसः सपेमा
भि द्युम्ना तस्थिवांसो जनानां ॥ यस्त्वा स्वश्वः सुहिरण्यो अग्न उप
याति वसुमता रथेन ॥ तस्य त्राता भवसि तस्य सखा यस्त आतिथ्य
मानुषग्जुजोषत् ॥ २४ ॥ महो रुजामि बन्धुता वचोभिस्तन्मा पितुर्गो
मा तमादन्वियाय ॥ त्वं नो अस्य वचसश्चिकिद्धि होतर्यविष्ठ सुक्रतो दमू
नाः ॥ अस्वप्नजस्तरणयः सुशेवा अतन्द्रासोऽवृका अश्रमिष्ठाः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥४५॥ ते पायवः सध्रियंचो निषद्याग्ने तव नः पांत्वमूर॥ ये पायवो मामतेयं ते
अग्ने पश्यंतो अंधं दुरितादरक्षन्॥ ररक्ष तान्सुकृतो विश्ववेदा दिप्सं
त इद्रिपवो नाह देभुः॥ त्वया वयं सधन्यास्त्वोतास्तव प्रणीत्यश्या
म वाजान्॥ उभा शंसा सूदय सत्यतातेनुष्ठुया कृणुह्यह्रयाण॥
स अया ते अग्ने समिधा विधेम प्रति स्तोमं शस्यमानं गृभाय॥ दहा
शसो रक्षसः पाह्यस्मान्द्रुहो निदो मित्रमहो अवद्यात्॥२५॥
॥॥ इति तृतीयाष्टके चतुर्थोध्यायः॥ ॥ॐ॥ वैश्वानराय मीळ्हु
षे सजोषाः कथा दाशेमाग्नये बृहद्भाः॥ अनूनेन बृहता वक्षथेनो
प स्तभायदुपमिन्न रोधः॥ मा निंदत य इमां मह्यं रातिं देवो ददौ मर्त्यो ॥४५॥
य स्वधावान्॥ पाकाय गृत्सो अमृतो विचेता वैश्वानरो नृतमो य राम

यह्वो अग्निः॥ साम द्विबर्हा महि तिग्मभृष्टिः सहस्ररेता वृषभस्तु
विष्मान्॥ पदं न गोरपगूळ्हं विविद्वानग्निर्मह्यं प्रेदु वोचन्मनी
स षां॥ प्र तां अग्निर्बभसत्तिग्मजंभस्तपिष्ठेन शोचिषा यः सुराधाः॥ वि
प्र ये मिनंति वरुणस्य धाम प्रिया मित्रस्य चेततो ध्रुवाणि॥
अभ्रातरो न योषणो व्यंतः पतिरिपो न जनयो दुरेवाः॥ पापासः सं पा
तो अनृता असत्या इदं पदमजनता गभीरं॥१॥ ॥इदं मे अग्ने
कियते पावकामिनते गुरुं भारं न मन्म॥ बृहद्दधाथ धृषता गभीरं ग० ७
ए यह्वं पृष्ठं प्रयसा सप्तधातु॥ तमिन्न्वेव समना समानमभि क्रत्वा पुन
ती धीतिरश्याः॥ ससस्य चर्मन्नधि चारु पृश्नेरग्रे रुप आरुपि
तं जबारु॥ प्रवाच्यं वचसः किं मे अस्य गुहा हितमुप निणिग्वदंति॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त॰ सं॰ २

॥४६॥ यदुस्त्रियाणामप वारिव व्रन्याति प्रियं रूपो अग्रं पदं वेः ॥ इत्था सं
न्म हि महान्महन्मनीकमपदुस्त्रिया सचत पूर्व्यं गौः ॥ ऋतस्य प
दे अधि दीद्यानं गुहा रघुष्यद्रघुयद्विवेद ॥ अध द्युतानः पित्रोः
सचासामनुत गुह्यं चारु पृश्नेः ॥ मातुष्पदे परमे अन्ति षद्गोर्वृष्णः
शोचिषः प्रयतस्य जिह्वा ॥२॥ ॥ ऋतं वोचे नमसा पृछ्यमानस्त
वाशसा जातवेदो यदीदं ॥ त्वमस्य क्षयसि यद्ध विश्वं दिवि यदु द्रवि
णं यत्पृथिव्यां ॥ किं नो अस्य द्रविणं कद्ध रत्नं वि नो वोचो जातवे
दश्चिकित्वान् ॥ गुहाध्वनः परमं यन्नो अस्य रेकु पदं न निदाना
अगन्म ॥ कामर्यादा वयुना कद्ध वाममच्छा गमेम रघवो न वा ॥४६॥
जं ॥ कदा नो देवीरमृतस्य पत्नीः सूरो वर्णेन ततनन्नुषासः ॥ अनिरे राम

ण वचसा फल्गुन प्रतीयेन कृधुना तृपासः ॥ अधा ते अग्ने किमिहा वदन्त्य
नायुधास आसता सचन्तां ॥ अस्य श्रिये समिधानस्य वृष्णो वसो रनीकं
दम आ रुरोच ॥ रुशद्वसानः सुदृशीकरूपः क्षितिर्न राया पुरुवारो अद्यौ
त् ॥३॥ ॥ ऊर्ध्व ऊ षु णो अध्वरस्य होतरग्ने तिष्ठ देवताता यजीयान् ॥ त्वं हि वि
श्वमभ्यसि मन्म प्र वेधसश्चित्तिरसि मनीषां ॥ अमूरो होता न्यसादि वि
क्ष्वग्निर्मन्द्रो विदथेषु प्रचेताः ॥ ऊर्ध्वं भानुं सवितेवाश्रेन्मेतेव धूमं स्त
भायदुप द्यां ॥ यता सुजूर्णी रातिनी घृताची प्रदक्षिणिद्देवतातिमुराणः ॥
उदु स्वरुर्नवजा नाक्रः पश्वो अनक्ति सुधितः सुमेकः ॥ स्तीर्णे बर्हिषि स
मिधाने अग्ना ऊर्ध्वो अध्वर्युर्जुजुषाणो अस्थात् ॥ पर्यग्निः पशुपा
वि न होता त्रिविष्ट्येति प्रदिव उराणः ॥ परि त्मना मितद्रुरेति होताग्निर्मन्द्रो

त० सं० ३

५ स्वसारो अग्निं मानुषीषु विक्षु ॥ ५

॥४७॥ मधुव वा ऋतावा॥ द्रवंत्यस्य वाजिनो न शोका भयंते विश्वा भुवनाय दभ्राट्॥
॥४॥ ॥भद्रा ते अग्ने स्वनीक संदृग्घोरस्य सतो विषुणस्य चारुः॥ न य
त्ते शोचिस्तमसा वरंत न ध्वस्मानस्तन्वी३ रेप आ धुः॥ न यस्य सातुर्ज
नितोरवारि न मातरापितरा नू चिदिष्टौ॥ अधा मित्रो न सुधितः पाव
को अग्निर्दीदाय मानुषीषु विक्षु॥ द्विर्यं पंच जीजनं संवसानाः स्वज
ग्मिरेमा हृषा अर्वतीभिः॥ उषर्बुधमथर्यो न दंतं शुक्रं स्वासं परशुं न ६
नतिग्मं॥ तव त्ये अग्ने हरितो घृतस्ना रोहितास ऋज्वंचः स्वंचः॥
अरुषासो वृषण ऋजुमुष्का आ देवतातिमह्वंत दस्माः॥ ये ह त्ये ते
सहमाना अयासस्त्वेषासो अग्ने अर्चयश्चरंति॥ श्येनासो न दुव ॥४७॥
सनासो अर्थं तुविष्वणसो मारुतं न शर्धः॥ अकारि ब्रह्म समिधा राम

न तुभ्यं शंसात्युक्थं यजते व्यू धाः॥ होतारमग्निं मनुषो नि षेदुर्नमस्यंत उ
शिजः शंसमायोः॥ ५॥ अयमिह प्रथमो धायि धातृभिर्होता यजिष्ठो अध्व जि २
रेष्वीड्यः॥ यमप्नवानो भृगवो विरुरुचुर्वनेषु चित्रं विभ्वं विशेविशे॥ अग्ने क
दा त आनुषग्भुवद्देवस्य चेतनं॥ अधा हि त्वा जगृभ्रिरे मर्तासो विक्ष्वीड्यं॥
ऋतावानं विचेतसं पश्यंतो द्यामिव स्तृभिः॥ विश्वेषामध्वराणां हस्कर्ता
रं दमेदमे॥ आशुं दूतं विवस्वतो विश्वा यश्चर्षणीरभि॥ आ जभ्रुः केतुमाय
वो भृगवाणं विशेविशे॥ तमीं होतारमानुषक्चिकित्वांसं नि षेदिरे॥ रण्वं
पावकशोचिषं यजिष्ठं सप्त धामभिः॥ ६॥ ॥ तं शश्वतीषु मातृषु वन
आ वीतमश्रितं॥ चित्रं संतं गुहा हितं सुवेदं कूचिदर्थिनं॥ ससस्य यद्वियु
ता सस्मिन्नूधन्नृतस्य धामन्रणयंत देवाः॥ महाँ अग्निर्नमसा रातहव्यो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥४८॥ वेरध्वराय सदमिदृतावा॥ वेरध्वरस्य दूत्यानि विद्वानुभे अंता रोदसी सं
चिकित्वान्॥ दूत ईयसे प्रदिव उराणो विदुष्टरो दिव आरोधनानि॥ कृष्णं
१ त एम रुशतः पुरो भाश्चरिष्ण्वर्चिर्वपुषामिदेकं॥ यदप्रवीता दधते ह गर्भं स
द्यश्चिज्जातो भवसीदु दूतः॥ सद्यो जातस्य ददृशानमोजो यदस्य वातो अनु
त वाति शोचिः॥ वृणक्ति तिग्मामतसेषु जिह्वां स्थिरा चिदन्ना दयते वि जंभैः॥ तृ
षु यदन्ना तृषुणा ववक्ष तृषुं दूतं कृणुते यह्वो अग्निः॥ वातस्य मेळिं सचते
निजूर्वन्नाशुं न वाजयते हिन्वे अर्वा॥ ७॥ ॥दूतं वो विश्ववेदसं हव्यवाहममर्त्यं
॥यजिष्ठमृंजसे गिरा॥ स हि वेदा वसुधितिं महां आरोधनं दिवः॥ स देवां
एह वक्षति॥ स वेद देव आनमं देवां ऋतायते दमे॥ दाति प्रियाणि चिद्वसु॥ ॥४८॥
स होता सेदु दूत्यं चिकित्वां अंतरीयते॥ विद्वां आरोधनं दिवः॥ ते स्याम ये राम

अग्नये ददाशुर्हव्यदातिभिः॥ य ईं पुष्यंत इंधते॥ ते राया ते सुवीर्यैः ससवांसो
वि शृण्विरे॥ ये अग्ना दधिरे दुवः॥ अस्मे रायो दिवेदिवे सं चरंतु पुरुस्पृहः॥
अस्मे वाजास ईरतां॥ स विप्रश्चर्षणीनां शवसा मानुषाणां॥ अति क्षिप्रे
व विध्यति॥ ८॥ ॥अग्ने मृळ महां असि य ईमा देवयुं जनं॥ इयेथ बर्हिरास
दं॥ स मानुषीषु दूळभो विक्षु प्रावीरमर्त्यः॥ दूतो विश्वेषां भुवत्॥ स सद्म
परि णीयते होता मंद्रो दिविष्टिषु॥ उत पोता नि षीदति॥ उत ग्ना अग्निरध्व त ६
र उतो गृहपतिर्दमे॥ उत ब्रह्मा नि षीदति॥ वेषि ह्यध्वरीयतामुपवक्ता जना
नां॥ हव्या च मानुषाणां॥ वेषीदस्य दूत्यं यस्य जुजोषो अध्वरं॥ हव्यं मर्तस्य
वोळ्हवे॥ अस्माकं जोष्यध्वरमस्माकं यज्ञमंगिरः॥ परि ष्टे दूळभो रथोऽस्मां
अश्नोतु विश्वतः॥ येन रक्षसि दाशुषः॥ ९॥ ॥अग्ने तमद्याश्वं न स्तोमैः
२ अस्माकं शृणुधी हवं॥ २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त०सं०३

भ

॥४९॥ क्रतुं न भद्रं हृदिस्पृशं ॥ ऋध्यामा त ओहैः ॥ अधा ह्यग्ने क्रतोर्भद्रस्य दक्ष
स्य साधोः ॥ रथीर्ऋतस्य बृहतो बभूथ ॥ एभिर्नो अर्कैर्भवा नो अर्वाङ् स्व
र्ण ज्योतिः ॥ अग्ने विश्वेभिः सुमना अनीकैः ॥ आभिष्टे अद्य गीर्भिर्गृ
णंतो ग्ने दाशेम ॥ प्र ते दिवो न स्तनयंति शुष्माः ॥ तव स्वादिष्ठाग्ने संदृष्टिरि
दा चिदह्न इदा चिदक्तोः ॥ श्रिये रुक्मो न रोचत उपाके ॥ घृतं न पूतं तनूर
रेपाः शुचि हिरण्यं ॥ तत्ते रुक्मो न रोचत स्वधावः ॥ कृतं चिद्धि ष्मा सने
मि द्वेषोग्न इनोषि मर्तात् ॥ इत्था यजमानादृतावः ॥ शिवा नः सख्या संतु
भ्रात्राग्ने देवेषु युष्मे ॥ सा नो नाभिः सदने सस्मिन्नूधन् ॥ १० ॥ ॥ भद्रं ते

मु अग्ने सहसिन्ननीकमुपाक आ रोचते सूर्यस्य ॥ रुशद्दृशे ददृशे नक्तया चि ॥४९॥
दरूक्षितं दृश आ रूपे अन्नं ॥ वि षाह्यग्ने गृणते मनीषां खं वेपसा तुविजा राम

स्राम

तस्तवानः ॥ विश्वेभिर्यद्वावनः शुक्र देवैस्तन्नो रास्व सुमहो भूरि मन्म ॥ त्वदग्ने का
व्यास्त्वन्मनीषास्त्वदुक्था जायंते राध्यानि ॥ त्वदेति द्रविणं वीरपेशा इत्थाधि
ये दाशुषे मर्त्याय ॥ त्वद्वाजी वाजंभरो विहाया अभिष्टिकृज्जायते सत्यशुष्मः
॥ त्वद्रयिर्देवजूतो मयोभुस्त्वदाशुर्जूजुवाँ अग्ने अर्वा ॥ त्वामग्ने प्रथमं देवयं
तो देवं मर्ता अमृत मंद्रजिह्वं ॥ द्वेषोयुतमा विवासंति धीभिर्दमूनसं गृहपति
ममूरं ॥ आरे अस्मदमतिमारे अंह आरे विश्वां दुर्मतिं यन्निपासि ॥ दोषा शि
वः सहसः सूनो अग्ने यं देव आ चित्सचसे स्वस्ति ॥ ११ ॥ ॥ यस्त्वामग्न इनध

ह ते यतस्रुक् त्रिस्ते अन्नं कृणवत्सस्मिन्नहन् ॥ स सु द्युम्नैरभ्यस्तु प्रसक्षत्तव व
क्रत्वा जातवेदश्चिकित्वान् ॥ इध्मं यस्ते जभरच्छश्रमाणो महो अग्ने अनी
कमा सपर्यन् ॥ स इधानः प्रति दोषामुषासं पुष्यन्रयिं सचते घ्नन्नमित्रान् ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल०सं०३

ह यच्चिद्धि ते पुरुषत्रा यविष्ठाचित्तिभिश्चकृमा कच्चि
दागः॥

॥५०॥ अग्निरीशे बृहतः क्षत्रियस्याग्निर्वाजस्य परमस्य रायः॥ दधाति रत्नं वि
धते यविष्ठो व्यानुषङ्मर्त्याय स्वधावान्॥ पाकाय गृत्सो अमृतो विचेता वैश्वा
नरो नृतमो यह्वो अग्निः॥ कृधी षु अस्माँ अदितेरनागान्व्येनांसि शि
श्रथो विष्वगग्ने॥ महश्चिदग्न एनसो अभीक ऊर्वाद्देवानामुत मर्त्यानां॥ ॥
मा ते सखायः सदमिद्रिषाम यच्छा तोकाय तनयाय शं योः॥ यथा ह त्यद्वस
वो गौर्यं चित्पदि षिताममुंचता यजत्राः॥ एवो षु अस्मन्मुंचता व्यंहः प्रता
र्यग्ने प्रतरं न आयुः॥ १२॥ ॥ प्रत्यग्निरुषसो जातवेदा अख्यद्देवो रोचमा
ना महोभिः॥ यातमश्विना सुकृतो दुरोणमुत्सूर्यो ज्योतिषा देव एति॥
ऊर्ध्वं भानुं सविता देवो अश्रेद्द्रप्सं दविध्वद्गविषो न सत्वा॥ अनु व्रतं वरुणो ॥५०॥
यंति मित्रो यत्सूर्यं दिव्यारोहयंति॥ यं सीमकृण्वं तमसे विपृचे ध्रुवक्षे राम

ग्नेमख्यद्विभातीनां सुमनो रत्नधेयं॥ ४

मा अनवस्यंतो अर्थं॥ तं सूर्यं हरितः सप्त यह्वीः स्पशं विश्वस्य जगतो व
हंति॥ वहिष्ठेभिर्विहरन्यासि तंतुमवव्ययन्नसितं देव वस्म॥ दविध्वतो
रश्मयः सूर्यस्य चर्मेवावाधुस्तमो अप्स्वा१ंतः॥ अनायतो अनिबद्धः
कथायं न्यङ्ङुत्तानोऽव पद्यते न॥ कया याति स्वधया को ददर्श दिवः स्कंभः
समृतः पाति नाकं॥ १३॥ प्रत्यग्निरुषसो जातवेदा अख्यद्देवो रोचमाना
महोभिः॥ आ नासत्योरुगाया रथेनेमं यज्ञमुप नो यातमच्छ॥ ऊर्ध्वं केतुं
सविता देवो अश्रेज्ज्योतिर्विश्वस्मै भुवनाय कृण्वन्॥ आप्रा द्यावापृ
थिवी अंतरिक्षं वि सूर्यो रश्मिभिश्चेकितानः॥ आवहंत्यरुणीर्ज्योतिषा
गान्मही चित्रा रश्मिभिश्चेकिताना॥ प्रबोधयंती सुविताय देव्यु१षा यं
ईयते सुयुजा रथेन॥ आ वां वहिष्ठा इह ते वहंतु रथा अश्वास उषसो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त॰ सं॰ ३

मा

॥५१॥ व्युष्टौ ॥ इमे हि वां मधुपेयाय सोमा अस्मिन्यज्ञे वृषणा मादयेथां ॥ अ
नायतो ऽनिबद्धः कथायं न्यङ्ङुत्तानोव॰ ॥ १४ ॥ ॥ अग्निर्होता नो
अध्वरे वाजी सन्परिणीयते ॥ देवो देवेषु यज्ञियः ॥ परि त्रिविष्ट्यध्वरं या
त्यग्नी रथीरिव ॥ आ देवेषु प्रयो दधत् ॥ परि वाजपतिः कविरग्निर्हव्यान्य
क्रमीत् ॥ दधद्रत्नानि दाशुषे ॥ अयं यः सृंजये पुरो दैववाते समिध्यते ॥
द्युमाँ अमित्रदंभनः ॥ अस्य घा वीर ईवतो ऽग्नेरीशीत मर्त्यः ॥ तिग्मजंभ
स्य मीळ्हुषः ॥ १५ ॥ ॥ तमर्वंतं न सानसिमरुषं न दिवः शिशुं ॥ मर्मृज्यं
ते दिवेदिवे ॥ बोधद्यन्मा हरिभ्यां कुमारः साहदेव्यः ॥ अच्छा न हूत उ
दरं ॥ उत त्या यजता हरी कुमारात्साहदेव्यात् ॥ प्रयता सद्य आ ददे ॥ ॥५१॥
एष वां देवावश्विना कुमारः साहदेव्यः ॥ दीर्घायुरस्तु सोमकः ॥ तं राम

पु

युवं देवावश्विना कुमारं साहदेव्यं ॥ दीर्घायुषं कृणोतन ॥ १६ ॥ ॥ आ
सत्यो यातु मघवाँ ऋजीषी द्रवंत्वस्य हरय उप नः ॥ तस्मा इदंधः सु
षुमा सुदक्षमिहाभिपित्वं करते गृणानः ॥ अव स्य शूराध्वनो नांते ऽ
स्मिन्नो अद्य सवने मंदध्यै ॥ शंसात्युक्थमुशनेव वेधाश्चिकितुषे
असुर्याय मन्म ॥ कविर्न निण्यं विदथानि साधन्वृषा यत्सेकं विपिपा
२५ नो अर्चात् ॥ दिव इत्था जीजनत्सप्त कारूनह्ना चिच्चक्रुर्वयुना गृणंतः ॥
स्व१र्यद्वेदि सुदृशीकमर्कैर्महि ज्योती रुरुचुर्यद्ध वस्तोः ॥ अंधा मांसि त
दुधिता विचक्षे नृभ्यश्चकार नृतमो अभिष्टौ ॥ ववक्ष इंद्रो अमितमृजी
ष्यु१भे आ पप्रौ रोदसी महित्वा ॥ अतश्चिदस्य महिमा वि रेच्यभि यो वि २
श्वा भुवना बभूव ॥ १७ ॥ ॥ विश्वानि शक्रो नर्याणि विद्वानपो रिरेच सखि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऋ॰सं॰३

दुर्वचोभि

॥५२॥ भिर्निकामैः॥अश्मानं चिद्ये बिभिर्व्रजं गोमंतमुशिजो विवव्रुः॥अपो
वृत्रं वव्रिवांसं पराहन्प्रावत्ते वज्रं पृथिवी सचेताः॥प्रार्णांसि समुद्रियाण्यै
नोः पतिर्भवं छवसा शूर धृष्णो॥अपो यदद्रिं पुरुहूत दर्दराविर्भुवत्सरमा ८३
पूर्व्यं ते॥स नो नेता वाजमा दर्षि भूरिं गोत्रा रुजन्नंगिरोभिर्गृणानः॥अच्छा
कविं नृमणो गा अभिष्टौ स्वर्षाता मघवन्नाधमानं॥ऊतिभिस्तमिषणो
द्युम्नहूतौ नि मायावानब्रह्मा दस्युरर्त॥आ दस्युघ्ना मनसा याह्यस्तं भु
वत्ते कुत्सः सख्ये निकामः॥स्वे योनौ नि षदतं सरूपा वि वां चिकित्सदृत ८
चिद्ध नारी॥१८॥ ॥यासि कुत्सेन सरथमवस्युस्तोदो वातस्य हर्योरीशा
नः॥ऋज्रा वाजं न गध्यं युयूषन्कविर्यदहन्पार्याय भूषात्॥कुत्साय ॥५२॥
शुष्णमशुषं नि बर्हीः प्रपित्वे अह्नः कुयवं सहस्रा॥सद्यो दस्यून्प्र मृण • राम

कुत्स्येन प्र सूरश्चक्रं वृहता दभीके॥त्वं पिप्रुं मृगयं शूशुवांसमृजिश्वने
वैदथिनाय रंधीः॥पंचाशत्कृष्णा नि वपः सहस्रात्कं न पुरो जरिमा वि द
५य र्दः॥सूर उपाके तन्वं दधानो वि यत्ते चेत्यमृतस्य वर्पः॥मृगो न हस्ती तवि
षीमुषाणः सिंहो न भीम आयुधानि बिभ्रत्॥इंद्रं कामा वसूयंतो अग्मन्
५स स्वर्मीळ्हे न सवने चकानाः॥श्रवस्यवः शशमानास उक्थैरोको न रण्वा
सुदृशीव पुष्टिः॥१९॥ ॥तमिद्व इंद्रं सुहवं हुवेम यस्ता चकार नर्या पुरू
णि॥यो मावते जरित्रे गध्यं चिन्मक्षू वाजं भरति स्पार्हराधाः॥तिग्मा यदं
तरशनिः पताति कस्मिंश्चिच्छूर मुहुके जनानां॥घोरा यदर्य समृतिर्भ
वात्यध स्मा नस्तन्वो बोधि गोपाः॥भुवो ऽविता वामदेवस्य धीनां भुवः स
खावृको वाजसातौ॥त्वामनु प्रमतिमा जगन्मोरुशंसो जरित्रे विश्वध

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऋ०सं०३

॥५३॥ स्याः॥ एभिर्नृभिरिंद्र त्वायुभिष्ट्वा मघवद्भिर्मघवन्विश्व आजौ॥ द्यावो
न द्युम्नैरभि संतो अर्यः क्षपो मदेम शरदश्च पूर्वीः॥ एवेदिंद्राय वृषभा
य वृष्णे ब्रह्माकर्म भृगवो न रथं॥ नू चिद्यथा नः सख्या वियोषदसन्न उग्रो था
ऽविता तनूपाः॥ नू ष्टुत इंद्र नू गृणान इषं जरित्रे नद्यो३ न पीपेः॥ अकारि
ते हरिवो ब्रह्म नव्यं धिया स्याम रथ्यः सदासाः॥२०॥ ॥त्वं महाँ इंद्र तुभ्यं
ह क्षा अनु क्षत्रं मंहना मन्यत द्यौः॥ त्वं वृत्रं शवसा जघन्वान्त्सृजः सिंधूँर
हिनाजग्रसानान्॥ तव त्विषो जनिमन्रेजत द्यौ रेजद्भूमिर्भियसा स्वस्य
१ मन्योः॥ ऋघायंत सुभ्वः पर्वतास आर्दन्धन्वानि सरयंत आपः॥ भिन
द्गिरिं शवसा वज्रमिष्णन्नाविष्कृण्वानः सहसान ओजः॥ वधीद्वृत्रं वज्रे ॥५३॥
ण मंदसानः सरन्नापो जवसा हतवृष्णीः॥ सुवीरस्ते जनिमन्यतु द्यौरिं ४ ता १ राम

द्रस्य कर्ता स्वपस्तमो भूत्॥ य ईं जजान स्वर्यं सुवज्रमनपच्युतं सदसो न भू
५२ म॥ य एक इच्च्यावयति प्र भूमा राजा कृष्टीनां पुरुहूत इंद्रः॥ सत्यमेनमनु
विश्वे मदंति रातिं देवस्य गृणतो मघोनः॥२१॥ ॥सत्रा सोमा अभवन्न
स्य विश्वे सत्रा मदासो बृहतो मदिष्ठाः॥ सत्राभवो वसुपतिर्वसूनां दत्रे वि
श्वा अधिथा इंद्र कृष्टीः॥ त्वमध प्रथमं जायमानोऽमे विश्वा अधिथा इंद्र
कृष्टीः॥ त्वं प्रति प्रवत आशयानमहिं वज्रेण मघवन्वि वृश्चः॥ सत्राह
णं दाधृषिं तुम्रमिंद्रं महामपारं वृषभं सुवज्रं॥ हंता यो वृत्रं सनितोत वा
जं दाता मघानि मघवा सुराधाः॥ अयं वृतश्चातयते समीचीर्य आजि
षु मघवा शृण्व एकः॥ अयं वाजं भरति यं सनोत्यस्य प्रियासः सख्ये स्या
१ ज म॥ अयं शृण्वे अध जयन्नुत घ्नन्नयमुत प्र कृणुते युधा गाः॥ यदा सत्यं कु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऋ०सं०३

ये ३ नैभि २

॥५४॥ नुतेभन्युमिंद्रोविश्वंदृळ्हंभयतएजदस्मात्॥२२॥ ॥समिंद्रोगाअज प७
यत्संहिरण्यासमश्वियामघवायोहपूर्वीः॥एभिर्नृभिर्नृतमोअस्यशाकैरा
योविभक्तासंभरश्चवस्वः॥कियत्स्विदिंद्रोअध्येतिमातुःकियत्पितुर्जनि
तुर्योजजान॥योअस्यशुष्मंमुहुकैरियर्तिवातोनजूतस्तनयद्भिरभ्रैः॥
क्षियंतंत्वमक्षियंतंकृणोतीयर्तिरेणुंमघवासमोहं॥विभंजनुरशनिमां
इवद्योरुतस्तोतारंमघवावसौधात्॥अयंचक्रमिषणत्सूर्यस्यन्येतशंरी
रमत्ससृमाणं॥आकृष्णईंजुहुराणोजिघर्तित्वचोबुध्नेरजसोअस्ययो
नौ॥असिक्न्यांयजमानोनहोता॥२३॥ ॥गव्यंतइंद्रंसख्यायविप्रा
अश्वायंतोवृषणंवाजयंतः॥जनीयंतोजनिदामक्षितोतिमाच्यावयामोव ॥५४॥
तेनकोशं॥त्रातानोबोधिदद्दशानआपिरभिख्यातामर्डितासोम्यानां॥ राम

सखापितापितृतमःपितॄणांकर्तेमुलोकमुशतेवयोधाः॥सखीयतामा
विताबोधिसखागृणानइंद्रस्तुवतेवयोधाः॥वयंह्यातेचकृमासबा
धआभिःशमीभिर्महयंतइंद्र॥स्तुतइंद्रोमघवायद्धवृत्राभूरीण्येको
अप्रतीनिहंति॥अस्यप्रियोजरितायस्यशर्मन्नकिर्देवावारयंतेनमर्ताः वा ४
॥एवानइंद्रोमघवाविरप्शीकरत्सत्याचर्षणीधृदनर्वा॥त्वंराजाजनु
षांधेह्यस्मेअधिश्रवोमाहिनंयज्जरित्रे॥नूष्टुत०अकारि०॥२४॥ ॥
अयंपंथाअनुवित्तःपुराणोयतोदेवाउदजायंतविश्वे॥अतश्चिदाज
निषीष्टप्रवृद्धोमामातरममुयापत्तवेकः॥नाहमतोनिरयादुर्गहैतत्ति
रश्चतापार्श्वान्निर्गमाणि॥बहूनिमेअकृताकर्त्वानियुध्यैत्वेनसंत्वेन
पृच्छै॥परायतींमातरमन्वचष्टनानुगान्यनुनूगमानि॥त्वष्टुर्गृहे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्र० सं० ३

॥५५॥ अपिबत्सोममिंद्रः शतधन्यंचम्वोः सुतस्य॥ किंसऋधक्कृणव
राम द्यंसहस्रंमासोजभारशरदश्चपूर्वीः॥ नहीन्वस्यप्रतिमानमस्त्यं
तर्जातेषूतयेजनित्वाः॥ अवद्यमिवमन्यमानागुहाकरिंद्रंमातावी
र्येणान्यृष्टं॥ अथोदस्थात्स्वयमत्कंवसानआरोदसीअपृणाज्जाय
मानः॥२५॥ ॥एताअर्षंत्यललाभवंतीरृतावरीरिवसंक्रोशमानाः
॥एताविपृच्छकिमिदंभनंतिकमापोअद्रिंपरिधिंरुजंति॥ किमु
वि ष्विदस्मैनिविदोभनंतेंद्रस्यावद्यंदिधिषंतआपः॥ ममैतान्पुत्रोमहता
वधेनवृत्रंजघन्वाँअसृजद्विसिंधून्॥ ममच्चनत्वायुवतिःपरासमम म ३
च्चनत्वाकुषवाजगार॥ ममच्चिदापःशिशवेममृड्युर्ममच्चिदिंद्रःसह ॥५५॥
सोदतिष्ठत्॥ ममच्चनतेमघवन्व्यंसोनिविविध्वाँअपहनूजघान॥ राम

अधानिविद्धउत्तरोबभूवांछिरोदासस्यसंपिणग्वधेन॥ गृष्टिः
ससूवस्थविरंतवागामनाधृष्यंवृषभंतुम्रमिंद्रं॥ अरीळ्हंवत्सं
चरथायमातास्वयंगातुंतन्वइच्छमानं॥ उतमातामहिषमन्ववेन
दमीत्वाजहतिपुत्रदेवाः॥ अथाब्रवीद्वृत्रमिंद्रोहनिष्यन्सखेविष्णो
वितरंविक्रमस्व॥ कस्तेमातरंविधवामचक्रच्छयुंकस्त्वामजिघां
सच्चरंतं॥ कस्तेदेवोअधिमार्डीकआसीद्यत्प्राक्षिणाःपितरंपा
दगृह्य॥ अवर्त्याशुनआंत्राणिपेचेनदेवेषुविविदेमर्डितारं॥
अपश्यंजायाममहीयमानामधामेश्येनोमध्वाजभार॥२६॥
॥ ॥इतितृतीयाष्टकेपंचमोध्यायः॥ ॥ॐ॥ ॥एवात्वामिंद्रवज्रिन्न
त्रविश्वेदेवासःसुहवासऊमाः॥ महामुभेरोदसीवृद्धमृष्वंनिरेक

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥५८॥ मिहणानेरत्रहसे॥अवासृजंतुजिव्रयोनदेवाभुवःसम्राळिंद्रसत्ययो
निः॥अहन्नहिंपरिशयानमर्णःप्रवर्तनीररदोविश्वधेनाः॥अतृप्णुवंतंवि व
यतमबुध्यमबुध्यमानंसुषुपाणमिंद्र॥सप्तप्रतिप्रवतआशयानम
हिंवज्रेणविरिणाअपर्वन्॥अक्षोदयच्छवसाक्षामबुध्नंवार्णवातस्त
विषीभिरिंद्रः॥दृळ्हान्यौभ्नादुशमानओजोवाभिनत्ककुभःपर्वतानां
॥अभिप्रदद्रुर्जनयोनगर्भंरथाइवप्रययुःसाकमद्रयः॥अतर्पयोविसृ त
तउब्जऊर्मींस्त्वंवृतांअरिणाइंद्रसिंधून्॥१॥ ॥त्वंमहीमवनिंविश्वधे
नांतुर्वीतयेवय्यायक्षरंतीं॥अरमयोनमसैजदर्णःसुतरणांअकृणो
रिंद्रसिंधून्॥प्राग्रुवोनभन्वोनवक्वाध्वस्राअपिन्वद्युवतीरृतज्ञाः॥ ॥५८॥
न्य धन्वान्यज्राँअपृणक्तृषाणांअधोगिंद्रस्तर्योदंसुपत्नीः॥पूर्वाउषसः राम

शरदश्चपूर्तीर्वृत्रंजघन्वांअसृजद्विसिंधून्॥परिष्ठिताअतृणद्बद्बधा
नाःसीराइंद्रःस्रवितवेपृथिव्या॥वम्रीभिःपुत्रमग्रुवोअदानंनिवेशना
द्धरिवआजभर्थ॥व्यं१धोअख्यदहिमाददानोनिर्भूदुखछित्समरंत
पर्व॥प्रतेपूर्वाणिँविप्राविद्वांआहविदुषेकरांसि॥यथायथावृष्ण्यानि
स्वगूर्तापांसिराजंनर्याविवेषीः॥नूष्टुतइंद्र॥२॥ ॥आनइंद्रोदूरादान
आसादभिष्टिकृदवसेयासदुग्रः॥ओजिष्ठेभिर्नृपतिर्वज्रबाहुःसंगे
समत्सुतुर्वणिःपृतन्यून्॥आनइंद्रोहरिभिर्यात्वच्छार्वाचीनोवसेरा
धसेच॥तिष्ठातिवज्रीमघवाविरप्शीमंयज्ञमनुनोवाजसातौ॥इमंय
ज्ञंत्वमस्माकमिंद्रपुरोदधत्सनिष्यसिक्रतुंनः॥श्वघ्नीववज्रिंत्सन
येधनानांत्वयावयमर्यआजिंजयेम॥उशन्नुषुणःसुमनाउपाकेसोम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्र० सं० ३

२ म

॥५७॥ स्यनुस्पृधुनुस्यस्वधावः॥पाइंद्रप्रतिभृतस्यमध्वः समंधसाममदः पृष्ठ्ये
न॥वियोररप्शऋषिभिर्नवेभिर्वृक्षोनपक्वः सृण्योनजेता॥मर्योनयोषाम
मि भिमन्यमानोछाविवक्मिपुरुहूतमिंद्रं॥३॥ ॥गिरिर्नयः स्वतवांऋष्वइंद्रः स
नादेवसहसेजातउग्रः॥आदर्तावज्रंस्थविरंनभीमउद्नेवकोशंवसुना
न्यृष्टं॥नयस्यवर्ताजनुषान्वस्तिनराधसआमरीतामघस्य॥उद्वावृ
षाणस्तविषीवउग्रास्मभ्यंदद्धिपुरुहूतरायः॥ईशेरायः क्षयस्यचर्ष
णीनामुतव्रजमपवर्तासिगोनां॥शिक्षानरः समिथेषुप्रहावान्वस्वोरा
शिमभिनेतासिभूरिं॥कयातच्छृण्वेशच्याशचिष्ठोययाकृणोतिमुहुका
काविद्दष्वः॥पुरुदाशुषेविचयिष्ठोअंहोथादधातिद्रविणंजरित्रे॥मा ॥५७॥ राम
नोमर्धीराभरादद्धितंनः प्रयोदाशुषेदातवेभूरियत्ते॥नव्येदेष्णेशस्तेअस्मिं

तउक्थेप्रब्रवामवयमिंद्रस्तुवंतः॥नूष्टत॥४॥ ॥आयाहिंद्रोवसउ
पनइहस्तुतः सधमादस्तुशूरः॥वावृधानस्तविषीर्यस्यपूर्वीर्द्यौर्नक्ष
त्रमभिभूतिपुष्यात्॥तस्येदिहस्तवथवृष्ण्यानितुविद्युम्नस्यतुवि
राधसोनॄन्॥यस्यक्रतुर्विदथ्योनसम्राट्साह्वांतरुत्रोअभ्यस्तिकृ
ष्टीः॥आयात्विंद्रोदिवआपृथिव्यामक्षूसमुद्रादुतवापुरीषात्॥स्वर्णरा ग
दवसेनोमरुत्वान्परावतोवासदनादृतस्य॥स्थूरस्यरायोबृहतोयई
शेतमुष्टवामवि[illegible]षिंद्रं॥योवायुनाजयतिगोमतीषुप्रधृष्णुयानय
तिवस्योअच्छ॥उपयोनमोनमसिस्तभायन्नियर्तिवाचंजनयन्यजध्यै
स ॥ऋंजसानः पुरुवारउक्थैरेंद्रंकृण्वीतसदनेषुहोता॥५॥धिषायदिधि
षण्यंतः सरण्यान्सदंतोअद्रिमौशिजस्यगोहे॥आदुरोषाः पास्त्यस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऋ० सं० ३

॥५८॥ होता यो नो महान्त्संवरणेषु वह्निः ॥ सत्रा यदीं भार्वरस्य वृष्णः सिषक्ति शु
ष्म स्तुवते भराय ॥ गुहा यदीमौशिजस्य गोहे प्र यद्धिये प्रायसे मदाय ॥
वि यद्वरांसि पर्वतस्य वृण्वे पयोभिर्जिन्वे अपां जवांसि ॥ विदद्गौरस्य गव
यस्य गोहे यदी वाजाय सुध्यो वहंति ॥ भद्रा ते हस्ता सुकृतोत पाणी प्र
यंतारा स्तुवते राध इंद्र ॥ का ते निषत्तिः किमु नो ममत्सि किं नोदुदु हर्षसे
४ प दातवा उ ॥ एवा वस्व इंद्रः सत्यः सम्राड्ढंता वृत्रं वरिवः पूरवे कः ॥ पुरुष्टुत
क्रत्वा नः शग्धि रायो भक्षीय तेवसो दैव्यस्य ॥ नृष्टुत ॥ ६ ॥ ॥ यन्न इंद्रो जु
जुषे यच्च वष्टि तन्नो महान्करति शुष्म्या चित् ॥ ब्रह्म स्तोमं मघवा सोममु
क्था यो अश्मानं शवसा बिभ्रदेति ॥ वृषा वृषंधिं चतुरश्रिमस्यन्नुग्रो बा ॥५८॥
हुभ्यां नृतमः शचीवान् ॥ श्रिये परुष्णीमुषमाण ऊर्णां यस्याः पर्वाणि स राम

ख्याय विव्ये ॥ यो देवो देवतमो जायमानो महो वाजेभिर्महद्भिश्च शुष्मैः ॥
दधानो वज्रं बाह्वोरुशंतं द्याममेन रेजयत्प्र भूम ॥ विश्वा रोधांसि प्रवतश्च
पूर्वीर्द्यौरृष्वाज्जनिमन्रेजत क्षाः ॥ आ मातरा भरति शुष्म्या गोर्नृवत्प
रिज्मन्नोनुवंत वाताः ॥ ता तू त इंद्र महतो महानि विश्वेष्वित्सवनेषु प्रवाच्या
॥ यच्छूर धृष्णो धृषता दधृष्वानहिं वज्रेण शवसाविवेषीः ॥ ७ ॥ ता तू ते सत्या
तुविनृम्ण विश्वाः प्र धेनवः सिस्रते वृष्ण ऊध्नः ॥ अधा ह त्वद्वृषमणो भिया
नाः प्र सिंधवो जवसा चक्रमंत ॥ अत्राह ते हरिवस्ता उ देवीरवोभिरिंद्र स्त
वंत स्वसारः ॥ यत्सीमनु प्र मुचो बद्बधाना दीर्घामनु प्रसितिं स्यंदयध्यै ॥
पिपीळे अंशुर्मद्यो न सिंधुरा त्वा शमी शशमानस्य शक्तिः ॥ अस्मद्र्यक्
छुशुचानस्य यम्या आशुर्न रश्मिं तुव्योजसं गोः ॥ अस्मे वर्षिष्ठा कृणु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त॰ सं॰ ३ धिगा २

॥५९॥ हि ज्येष्ठानि नृम्णानि सत्रा सहुरे सहांसि॥ अस्मभ्यं वृत्रा सुहनानि रंधि
जहि वधर्वनुषो मर्त्यस्य॥ अस्माकमित्सु शृणु हि त्वमिंद्रास्मभ्यं चि
त्राँ उप माहि वाजान्॥ अस्मभ्यं विश्वा इषणः पुरंधीरस्माकं सु मघवन्बोधि गो
दाः॥ नू ष्टुत इं०॥८॥ ॥कथा महामवृधत्कस्य होतुर्यज्ञं जुषाणो अभि सो
पं:॥ ममूधः॥ पिबन्नुशानो जुषमाणो अंधो ववक्ष ऋष्वः शुचते धनाय॥ को अ
स्य वीरः सधमादमाप समानंश सुमतिभिः को अस्य॥ कदस्य चित्रं चि
कितेकदूती वृधे भुवच्छशमानस्य यज्योः॥ कथा शृणोति हूयमा
नमिंद्रः कथा शृण्वन्नवसामस्य वेद॥ का अस्य पूर्वीरुपमातयो ह कथै
नमाहुः पपुरिं जरित्रे॥ कथा सबाधः शशमानो अस्य नशदभि द्रविणं ॥५९॥
दीध्यानः॥ देवो भुवन्नवेदा म ऋतानां नमो जगृभ्वाँ अभि यज्जुजोषत्॥ राम

सुयं
सकादशानु [illegible]

कथा कदस्या उषसो व्युष्टौ देवो मर्तस्य सख्यं जुजोष॥ कथा कदस्य सख्यं स स
खिभ्यो ये अस्मिन्कामं सुयुजं ततस्रे॥९॥ किमादमत्रं सख्यं सखिभ्यो ये
अस्मिं ते भ्रात्रं प्रब्रवाम॥ श्रिये सुदृशो वपुरस्य सर्गाः स्व१र्ण चित्रतममि
ष आ गोः॥ द्रुहं जिघांसन्ध्वरसमनिंद्रां तेतिक्ते तिग्मा तुजसे अनीका॥ ऋ
णा चिद्यत्र ऋणया न उग्रो दूरे अज्ञाता उषसो बबाधे॥ ऋतस्य हि शुरुधः
संति पूर्वीर्ऋतस्य धीतिर्वृजिनानि हंति॥ ऋतस्य श्लोको बधिरा ततर्द क
र्णा बुधानः शुचमान आयोः॥ ऋतस्य दृळ्हा धरुणानि संति पुरूणि चं
द्रा वपुषे वपूंषि॥ ऋतेन दीर्घमिषणंत पृक्ष ऋतेन गाव ऋतमा विवेशुः
॥ ऋतं येमान ऋतमिद्वनोत्यृतस्य शुष्मस्तुरया उ गव्युः॥ ऋताय पृथ्वी
बहुले गभीरे ऋताय धेनू परमे दुहाते॥ नू ष्टुत इं०॥१०॥ ॥का सुष्टुतिः श

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स२

॥६९॥ वसः सूनुमिंद्रमर्वाचीनं राधस आ ववर्तत ॥ ददिर्हि वीरो गृणते वसूनि स
गोपतिर्निःषिधां नो जनासः ॥ स वृत्रहत्ये हव्यः ईड्यः स स्तुत इंद्रः सत्य
राधाः ॥ स यामन्ना मघवा मर्त्याय ब्रह्मण्यते सुष्वये वरिवो धात् ॥ तमिंन्नरो
विह्वयंते समीके रिरिक्वांसस्तन्वः कृण्वत त्राम् ॥ मिथो यत्त्यागमुभयासो
२ अग्मंन्नरस्तोकस्य तनयस्य साता ॥ क्रतूयंति क्षितयो योग उग्राशुषाणासो
मिथो अर्णसाता ॥ सं यद्विशो ववृत्रंत युध्मा आदिन्नेम इंद्रयंते अभी
दि के ॥ आदिन्नेम इंद्रियं यजंत आदित्पक्तिः पुरोळाशं रिरिच्यात् ॥ आदि
त्सोमो वि पपृच्यादसुष्वीनादिज्जुजोष वृषभं यजध्यै ॥११॥ ॥ कृणोत्य
नो० १ स्मै वरिवो य इत्थेंद्राय सोममुशते सुनोति ॥ सध्रीचीनेन मनसा विवे ॥६०॥
नं तमित्सखायं कृणुते समत्सु ॥ य इंद्राय सुनवत्सोममद्य पचात्पक्तीरुत राम

भृज्जाति धानाः ॥ प्रति मनायोरुचथानि हर्यन्तस्मिन्दधद्वृषणं शुष्ममिंद्रः ॥
यदा समर्यं व्यचेदृघावा दीर्घं यदाजिमभ्यख्यदर्यः ॥ अचिक्रदद्वृषणं पत्न्य
च्छा दुरोण आ निशितं सोमसुद्भिः ॥ भूयसा वस्नमचरत्कनीयो विक्रीतो
अकानिषं पुनर्यन् ॥ स भूयसा कनीयो नारिरेचीद्दीना दक्षा वि दुहंति प्र वा
णं ॥ क इमं दशभिर्ममेंद्रं क्रीणाति धेनुभिः ॥ यदा वृत्राणि जंघनदथैनं मे पु ८५
नर्ददत् ॥ नूष्टुत इं० ॥१२॥ ॥ को अद्य नर्यो देवकाम उशन्निंद्रस्य सख्यं जुजुष
जोष ॥ को वा महेवसे पार्याय समिद्धे अग्नौ सुतसोम ईट्टे ॥ को नानाम वच
सा सोम्याय मनायुर्वा भवति वस्त उस्राः ॥ क इंद्रस्य युज्यं कः सखित्वं को
भ्रात्रं वष्टि कवये क ऊती ॥ को देवानामवो अद्या वृणीते क आदित्याँ अदि
तिं ज्योतिरीट्टे ॥ कस्याश्विनाविंद्रो अग्निः सुतस्यांशोः पिबंति मनसावि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥६१॥ वेनं॥ तस्मा अग्निर्भारतः शर्म यंसज्ज्योक्पश्यात्सूर्यमुच्चरंतं॥ य इंद्राय
सुनवामेत्याह नरे नर्याय नृतमाय नृणां॥ न तं जिनंति बहवो न दभ्रा उर्वस्मा
अदितिः शर्म यंसत्॥ प्रियः सुकृत्प्रिय इंद्रे मनायुः प्रियः सुप्रावीः प्रि
यो अस्य सोमी॥१३॥ ॥ सुप्राव्यः प्राशुषाळेष वीरः सुष्वेः पक्तिं कृणुते
केवलेंद्रः॥ नासुष्वेरापिर्न सखा न जामिर्दुष्प्राव्यो वहंतेत्स्वावः॥ न रेव
ता पणिना सख्यमिंद्रो सुन्वता सुतपाः संगृणीते॥ आस्य वेदः खि
दति हंति नग्नं विसुष्वये पक्तये केवलो भूत्॥ इंद्रं परेवरे मध्यमास इं
द्रं यांतोऽवसितास इंद्रं॥ इंद्रं क्षियंत उत युध्यमाना इंद्रं नरो वाजयंतो इ
हवंते॥१४॥ ॥अहं मनुरभवं सूर्यश्चाहं कक्षीवाँ ऋषिरस्मि विप्रः॥ अ ॥६१॥
हं कुत्समार्जुनेयं न्यृंजेऽहं कविरुशना पश्यता मा॥ अहं भूमिमददामा राम

अहमपो अनयं वावशाना मम देवासो मायन्॥
अनुकेतं

र्याया हं वृष्टिं दाशुषे मर्त्याय॥ अहं पुरो मंदसानो व्यैरं नव साकं नवतीः शं
बरस्य॥ शततमं वेश्यं सर्वताता दिवोदासमतिथिग्वं यदावं॥ प्र सु ष
विभ्यो मरुतो विरस्तु प्र श्येनः श्येनेभ्य आशुपत्वा॥ अचक्रया यत्स्वधया
सुपर्णो हव्यं भरन्मनवे देवजुष्टं॥ भरद्यदि विरतो वेविजानः पथोरुणा म
नोजवा असर्जि॥ तूयं ययौ मधुना सोम्येनोत श्रवो विविदे श्येनो अत्र॥ ऋ
जीपी श्येनो ददमानो अंशुं परावतः शकुनो मंद्रं मदं॥ सोमं भरद्दादृहा
णो देवावान्दिवो अमुष्मादुत्तरादादाय॥ आदाय श्येनो अभरत्सोमं सह
स्रं सवाँ अयुतं च साकं॥ अत्रा पुरंधिरजहादरातीर्मदे सोमस्य मूरा अ
मूरः॥१५॥ गर्भे नु सन्नन्वेषामवेदमहं देवानां जनिमानि विश्वा॥ शतं मा
पुर आयसीररक्षन्नध श्येनो जवसा निरदीयं॥ न घा स मामप जोषं जभा अ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त०सं०३

मा

॥६२॥ राभीमास त्वक्षसा वीर्येण॥ ईर्मा पुरंधिरजहादरातीरुत वातां अतरच्छू
शुवानः॥ अव यच्छ्येनो अस्वनीदध द्योर्वि यद्यदि वात ऊहुः पुरं
धिं॥ सृजद्यदस्मा अव ह क्षिपज्ज्यां कृशानुरस्ता मनसा भुरण्यन्॥ ऋ
जिप्य ईमिंद्रावतो न भुज्युं श्येनो जभार बृहतो अधि ष्णोः॥ अंतः पतत्प
तत्र्यस्य पर्णमध यामनि प्रसितस्य तद्वेः॥ अध श्वेतं कलशं गोभिर
क्तमापिप्यानं मघवा शुक्रमंधः॥ अध्वर्युभिः प्रयतं मध्वो अग्रमिंद्रो म
दाय प्रति धत्पिबध्यै शूरो मदाय प्रति धत्पिबध्यै॥१६॥ ॥त्वायुजा त
व तत्सोम सख्य इंद्रो अपो मनवे सस्रुतस्कः॥ अहन्नहिमरिणात्सप्त
पा सिंधूनपावृणोदपिहितेव खानि॥ त्वायुजा नि खिदत्सूर्यस्येंद्रश्चक्रं सह ॥६२॥
सा सद्य इंदो॥ अधि ष्णुना बृहता वर्तमानं महो द्रुहो अप विश्वायु धायि॥ राम

रावी २

अहन्निंद्रो अदहदग्निरिंदो पुरा दस्यून्मध्यंदिनादभीके॥ दुर्गे दुरोणे क्रत्वा
न यातां पुरू सहस्रा शर्वा नि बर्हीत्॥ विश्वस्मात्सीमधमाँ इंद्र दस्यून्विशो दा
सीरकृणोरप्रशस्ताः॥ अबाधेथाममृणतं नि शत्रूनविंदेथामपचितिं ण ३
तं ४ वधत्रैः॥ एवा सत्यं मघवाना युवं तदिंद्रश्च सोमोर्वमश्व्यं गोः॥ आदर्दृतम
पिहितान्यश्ना रिरिचथुः क्षाश्चित्ततृदाना॥१७॥ ॥आ नः स्तुत उप वाजेभि ने
६ रूती इंद्र याहि हरिभिर्मंदसानः॥ तिरश्चिदर्यः सवना पुरूण्यांगूषेभिर्गृ
णानः सत्यराधाः॥ आ हि ष्मा याति नर्यश्चिकित्वान्हूयमानः सोतृभि
रुप यज्ञं॥ स्वश्वो यो अभीरुर्मन्यमानः सुष्वाणेभिर्मदति सं ह वीरैः॥
श्रावयेदस्य कर्णा वाजयध्यै जुष्टामनु प्र दिशं मंदयध्यै॥ उद्वावृषाणो
राधसे तुविष्मान्करन्न इंद्रः सुतीर्थाभयं च॥ अच्छा यो गंता नाधमान

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऋ०सं०२

॥६३॥ मृतीदृळ्हाविश्वंहवमानंगृणंतं॥उपत्मनिदधानोधुर्याशून्सहस्राणि
शतानिवज्रबाहुः॥त्वोतासोमघवन्निंद्रविप्रावयंतेस्यामसूरयोगृणं
ना२ तः॥भेजानासोबृहद्दिवस्यरायआकाय्यस्यदावनेपुरुक्षोः॥१८॥ ॥नकि
रिंद्रत्वदुत्तरोनज्यायाँअस्तिवृत्रहन्॥नकिरेवायथात्वं॥सत्रातेअ
नुकृष्टयोविश्वाचक्रेववावृतुः॥सत्रामहाँअसिश्रुतः॥विश्वेचनेद
नात्वादेवासइंद्रयुयुधुः॥यदहानक्तमातिरः॥यत्रोतबाधितेभ्यश्च
ऋ क्रंकुत्साययुध्यते॥मुषायइंद्रसूर्यं॥यत्रदेवाँऋघायतोविश्वाँअ
युध्यएकइत्॥त्वमिंद्रवनूँरहन्॥१९॥ ॥यत्रोतमर्त्यायकमरि
णाइंद्रसूर्यं॥प्रावःशचीभिरेतशं॥किमादुतासिवृत्रहन्मघ ॥६३॥
वन्मन्युमत्तमः॥अत्राहदानुमातिरः॥एतद्घेदुतवीर्यमिंद्रच राम

कर्थपौंस्यं॥स्त्रियंयद्दुर्हणायुवंवधीर्दुहितरंदिवः॥दिवश्चिद्घादुहित
रंमहान्महीयमानां॥उषासमिंद्रसंपिणक्॥अपोषाअनसःसरत्सं
पिष्टादहबिभ्युषी॥नियत्सींशिश्नथद्वृषा॥२०॥ ॥एतदस्याअनःश
येसुसंपिष्टंविपाश्या॥ससारसींपरावतः॥उतसिंधुंविबाल्यंवित
स्थानामधिक्षमि॥परिष्ठाइंद्रमायया॥उतशुष्णस्यधृष्णुयाप्रमृ
क्षोअभिवेदनं॥पुरोयदस्यसंपिणक्॥उतदासंकौलितरंबृहतःप
र्वतादधि॥अवाहन्निंद्रशंबरं॥उतदासस्यवर्चिनःसहस्राणिशताव
धीः॥अधिपंचप्रधीँरिव॥२१॥ ॥उतत्यंपुत्रमग्रुवःपरावृक्तंशतक्र
तुः॥उक्थेष्विंद्रआभजत्॥उतत्यातुर्वशायदूअस्नाताराशचीपति रा२
ः॥इंद्रोविद्वाँअपारयत्॥उतत्यासद्यआर्यासरयोरिंद्रपारतः॥अर्णा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऋ॰ सं॰ ३

॥६४॥ चित्ररथावधीः॥ अनु द्वा जहिता नयोंधं श्रोणं च वृत्रहन्॥ न तत्ते सुम्न
मष्टवे॥ शतमश्मन्मयीनां पुरामिंद्रो व्यास्यत्॥ दिवोदासाय दाशुषे॥
॥२२॥ अस्वापयद्दभीतये सहस्रा त्रिंशतं हथैः॥ दासानामिंद्रो मायया॥ स घे
३ दुतासि वृत्रहन्त्समान इंद्र गोपतिः॥ यस्ता विश्वानि चिच्युषे॥ उत नूनं यदिं
द्रियं करिष्या इंद्र पौंस्यं॥ अद्या नकिष्टदा मिनत्॥ वामंवामं त आदुरे देवो ददा
त्वर्यमा॥ वामं पूषा वामं भगो वामं भगो वामं देवः करूळती॥२३॥ ॥ कया नश्चि
त्र आ भुवदूती सदावृधः सखा॥ कया शचिष्ठया वृता॥ कस्त्वा सत्यो मदानां [redacted]
[redacted] मंहिष्ठो मत्सदंधसः॥ दृळ्हा चिदारुजे वसु॥ अभी षु णः सखीनामवि
ता जरितॄणां॥ शतं भवास्यूतिभिः॥ अभी न आ ववृत्स्व चक्रं न वृत्तमर्वतः॥
नियुद्भिश्चर्षणीनां॥ प्रवता हि क्रतूनामा हा पदेव गच्छसि॥ अभक्षि सूर्ये स ॥६५॥
चा॥२४॥ ॥ सं यत्त इंद्र मन्यवः सं चक्राणि दधन्विरे॥ अध त्वे अध सूर्ये॥ उ राम

त स्मा हि त्वा भाकुरिन्मघवानं शचीपते॥ दाता रमविदीधयुं॥ उत स्मा सद्य
इत्परि शशमानाय सुन्वते॥ पुरू चिन्मंहसे वसु॥ नहि ष्मा ते शतं चन
राधो वरंत आमुरः॥ न च्यौत्नानि करिष्यतः॥ अस्माँ अवंतु ते शतमस्मा
न्त्सहस्रमूतयः॥ अस्मान्विश्वा अभिष्टयः॥२५॥ ॥ अस्माँ इहा वृणीष्व
सख्याय स्वस्तये॥ महो राये दिवित्मते॥ अस्माँ अविड्ढि विश्वहेंद्र राया प
रीणसा॥ अस्मान्विश्वाभिरूतिभिः॥ अस्मभ्यं ताँ अपा वृधि व्रजाँ अ
स्तेव गोमतः॥ नवाभिरिंद्रोतिभिः॥ अस्माकं धृष्णुया रथो द्युमाँ इंद्रान
पच्युतः॥ गव्युरश्वयुरीयते॥ अस्माकमुत्तमं कृधि श्रवो देवेषु सूर्य॥ व
र्षिष्ठं द्यामिवोपरि॥२६॥ ॥ आ तू न इंद्र वृत्रहन्नस्माकमर्धमा गहि॥
महान्महीभिरूतिभिः॥ भृमिश्चिद्घासि तूतुजिरा चित्र चित्रिणीष्वा॥ वि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥६५॥ त्रंकृणोष्यूतये॥ दभ्रेभिश्चिच्छशीयांसंहंसिव्राधंतमोजसा॥ सखिभिर्ये
त्वेसचा॥ वयमिंद्रत्वेसचावयंत्वाभिनोनुमः॥ अस्मांअस्मांइदुदव॥ सन
सनश्चित्राभिरद्रिवोनवद्याभिरद्रिवोनवद्याभिरूतिभिः॥ अनाधृष्टाभि
रागहि॥२७॥ ॥भूयामोषुत्वावतः सखायइंद्रगोमतः॥ युजोवाजायघृष्व
ये॥ त्वंह्येकईशिषइंद्रवाजस्यगोमतः॥ सनोयंधिमहीमिषं॥ नत्वावरं
तेअन्यथायद्दित्ससिस्तुतोमघं॥ स्तोतृभ्यइंद्रगिर्वणः॥ अभित्वागोत
मागिरानूषतप्रदावने॥ इंद्रवाजायघृष्वये॥ प्रतेवोचामवीर्या३यामंदसा
नआरुजः॥ पुरोदासीरभीत्य॥२८॥ ॥तातेगृणंतिवेधसोयानिचकर्थ
पौंस्या॥ सुतेष्विंद्रगिर्वणः॥ अवीवृधंतगोतमाइंद्रत्वेस्तोमवाहसः॥ ऐषुधा॥ ॥६५॥
वीरवद्यशः॥ यच्चिद्धिशश्वतामसींद्रसाधारणस्त्वं॥ तंत्वावयंहवामहे॥ राम

अर्वाचीनोवसोभवास्मेसुमत्स्वांधसः॥ सोमानामिंद्रसोमपाः॥ अस्माकं
त्वामतीनामास्तोमइंद्रयच्छतु॥ अर्वागावर्तयाहरी॥ पुरोळाशंचनोघसो
जोषयासेगिरश्चनः॥ वधूयुरिवयोषणां॥२९॥ ॥सहस्रंव्यतीनांयुक्ता
नामिंद्रमीमहे॥ शतंसोमस्यखार्यः॥ सहस्रातेशतावयंगवामाच्यावया
मसि॥ अस्मत्राराधएतुते॥ दशतेकलशानांहिरण्यानामधीमहि॥ भू
रिदाअसिवृत्रहन्॥ भूरिदाभूरिदेहिनोमादभ्रंभूर्याभर॥ भूरिघेदिंद्र
दित्ससि॥ भूरिदाह्यसिश्रुतःपुरुत्राशूरवृत्रहन्॥ आनोभजस्वराधसि
॥ प्रतेबभ्रूविचक्षणशंसामिगोषणोनपात्॥ माभ्यांगाअनुशिश्रथः
॥ कनीनकेवविद्रधेनवेद्रुपदेअर्भके॥ बभ्रूयामेषुशोभेते॥ अरंमउस्रया
म्णेरमनुस्रयाम्णे॥ बभ्रूयामेष्वस्रिधा॥३०॥ ॥ इतितृतीयाष्टकेषष्ठोध्यायः॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त•सं•३

॥९६॥ ॐ॥ प्रऋभुभ्योदूतमिववाचमिष्यउपस्तिरेश्वैतरींधेनुमीळे॥ येवातजू
तास्तरणिभिरेवैःपरिद्यांसद्योअपसोबभूवुः॥ यदारमक्रन्नृभवःपितृ
भ्यांपरिविष्टीवेषणादंसनाभिः॥ आदिद्देवानामुपसख्यमायंधीरासः
पुष्टिमवहन्मनायै॥ पुनर्येचक्रुःपितरायुवानासनायूपेवजरणाशया
ना॥ तेवाजोविभ्वाँऋभुरिंद्रवंतोमधुप्सरसोनोवंतुयज्ञं॥ यत्संवत्समृभ
वोगामरक्षन्यत्संवत्समृभवोमाअपिंशन्॥ यत्संवत्समभरन्भा
त सोअस्यास्ताभिःशमीभिरमृतत्वमाशुः॥ ज्येष्ठआहचमसाद्वाकरेति
कनीयांत्रीन्कृणवामेत्याह॥ कनिष्ठआहचतुरस्करेतित्वष्टऋभवस्त
त्पनयद्वचोवः॥१॥ ॥सत्यमूचुर्नरएवाहिचक्रुरनुस्वधामृभवोजग्मुरे ॥९६॥
तां॥ विभ्राजमानांश्चमसाँअहेवावेनत्त्वष्टाचतुरोददृश्वान्॥ द्वादशद्यून् राम

५ येहरीमेधयोक्थामदंत ५ जुवंविश्व

यदगोह्यस्यातिथ्येरणन्नृभवःससंतः॥ सुक्षेत्राकृण्वन्ननयंतसिंधून्ध
न्वातिष्ठन्नोषधीर्निम्नमापः॥ रथंयेचक्रुःसुवृतंनरेष्ठांयेधेनुंविश्वरू
पां॥ तआतक्षंत्वृभवोरयिंनःस्ववसःस्वपसःसुहस्ताः॥ अपोह्येषा
मजुषंतदेवाअभिक्रत्वामनसादीध्यानाः॥ वाजोदेवानामभवत्सुकर्में
द्रस्यऋभुक्षावरुणस्यविभ्वा॥ ~~वाजोदेवानामभवत्सुकर्म~~ इंद्रायचक्रुःसु
युजायेअश्वा॥ तेरायस्पोषंद्रविणान्यस्मेधत्तऋभवःक्षेमयंतोनमित्रं
॥इदाह्नःपीतिमुतवोमदंधुर्नऋतेश्रांतस्यसख्यायदेवाः॥ तेनूनमस्मे
ऋभवोवसूनितृतीयेअस्मिन्त्सवनेदधात॥२॥ ॥ऋभुर्विभ्वावाजइंद्रोनो
अच्छेमंयज्ञंरत्नधेयोपयात॥ इदाहिवोधिषणादेव्यह्नामधात्पीतिंसंम
वा १ दाअग्मतावः॥ विदानासोजन्मनोवाजरत्नाउतऋतुभिरृभवोमादयध्वं॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥६७॥ संवो मदा अग्मत संपुरंधिः सुवीराम स्मे रयिमेरयध्वं ॥ अयं वो यज्ञ ऋभ
वोकारि यमा मनुष्वत्प्रदिवो दधिध्वे ॥ प्र वोच्छा जुजुषाणासो अस्थुरभूत वि
श्वे अग्रियोत वाजाः ॥ अभू दु वो विधते रत्नधेयमिदा नरो दाशुषे मर्त्याय
४ ददेवो ॥ पिबत वाजा ऋभवो ददे वो महि तृतीयं सवनं मदाय ॥ आ वाजा यातोप न ऋ
भुक्षा महो नरो द्रविणसो गृणानाः ॥ आ वः पीतयो भिपित्वे अह्नामिमा अ
स्तं नवस्व इव ग्मन् ॥३॥ ॥ आ नपातः शवसो यातनोपेमं यज्ञं नमसा हूय
य मानाः ॥ सजोषसः सूरयो यस्य च स्थ मध्वः पात रत्नधा इंद्रवंतः ॥ सजोषा इं
द्र वरुणेन सोमं सजोषाः पाहि गिर्वणो मरुद्भिः ॥ अग्रेपाभिर्ऋतुपाभिः
सजोषा ग्नास्पत्नीभी रत्नधाभिः सजोषाः ॥ सजोषस आदित्यैर्मादय ॥६७॥
ध्वं सजोषस ऋभवः पर्वतेभिः ॥ सजोषसो दैव्येना सवित्रा सजोषसः सिं राम

धुभी रत्नधेभिः ॥ ये अश्विना ये पितरा य ऊती धेनुं ततक्षुर्ऋभवो ये अश्वा ॥ ये
अंसत्रा य ऋधग्रोदसी ये विभ्वो नरः स्वपत्यानि चक्रुः ॥ ये गोमंतं वाजवंतं
२ सुवीरं रयिं धत्थ वसुमंतं पुरुक्षुं ॥ ते अग्रेपा ऋभवो मंदसाना अस्मे धत्त ये च
रातिं गृणंति ॥ नापाभूत न वोतीतृषामानिःशस्ता ऋभवो यज्ञे अस्मिन् ॥
समिंद्रेण मदथ सं मरुद्भिः सं राजभी रत्नधेयाय देवाः ॥४॥ ॥ इहोप यात शव
सो नपातः सौधन्वना ऋभवो माप भूत ॥ अस्मिन् हि वः सवने रत्नधेयं गमंत्विं
द्रमनु वो मदासः ॥ आगन्नृभूणामिह रत्नधेयमभूत्सोमस्य सुषुतस्य पीतिः
॥ सुकृत्यया यत्स्वपस्यया चा एकं विचक्र चमसं चतुर्धा ॥ व्यकृणोत चमसं
न चतुर्धा सखे वि शिक्षेत्यब्रवीत ॥ अथैत वाजा अमृतस्य पंथां गणं देवानामृ
भवः सुहस्ताः ॥ किंमयः स्विच्चमस एष आस यं काव्येन चतुरो विचक्र ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त० सं० २

॥६७॥ अथा सुनुध्वं सवनं मदाय पात ऋभवो मधुनः सोम्यस्य ॥ शच्याकर्त पित
रायुवाना शच्याकर्त चमसं देवपानं ॥ शच्याहरी धनुतरावतष्टेंद्रवाहाव
२ वा भवो वाजरत्नाः ॥५॥ ॥ यो वः सुनोत्यभिपित्वे अह्नां तीव्रं वाजासः सवनं मदा
य ॥ तस्मै रयिमृभवः सर्ववीरमा तक्षत ऋभवो मंदसानाः ॥ प्रातः सुतमपि प्र वृषणो
बो हर्यश्व माध्यंदिनं सवनं केवलं ते ॥ समृभुभिः पिबस्व रत्नधेभिः सखी
यां इंद्र चकृषे सुकृत्या ॥ ये देवासो अभवता सुकृत्या श्येना इवेदधि दिवि नि कृ
षेद ॥ ते रत्नं धात शवसो नपातः सौधन्वना अभवतामृतासः ॥ यत्तृतीयं स
णु वनं रत्नधेयमकृणुध्वं स्वपस्या सुहस्ताः ॥ तदृभवः परिषिक्तं व एतत्सं मदेभी
रिंद्रियेभिः पिबध्वं ॥६॥ ॥ अनश्वो जातो अनभीशुरुक्थ्यो रथस्त्रि ॥६८॥
चक्रः परि वर्तते रजः ॥ महत्तद्वो देव्यस्य प्रवाचनं द्यामृभवः पृथिवीं यच्च म रा

४ मरिणीतधीतिभिः ९

पुष्यथ ॥ रथं ये चक्रुः सुवृतं सुचेतसोविह्वरंतं मनसस्परि ध्यया ॥ तां ऊन्वा स्य सु
स्य सवनस्य पीतय आ वो वाजा ऋभवो वेदयामसि ॥ तद्वो वाजा ऋभवः सुप्रवा
चनं देवेषु विभ्वो अभवन्महित्वनं ॥ जिव्री यत्संता पितरा सनाजुरा पुनर्युवाना
चरथाय तक्षथ ॥ एकं वि चक्र चमसं चतुर्वयं निश्चर्मणो ऋभवा गामपिंशत गा ४
दे यया धिया गामरिणीत चर्मणः ॥ अथा देवेष्वमृतत्वमानश श्रुष्टी वाजा ऋभवः
स्तद्व उक्थ्यं ॥ ऋभुतो रयिः प्रथमश्रवस्तमो वाजश्रुतासो यमजीजनन्नरः ॥
६ म विभ्वतष्टो विदथेषु प्रवाच्यो यं देवासो वथा स विचर्षणिः ॥७॥ ॥ स वाज्यर्वा स व
ऋषिर्वचस्यया स शूरो अस्ता पृतनासु दुष्टरः ॥ स रायस्पोषं स सुवीर्यं दधे यं
भ वाजो विभ्वां ऋभवो यमाविषुः ॥ श्रेष्ठं वः पेशो अधि धायि दर्शतं स्तोमो वाजा ऋ
भवस्तं जुजुष्टन ॥ धीरासो हि ष्ठा कवयो विपश्चितस्तान्व एना ब्रह्मणा वेद

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त॰सं॰३

॥६९॥ यामसि॥ यूयमस्मभ्यंधिषणाभ्यस्परिविद्वांसोविश्वानर्याणिभोजना॥
द्युमंतंवाजंवृषशुष्ममुत्तममानोरयिमृभवस्तक्षतावयः॥इहप्रजामिहरयिं
रराणाइहश्रवोवीरवत्तक्षतानः॥येनवयंचितयेमात्यन्यांतंवाजंचित्रमृभ
ध्व वोददानः॥८॥ ॥उपनोवाजाअध्वरमृभुक्षादेवायातपथिभिर्देवयानैः॥यथा
यज्ञंमनुषोविक्ष्वासुदधिध्वेरण्वाःसुदिनेष्वह्नां॥तेवोहृदेमनसेसंतुयज्ञा
सो जुष्टासोअद्यघृतनिर्णिजोगुः॥प्रवःसुतासोहरयंतपूर्णाःक्रत्वेदक्षायहर्षयं
तपीताः॥त्र्युदायंदेवहितंयथावस्तोमोवाजाऋभुक्षणोददेवः॥जुह्वेमनु
ष्वदुपरासुविक्षुयुष्मेसचाबृहद्दिवेषुसोमं॥पीवोअश्वाःशुचद्रथाहिभूता
यःशिप्रावाजिनःसुनिष्काः॥इंद्रस्यसूनोशवसोनपातोनुवश्चेत्यग्रियं ॥६९॥
मभु१ मदाय॥ऋभुमृभुक्षणोरयिंवाजेवाजिंतमंयुजं॥इंद्रस्वंतंहवामहेसदासातमम राभ्र

श्विनं॥१॥ ॥सेदृभवोयमवथयूयमिंद्रश्चमर्त्यं॥सधीभिरस्तुसनिता
मेधसातासोअर्वता॥विनोवाजाऋभुक्षणःपथश्चितनयष्टवे॥अस्म
२ भ्यंसूरयस्तुताविश्वाआशास्तरीषणि॥तन्नोवाजाऋभुक्षणइंद्रनास
त्यारयिं॥समश्वंचर्षणिभ्यआपुरुशस्तमघत्तये॥१०॥ ॥उतोहिवां
दात्रासंतिपूर्वायापूरुभ्यस्त्रसदस्युर्नितोशे॥क्षेत्रासांददथुरुर्वरा
सांघनंदस्युभ्योअभिभूतिमुग्रं॥उतवाजिनंपुरुनिःषिध्वानंदधिक्रा
मुददथुर्विश्वकृष्टिं॥ऋजिप्यंश्येनंप्रुषितप्सुमाशुंचर्कृत्यमर्योनृपतिंनशूरं॥
यंसीमनुप्रवतेवद्रवंतंविश्वःपूरुर्मदतिहर्षमाणः॥पड्भिर्गृध्यंतंमेधयुंनशू
रंरथतुरंवातमिवध्रजंतं॥यस्मारुंधानोगध्यासमत्सुसनुतरश्चरतिगोषुगछ त
न्॥आविरृजीकोविदथानिचिक्यत्तिरोअरतिंपर्यापआयोः॥उतस्मैनंवस्त्र
मथिंनतायुमनुक्रोशंतिक्षितयोभरेषु॥नीचायमानंजसुरिंनश्येनंश्रवश्चा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऋ० सं० ३

॥९ श्वांपशुमच्च यूथं ॥ ११ ॥ ॥ उत स्मासु प्रथमः सरिष्यन्निवेवेति श्रेणिभी रथानां ॥
॥७०॥ स्रजं कृण्वानो जन्यो न शुभ्वा रेणुं रेरिहत्किरणं ददश्वान् ॥ उत स्य वाजी सहुरि
र्ऋतावा शुश्रूषमाणस्तन्वा समर्ये ॥ तुरं यतीषु तुरयन्नृजिप्योधि भ्रुवोः किर भु
स्य ते रेणुमृंजन् ॥ उत स्मास्य तन्यतोरिव द्योर्ऋघायतो अभियुजो भयंते ॥ यदा सह
स्रमभिषीमयोधीद्दुर्वर्तुः स्मा भवति भीम ऋंजन् ॥ उत स्मास्य पनयंति जना
जूतिं कृष्टिप्रो अभिभूतिमाशोः ॥ उतैनमाहुः समिथे वियंतः परा दधिक्रा अ
सरत्सहस्रैः ॥ आ दधिक्राः शवसा पंच कृष्टीः सूर्य इव ज्योतिषापस्ततान ॥ सहस्र
साः शतसा वाज्यर्वा पृणक्तु मध्वा समिमा वचांसि ॥ १२ ॥ ॥ आशुं दधिक्रां तमु
आशुं दधिक्रां तमु थिव्या उत चर्किराम ॥ उच्छंतीर्मामुषसः सूदयंत्वति विश्वानि
दुरितानि पर्षन् ॥ महश्चर्कर्म्यर्वतः क्रतुप्रा दधिक्राव्णः पुरुवारस्य वृष्णः ॥ यं पू ॥७०॥
रुभ्यो दीदिवांसं नाग्निं ददथुर्मित्रावरुणा ततुरिं ॥ यो अश्वस्य दधिक्राव्णो अको राम
४ नुष्टवाम दिवस्पृथिव्या उत चर्किराम ॥ ४

रु मे

२ दधिक्राव्ण इष ऊर्जो महो यदमन्महि मरुतां नाम भद्रं ॥ २

रीत्समिद्धे अग्ना उषसो व्युष्टौ ॥ अनागसं तमदितिः कृणोतु स मित्रेण वरु
णेना सजोषाः ॥ स्वस्तये वरुणं मित्रमग्निं हवामह इंद्रं वज्रबाहुं ॥ इंद्रमिवे
दुभये विह्वयंत उदीराणा यज्ञमुपप्रयंतः ॥ दधिक्रामु सूदनं मर्त्याय ददथुर्मि
त्रावरुणा नो अश्वं ॥ दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः ॥ सुरभि नो
मुखा करत्प्रण आयूंषि तारिषत् ॥ १३ ॥ दधिक्राव्ण इदु नु चर्किराम विश्वा
इन्मामुषसः सूदयंतु ॥ अपामग्नेरुषसः सूर्यस्य बृहस्पतेरांगिरसस्य जि
ष्णोः ॥ सत्वा भरिषो गविषो दुवन्यसच्छ्रवस्यादिष उषसस्तुरण्यसत् ॥ स
त्यो द्रवो द्रवरः पतंगरो दधिक्रावेषमूर्जं स्वर्जनत् ॥ उत स्मास्य द्रवतस्तुर
ण्यतः पर्णं न वेरनु वाति प्रगर्धिनः ॥ श्येनस्येव ध्रजतो अंकसं परि दधि
क्राव्णः सहोर्जा तरित्रतः ॥ उत स्य वाजी क्षिपणिं तुरण्यति ग्रीवायां बद्धो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऋ० सं० ३

स२

॥७१॥ अपिकक्षआसनि॥ क्रतुं दधिक्रा अनु संतवीत्वत्पथामंकांस्यन्वापनी
फणत्॥ हंसः शुचिषद्वसुरंतरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत्॥ नृ
षद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं॥१४॥ ॥ इंद्रा
को वां वरुणा सुम्नमाप स्तोमो हविष्मां अमृतो न होता॥ यो वां हृदि क्रतु
स्य ५ मां अस्मदुक्तः पस्पर्शदिंद्रावरुणा नमस्वान्॥ इंद्रा ह यो वरुणा चक्र आपी हृ५
देवौ मर्तः सख्याय प्रयस्वान्॥ स हंति वृत्रा समिथेषु शत्रूनवोभिर्वा महद्
भिः स प्र शृण्वे॥ इंद्रा ह रत्नं वरुणा धेष्ठेत्था नृभ्यः शशमानेभ्यस्ता॥ य
दी सखाया सख्याय सोमैः सुतेभिः सुप्रयसा मादयैते॥ इंद्रा युवं वरुणा
दिद्युमस्मिन्नोजिष्ठमुग्रा नि वधिष्टं वज्रं॥ यो नो दुरेवो वृकतिर्दभीतिस्त ॥७१॥
स्मिन्मिमाथामभिभूत्योजः॥ इंद्रा युवं वरुणा भूतमस्या धियः प्रेतारा वृष इम

भेव धेनोः॥ सा नो दुहीयद्यवसेव गत्वी सहस्रधारा पयसा मही गौः॥१५॥ ॥
तोके हिते तनय उर्वरासु सूरो दृशीके वृषणश्च पौंस्ये॥ इंद्रा नो अत्र वरुणा
स्यातामवोभिर्दस्मा परितक्म्यायां॥ युवामिद्ध्यवसे पूर्व्याय परि प्रभूती
गविषः स्वापी॥ वृणीमहे सख्याय प्रियाय शूरा मंहिष्ठा पितरेव शंभू॥ ता
वां धियोऽवसे वाजयंतीराजिं न जग्मुर्युवयूः सुदानू॥ श्रिये न गाव उप सोममस्
थुरिंद्रं गिरो वरुणं मे मनीषाः॥ इमा इंद्रं वरुणं मे मनीषा अग्मन्नुप द्रविणमिच्छ
मानाः॥ उपेमस्थुर्जोष्टार इव वस्वो रघ्वीरिव श्रवसो भिक्षमाणाः॥ अश्व्यस्य त्म
ना रथ्यस्य पुष्टेर्नित्यस्य रायः पतयः स्याम॥ ता चक्राणा ऊतिभिर्नव्यसीभिरस्म
त्रा रायो नियुतः सचंतां॥ आ नो बृहंता बृहतीभिरूती इंद्र यातं वरुण वाजसातौ॥
यद्दिद्यवः पृतनासु प्रक्रीळांतस्य वां स्याम सनितार आजेः॥१६॥ ॥ मम द्वि
ता राष्ट्रं क्षत्रियस्य विश्वायोर्विश्वे अमृता यथा नः॥ क्रतुं सचंते वरुणस्य देवा राजा

स्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त० सं० ३

॥७२॥ मि कृष्टेरुपमस्य वव्रेः॥ अहं राजा वरुणो मह्यं तान्यसुर्याणि प्रथमा धारयंत॥
क्रतुं सचंते वरुणस्य देवा०॥ अहमिंद्रो वरुणस्ते महित्वोर्वी गभीरे रजसी सुमे
के॥ त्वष्टेव विश्वा भुवनानि विद्वान्त्समैरयं रोदसी धारयं च॥ अहमपो अपिन्व
मुक्षमाणा धारयं दिवं सदन ऋतस्य॥ ऋतेन पुत्रो अदितेर्ऋतावोत त्रिधातु प्रथ
यद्वि भूम॥ मां नरः स्वश्वा वाजयंतो मां वृताः समरणे हवंते॥ कृणोम्याजिं मघ
वाहमिंद्र इयर्मि रेणुमभिभूत्योजाः॥१७॥ ॥अहं ता विश्वा चकरं नकिर्मा दैव्यं स
हो वरते अप्रतीतं॥ यन्मा सोमासो ममदन्यदुक्थोभे भयेते रजसी० अपारे॥ वि
व८ दुष्टे विश्वा भुवनानि तस्य ता प्र ब्रवीषि वरुणाय वेधः॥ त्वं वृत्राणि शृण्विषे जघन्वां
त्वं वृतां अरिणा इंद्र सिंधून्॥ अस्माकमत्र पितरस्त आसन्त्सप्त ऋषयो दौर्गहे ब
ध्यमाने॥ त आयजंत त्रसदस्युमस्या इंद्रं न वृत्रतुरमर्द्धदेवं॥ पुरुकुत्सानी हि ॥७२॥
वामदाशद्धव्येभिरिंद्रावरुणा नमोभिः॥ अथा राजानं त्रसदस्युमस्या वृत्रहणं राम

दस्युरर्धदेवं॥ राया वयं ससवांसो मदेम हव्येन देवा यवसेन गावः॥ तां धेनु
मिंद्रावरुणा युवं नो विश्वाहा धत्तमनपस्फुरंतीं॥१८॥ ॥क उ श्रवत्कतमो
वा ३ यज्ञियानां वंदारु देवः कतमो जुषाते॥ कस्येमां देवीममृतेषु प्रेष्ठां हृदि श्रेषा
म सुष्टुतिं सुहव्यां॥ को मृळाति कतम आगमिष्ठो देवानामु कतमः शं
भविष्ठः॥ रथं कमाहुर्द्रवदश्वमाशुं यं सूर्यस्य दुहितावृणीत॥ मक्षू हि ष्मा णी
गच्छथ ईवतो द्यूनिंद्रो न शक्तिं परितक्म्यायां॥ दिव आजाता दिव्या सुप
र्णा कया शचीनां भवथः शचिष्ठा॥ का वां भूदुपमातिः कया न आश्वि
ना गमथो हूयमाना॥ को वां महश्चित्त्यजसो अभीक उरुष्यतं माध्वी दस्रा
न ऊती॥ उरु वां रथः परि नक्षति द्यामा यत्समुद्रादभि वर्तते वां॥ मध्वा मा
ध्वी मधु वां प्रुषायन्यत्सीं वां पृक्षो भुरजंत पक्वाः॥ सिंधुर्ह वां रसया

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऋ० सं० ३

गम ना २

॥७३॥ सिंधुर्ह्वान्घृणावयोरुषासः परिज्मन्न॥ तदूषुवामजिरंचेतियानंयेन
पतीभवथः सूर्यायाः॥ इहेहयद्वांसमनापपृक्षेसेयमस्मेसुमतिर्वा
जरत्ना॥ उरुष्यतंजरितारंयुवंहश्रितः कामोनासत्यायुवद्रिक्॥ ॥ दि २
म ॥११॥ ॥ तंवांरथंवयमद्याहुवेमपृथुज्रयमश्विनासंगतिंगोः॥ यः सू
र्यांवहतिवंधुरायुर्गिर्वाहसंपुरुतमंवसूयुं॥ युवंश्रियमश्विनादेवतातांदि
वोनपातावनथः शचीभिः॥ युवोर्वपुरभिपृक्षः सचंतेवहंतियत्ककुहासो
रथेवां॥ कोवामद्याकरतेरातहव्यऊतयेवासुतपेयायवार्कैः॥ ऋतस्यवा य ७
वनुषेपूर्व्यायनमोयेमानोअश्विनावर्वर्तत्॥ हिरण्ययेनपुरुभूरथे
२ स्य नेमंयज्ञंनासत्योपयातं॥ पिबाथइन्मधुनः सोम्यस्यदधथोरत्नंविधते ॥७२॥
जनाय॥ आनोयातंदिवोअच्छापृथिव्याहिरण्ययेनसुवृतारथेन॥ मा राम

धो २

वामन्येनियमंदेवयंतः संयद्ददेनाभिःपूर्व्यावां॥ नूनोरयिंपुरुवीरंबृहंतं
मा दस्रामिमाथामुभयेष्वस्मे॥ नरोयद्वामश्विनास्तोममावन्त्सधस्तुतिमाज
मीळ्हासोअग्मन्॥ इहेहयद्वां०॥ उरुष्यतं०॥२०॥ ॥एषस्यभानुरुदि
यर्तियुज्यतेरथः परिज्मादिवोअस्यसानवि॥ पृक्षासोअस्मिन्मिथुनाअ
धित्रयोदृतिस्तुरीयोमधुनोविरप्शते॥ उद्वांपृक्षासोमधुमंतईरतेरथा
अश्वासउषसोव्युष्टिषु॥ अपोर्णुवंतस्तमआपरीवृतंस्वर्णशुक्रं
तन्वंतआरजः॥ मध्वः पिबतंमधुपेभिरासभिरुतप्रियंमधुनेयुंजाथां
रथं॥ आवर्तनिंमधुनाजिन्वथस्पथोदृतिंवहेथेमधुमंतमश्विना॥ हं
सासोयेवांमधुमंतोअस्त्रिधोहिरण्यपर्णाउहुवउषर्बुधः॥ उदप्रुतोमंदि
नोमंदिनिस्पृशोमध्वोनमक्षः सवनानिगच्छथः॥ स्वध्वरासोमधुमंतोअ
ग्नयउस्राजरंतेप्रतिवस्तोरश्विना॥ यन्निक्तहस्तस्तरणिर्विचक्षणः सो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऋ० सं० ३

॥७४॥ मंस्कृ षावमधुमंतमद्रिभिः॥ आके निपासो अहभिर्दविध्वतः स्व१र्णशु
क्रं तन्वंत आ रजः॥ सूरश्चिदश्वान्युयुजान ईयते विश्वां अनु स्वधया
चेतथस्पथः॥ प्र वामवोचमश्विना धियंधा रथः स्वश्वो अजरो यो अ
स्ति॥ येन सद्यः परि रजांसि याथो हविष्मंतं तरणिं भोजमछ॥ २१॥ ॥
५ अ अग्रं पिबा मधूनां सुतं वायो दिविष्टिषु॥ त्वं हि पूर्वपा असि॥ शतेना नो अ ५
भिष्टिभिर्नियुत्वां इंद्रसारथिः॥ वायो सुतस्य तृंपतं॥ आ वां सहस्रं हर
य इंद्रवायू अभि प्रयः॥ वहंतु सोमपीतये॥ रथं हिरण्यवंधुरमिंद्रवा
यू स्वध्वरं॥ आ हि स्थाथो दिविस्पृशं॥ रथेन पृथुपाजसा दाश्वांस
छ मुप गछतं॥ इंद्रवायू इहा गछतं॥ इंद्रवायू अयं सुतस्तं देवेभिः सजोषसा
ब ॥ पिबतं दाशुषो गृहे॥ इह प्रयाणमस्तु वामिंद्रवायू विमोचनं॥ इह वां सो ॥७४॥
मपीतये॥ २२॥ ॥ वायो शुक्रो अयामि ते मध्वो अग्रं दिविष्टिषु॥ [illegible]॥१ हिसो राम

भामा

रामस २

मपीतये स्पार्हो देव नियुत्वता॥ इंद्रश्च वायवेषां सोमानां पीतिमर्हथः॥ यु
वां हि यंतीदवो निम्नमापो न सध्र्यक्॥ वायविंद्रश्च शुष्मिणा सरथं शुभ
स्पती॥ नियुत्वंता न ऊतय आ यातं सोमपीतये॥ या वां संति पुरुस्पृहो हे
नियुतो दाशुषे नरा॥ अस्मे ता यज्ञवाहसेंद्रवायू नि यछतं॥ २३॥ ॥ वि
हि होत्रा अवीता विपो न रायो अर्यः॥ वायवा चंद्रेण रथेन याहि सुत
स्य पीतये॥ नियुवाणो अशस्तीर्नियुत्वां इंद्रसारथिः॥ वायवा चंद्रेण र०॥
अनु कृष्णे वसुधिती येमाते विश्वपेशसा॥ वायवा०॥ वहंतु त्वा मनोयु
जो युक्तासो नवतिर्नव॥ वायवा०॥ वायो शतं हरीणां युवस्व पोष्याणां ॥
उत वा ते सहस्रिणो रथ आ यातु पाजसा॥ २४॥ ॥ इंद्रश्च वामास्य हविः प्रि
यमिंद्राबृहस्पती॥ उक्थं मदश्च शस्यते॥ अयं वां परि षिच्यते सोम इंद्र म १

इं

ऋ०सं०३

॥७५॥ बृहस्पती॥ वारुर्महायपीतये॥ आ न इंद्राबृहस्पती गृहमिंद्रश्चगछतं॥
सोमपा सोमपीतये॥ अस्मे इंद्राबृहस्पती रयिं धत्तं शतग्विनं॥ अश्वावंतं
सहस्रिणं॥ इंद्राबृहस्पती वयं सुते गीर्भिर्हवामहे॥ अस्य सोमस्य पी
तये॥ सोममिंद्राबृहस्पती पिबतं दाशुषो गृहे॥ मादयेथां तदोकसा॥ ॥
॥२५॥ ॥यस्तस्तंभ सहसा वि ज्मो अंतान्बृहस्पतिस्त्रिषधस्थो रवेण॥
तं प्रत्नास ऋषयो दीध्यानाः पुरो विप्रा दधिरे मंद्रजिह्वं॥ धुनेतयः सुप्र
केतं मदंतो बृहस्पते अभि ये नस्ततस्रे॥ पृषंतं सृप्रमदब्धमूर्वं बृहस्पते
रक्षतादस्य योनिं॥ बृहस्पते या परमा परावदत आ त ऋतस्पृशो नि षे
दुः॥ तुभ्यं खाता अवता [illegible] अद्रिदुग्धा मध्वः श्चोतंत्यभितो विरप्शं॥ ॥७५॥
बृहस्पतिः प्रथमं जायमानो महो ज्योतिषः परमे व्योमन्॥ सप्तास्यः राम

भा

स्तुविजातो रवेण विसप्तरश्मिरधमत्तमांसि॥ स सुष्टुभा स ऋक्वता गणे
न वलं रुरोज फलिगं रवेण॥ बृहस्पतिरुस्रिया हव्यसूदः कनिक्रदद्वा
वशतीरुदाजत्॥ २६॥ ॥ एवा पित्रे विश्वदेवाय वृष्णे यज्ञैर्विधेम नम
प्र सा हविर्भिः॥ बृहस्पते सुप्रजा वीरवंतो वयं स्याम पतयो रयीणां॥ स इद्रा
जा प्रतिजन्यानि विश्वा शुष्मेण तस्थावभि वीर्येण॥ बृहस्पतिं यः
सुभृतं बिभर्ति वल्गूयति वंदते पूर्वभाजं॥ स इत्क्षेति सुधित ओक
सि स्वे तस्मा इळा पिन्वते विश्वदानीं॥ तस्मै विशः स्वयमेवा नमंते
यस्मिन्ब्रह्मा राजनि पूर्व एति॥ अप्रतीतो जयति सं धनानि प्रति
जन्यान्युत या सजन्या॥ अवस्यवे यो वरिवः कृणोति ब्रह्मणे रा
जा तमवंति देवाः॥ इंद्रश्च सोमं पिबतं बृहस्पतेऽस्मिन्यज्ञे मंदसाना

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स०तृ०३

॥७६॥ वृषण्वसू॥ आ वां विशंत्विंदवः स्वाभुवोस्मे रयिं सर्ववीरं नि यच्छतं॥
बृहस्पत इंद्र वर्द्धतं नः सचा सा वां सुमतिर्भूत्वस्मे॥ अविष्टं धियो जि
गृतं पुरंधीर्जजस्तमर्यो वनुषामरातीः॥ ८७॥ ॥ इति तृतीयाष्ट
केसप्तमोध्यायः॥ ॥ ॐ॥ इदमुत्यत्पुरुतमं पुरस्ताज्ज्योतिस्तम
८ सो वयुनावदस्थात्॥ नूनं दिवो दुहितरो विभातीर्गातुं कृणवन्नुषसो त
जनाय॥ अस्थुरु चित्रा उषसः पुरस्तान्मिता इव स्वरवो ध्वरेषु॥ व्यू
व्रजस्य तमसो द्वारोछंतीरव्रञ्छुचयः पावकाः॥ उछंतीरद्य चितयंत भो
जान्राधोदेयायोषसो मघोनीः॥ अचित्रे अंतः पणयः ससंत्वबुध्यमा॥ ॥७६॥
नास्तमसो विमध्ये॥ कुवित्स देवीः सनयो नवो वा यामो बभूयादुषसो वो
अद्य॥ येना नवग्वे अंगिरे दशग्वे सप्तास्ये रेवती रेवदूष॥ यूयं हि रम्म

भुद्र४

देवीरृतयुग्भिरश्वैः परिप्रयाथ भुवनानि सद्यः॥ प्रबोधयंतीरुष
सः ससंतं द्विपाच्चतुष्पाच्चरथाय जीवं॥१॥ ॥ क्वस्विदासां कतमा पु
राणी यया विधाना विदधुरृभूणां॥ शुभं यच्छुभ्रा उषसश्चरंति न वि
ज्ञायंते सदृशीरजुर्याः॥ ता घा ता उषसः पुरासन्नुरभिद्युम्ना ऋ
तजातसत्याः॥ यास्वीजानः शशमान उक्थैः स्तुवंछंसन्द्रविणं सद्य
आप॥ ता आ चरंति समना पुरस्तात्समानतः समना पप्रथानाः॥ ऋ
तस्य देवीः सदसो बुधाना गवां न सर्गा उषसो जरंते॥ ता इन्न्वे३व स
मना समानीरमीतवर्णा उषसश्चरंति॥ गूहंतीरभ्वमसितं रुशद्भिः शु
शुक्रास्तनूभिः शुचयो रुचानाः॥ रयिं दिवो दुहितरो विभातीः प्रजा
वंतं यच्छतास्मासु देवीः॥ स्योनादावः प्रतिबुध्यमानाः सुवीर्यस्य प

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऋ० सं० ३

॥७७॥ तं यस्यम॥ तद्वो दिवो दुहितरो विभातीरुप ब्रुव उषसो यज्ञकेतुः॥
वयं स्याम यशसो जनेषु तद्द्यौश्च धत्तां पृथिवी च देवी॥ २१॥ ॥ प्रति ष्या
सूनरी जनी व्युछंती परि स्वसुः॥ दिवो अदर्शि दुहिता॥ अश्वेव चित्रारु
षी माता गवामृतावरी॥ सखाभूदश्विनोरुषाः॥ उत सखास्यश्विनोरु
५ मासि॥ त माता गवाम[illegible]॥ उतोषो वस्व ईशिषे॥ यावयद्द्वेषसं त्वा चिकित्वि
त्सूनृतावरि॥ प्रति स्तोमैरभुत्स्महि॥ प्रति भद्रा अदृक्षत गवां सर्गा न
रश्मयः॥ ओषा अप्रा उरु ज्रयः॥ आपप्रुषी विभावरि व्यावर्ज्योति
षा तमः॥ उषो अनु स्वधामव॥ आ द्यां तनोषि रश्मिभिरांतरिक्षमु
रु प्रियं॥ उषः शुक्रेण शोचिषा॥ ३॥ ॥ तद्देवस्य सवितुर्वार्यं महद्वृ ॥७७॥
णीमहे असुरस्य प्रचेतसः॥ छर्दिर्येन दाशुषे यछति त्मना तन्नो महाँ उ ख १ राम

दयान्देवो अक्तुभिः॥ दिवो धर्ता भुवनस्य प्रजापतिः पिशंगं द्रापिं प्रति
मुंचते कविः॥ विचक्षणः प्रथयन्नापृणन्नुर्वजीजनत्सविता सुम्न
मुक्थ्यं॥ आप्रा रजांसि दिव्यानि पार्थिवा श्लोकं देवः कृणुते स्वाय
धर्मणे॥ प्र बाहू अस्राक्सविता सवीमनि निवेशयन्प्रसुवन्नक्तु
भिर्जगत्॥ अदाभ्यो भुवनानि प्रचाकशद्व्रतानि देवः सविताभि रक्ष ग्रा
ते॥ प्रास्राग्बाहू भुवनस्य प्रजाभ्यो धृतव्रतो महो अज्मस्य राज
ति ७ ति॥ त्रिरंतरिक्षं सविता महित्वना त्री रजांसि परिभुस्त्रीणि रोच स ८
ना॥ तिस्रो दिवः पृथिवीस्तिस्र इन्वति त्रिभिर्व्रतैर[illegible]भि नो रक्षति २
त्मना॥ बृहत्सुम्नः प्रसवीता निवेशनो जगतः स्थातुरुभयस्य यो व
शी॥ स नो देवः सविता शर्म य[illegible]त्वस्मे क्षयाय त्रिवरूथमंहसः॥ आ
ह्न परिभूस्त्री ४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऋ० सं०३

॥७८॥ गं देवः क्रतुभिर्वर्द्धतु क्षयं दधातु नः सविता सुप्रजामिषं॥ सनः क्षपा
भिरहभिश्च जिन्वतु प्रजावंतं रयिमस्मे समिन्वतु॥४॥ अभूद्देवः
सविता वंद्यो नु न इदानीमह्न उपवाच्यो नृभिः॥ वि यो रत्ना भजति
मानवेभ्यः श्रेष्ठं नो अत्र द्रविणं यथा दधत्॥ देवेभ्यो हि प्रथमं यज्ञि ये दे
भ्योमृतत्वं सुवसि भागमुत्तमं॥ आदिद्दामानं सवितर्व्यूर्णुषे नूची
ना जीविता मानुषेभ्यः॥ अचित्ती यच्चकृमा दैव्ये जने दीनैर्दक्षैः प्र
भूती पूरुषत्वता॥ देवेषु च सवितर्मानुषेषु च त्वं नो अत्र सुवतादना
गसः॥ न प्रमिये सवितुर्दैव्यस्य तद्यथा विश्वं भुवनं धारयिष्यति॥
यत्पृथिव्या वरिमन्ना स्वंगुरिर्वर्ष्मन्दिवः सुवति सत्यमस्य तत्॥ ॥७८॥
इंद्रज्येष्ठान्बृहद्भ्यः पर्वतेभ्यः क्षयाँ एभ्यः सुवसि पस्त्यावतः॥ यथा रम

यथा पतयंतो वियेमिर एवैव तस्थुः सवितः सवाय ते॥ ये ते त्रिरहन्त्सवितः
सवासो दिवे दिवे सौभगमासुवंति॥ इंद्रो द्यावापृथिवी सिंधुरद्भिरादि
त्यैर्नो अदितिः शर्म यंसत्॥५॥ ॥ को वस्त्राता वसवः को वरूता द्या
वाभूमी अदिते त्रासीथां नः॥ सहीयसो वरुण मित्र मर्तात्को वोध्वरे
वरिवो धाति देवाः॥ प्र ये धामानि पूर्व्याण्यर्चान्वि यदुच्छान्वियोतारो
अमूराः॥ विधातारो वि ते दधुरजस्रा ऋतधीतयो रुरुचंत दस्माः॥
प्र पस्त्यामदितिं सिंधुमर्कैः स्वस्तिमीळे सख्याय देवीं॥ उभे यथा
नो अहनी निपात उषासानक्ता करतामदब्धे॥ व्यर्यमा वरुणश्चे
ति पंथामिषस्पतिः सुवितं गातुमग्निः॥ इंद्राविष्णू नृवदु षु स्तवाना श
र्म नो यंतममवद्वरूथं॥ आ पर्वतस्य मरुतामवांसि देवस्य त्रातुरव्रि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त० स० ३

नै

॥७९॥ भगस्य॥ पातु तिर्जन्या हंहसो नो मित्रो मित्रियादुत नु उरूष्येत॥६॥
नू रोदसी अहिना बुध्न्येन स्तुवीत देवी अप्येभिरिष्टैः समुद्रं न संच
रणे सनिष्यवो घर्मस्वरसो नद्यो ३ अप व्रन्॥ देवैर्नो देव्यदितिर्निपा
तु देवस्त्राता त्रायतामप्रयुछन्॥ नहि मित्रस्य वरुणस्य धासि मर्हामसि प्र मियं सान्वग्नेः॥ अग्निरीशे वसव्यस्याग्निर्महः सौभगस्य॥ ता ४
न्यस्मभ्यं रासते॥ उषो मघोन्या वह सूनृते वार्या पुरु॥ अस्मभ्यं वा
जिनीवति॥ तन्नु नः सविता भगो वरुणो मित्रो अर्यमा॥ इन्द्रो नो राध
सा गमत्॥७॥ ॥मही द्यावापृथिवी इह ज्येष्ठे रुचा भवतां शुचयद्भि
रर्कैः॥ यत्सीं वरिष्ठे बृहती विमिन्वन्रुवद्धोक्षा पप्रथानेभिरेवैः॥६॥७९॥
वी देवेभिर्यजता यजत्रैरामिनती तस्थतुरुक्षमाणे॥ ऋतावरी अद्रुहा राम

देवपुत्रे यज्ञस्य नेत्री शुचयद्भिरर्कैः॥ स इत्स्वपा भुवनेष्वास य इमे द्या
वापृथिवी जजान॥ उर्वी गभीरे रजसी सुमेके अवंशे धीरः शच्या सम
रत्॥ नू रोदसी बृहद्भिर्नो वरूथैः पत्नीवद्भिरिषयन्ती सजोषाः॥
उरूची विश्वे यजते निपातं धिया स्याम रथ्यः सदासाः॥ प्र वां महि
द्यवी अभ्युपस्तुतिं भरामहे॥ शुची उप प्रशस्तये॥ पुनाने तन्वा मिथः
स्वेन दक्षेण राजथः॥ ऊह्याथे सनादृतं॥ मही मित्रस्य साधथस्तरन्ती
पिप्रती ऋतं॥ परि यज्ञं नि षेदथुः॥ ६॥८॥ ॥क्षेत्रस्य पतिना वयं
हितेनेव जयामसि॥ गामश्वं पोषयित्न्वा स नो मृळातीदृशे॥ क्षेत्र
स्य पते मधुमन्तमूर्मिं धेनुरिव पयो अस्मासु धुक्ष्व॥ मधुश्चुतं
घृतमिव सुपूतमृतस्य नः पतयो मृळयन्तु॥ मधुमतीरोषधीर्द्या

मधुमंतमूर्मिं धेनुरिव पय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त० स० ३

॥८०॥ वस्त्रापो मधुमंनो भवंतंतरिक्षं॥ क्षेत्रस्य पतिर्मधुमान्नो अस्त्वरिष्यंतो
अन्वेनंचरेम॥ शुनं वाहाः शुनंनरः शुनं कृषतु लांगलं॥ शुनं वरत्रा
बध्यंतां शुनमष्ट्रामुदिंगय॥ शुनासीराविमां वाचं जुषेथां यद्दिवि
चक्रथुः पयः॥ तेनेमामुपसिंचतं॥ अर्वाची सुभगे भव सीते वंदा
महे त्वा॥ यथा नः सुभगा ससि यथा नः सुफला ससि॥ इंद्रः सीतां
निगृण्हातु तां पूषानुयच्छतु॥ सा नः पयस्वती दुहामुत्तरामु
त्तरां समां॥ शुनं नः फाला विकृषंतु भूमिं शुनं कीनाशा अभियंतु
वाहैः॥ शुनं पर्जन्यो मधुना पयोभिः शुनासीरा शुनमस्मासु धत्तं॥
॥५॥ ॥ समुद्रादूर्मिर्मधुमाँ उदारदुपांशुना सममृतत्वमानट्॥
घृतस्य नाम गुह्यं यदस्ति जिह्वा देवानाममृतस्य नाभिः॥ वयं ना ॥८०॥

राम

सिप्र गौरी धर्मा ८
८ सू मंयो घृतस्य मृगा ... ८

म प्रब्रवामा घृतस्यास्मिंन्यज्ञे धारयामा नमोभिः॥ उप ब्रह्मा शृणवच्छस्यमानं
चतुः शृंगो वमीद्गौर एतत्॥ चत्वारि शृंगा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो
अस्य॥ त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां आविवेश॥ त्रिधा हितं पणि
वि भिर्गुह्यमानं गवि देवासो घृतमन्वविंदन्॥ इंद्र एकं सूर्य एकं जजान वेनादेकं स्व
धया निष्टतक्षुः॥ एता अर्षंति हृद्यात्समुद्राच्छतव्रजा रिपुणा नावचक्षे॥
घृतस्य धारा अभिचाकशीमि हिरण्ययो वेतसो मध्य आसां॥ १०॥ ॥ सम्यक्स्र
वंति सरितो न धेना अंतर्हृदा मनसा पूयमानाः॥ एता अर्षंति हृद्यात्समुद्राच्छ
तव्रजा ~~रिपुणा नावचक्षे~~णाः॥ सिंधोरिव प्राध्वने शूघनासो वातप्रमियः पत
यंति यह्वाः॥ घृतस्य धारा अरुषो न वाजी काष्ठा भिंदन्नूर्मिभिः पिन्वमानाः॥
प्र अभि प्रवंत समनेव योषाः कल्याण्यः स्मयमानासो अग्निं॥ घृतस्य धाराः स्म
समिधो नसंत ता जुषाणो हर्यति जातवेदाः॥ कन्या इव वहतुमेतवा उ अंज्यंजा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त०सं०३

॥८१॥ नाअभिचाकशीमि॥ यत्रसोमःसूयतेयत्रयज्ञोघृतस्यधाराअभितत्प
वंते॥ अभ्यर्षतसुष्टुतिंगव्यमाजिमस्मासुभद्राद्रविणानिधत्त॥ इमंयज्ञं
नयतदेवतानोघृतस्यधारामधुमत्पवंते॥ धामंतेविश्वंभुवनमधिश्रित
मंतःसमुद्रेहृद्यंतरायुषि॥ अपामनीकेसमिथेयआभृतस्तमश्यामम
धुमंतंतऊर्मिं॥११॥ ॥इतिमंडलं॥ ॥अबोध्यग्निःसमिधाजनानांप्रतिधे म ४
नुमिवायतीमुषासं॥ यह्वाइवप्रवयामुज्जिहानाःप्रभानवःसिस्रतेनाक
मच्छ॥ अबोधिहोतायजथायदेवानूर्ध्वोअग्निःसुमनाःप्रातरस्थात्॥ स
८ मसो मिद्धस्यरुशददर्शिपाजोमहान्देवस्तमसोनिरमोचि॥ यदींगणस्यरशनामजी
गःशुचिरंक्तेशुचिभिर्गोभिरग्निः॥ आद्दक्षिणायुज्यतेवाजयंत्युत्तानामूर्ध्वो
अधयज्जुहूभिः॥ अग्निमच्छादेवयतांमनांसिचक्षूंषीवसूर्येसंचरंति॥ यदी ॥८१॥
सुवातेउषसाविरूपेश्वेतोवाजीजायतेअग्रेअह्नां॥ जनिष्टहिजेन्योअग्रे राम

अह्नांहितोहितेष्वरुषोवनेषु॥ दमेदमेसप्तरत्नादधानोग्निर्होतानिषसा
दायजीयान्॥ अग्निर्होतान्यसीदद्यजीयानुपस्थेमातुःसुरभाउलोके॥
युवाकविःपुरुनिष्ठऋतावाधर्ताकृष्टीनामुतमध्यइद्धः॥१२॥ ॥प्रणु
त्यंविप्रमध्वरेषुसाधुमग्निंहोतारमीळतेनमोभिः॥ आयस्ततानरोदसी
ऋतेननित्यंमृजंतिवाजिनंघृतेन॥ मार्जाल्योमृज्यतेस्वेदमूनाःकविप्र
शस्तोअतिथिःशिवोनः॥ सहस्रशृंगोवृषभस्तदोजाविश्वांअग्नेसहसा
प्रास्यन्यान्॥ प्रसद्योअग्नेअत्येष्यन्यानाविर्यस्मैचारुतमोबभूथ॥ ई
ळेन्योवपुष्योविभावाप्रियोविशामतिथिर्मानुषीणां॥ तुभ्यंभरंतिक्षित
योयविष्ठबलिमग्नेअंतितओतदूरात्॥ आभंदिष्ठस्यसुमतिंचिकिद्धि
बृहत्तेअग्नेमहिशर्मभद्रं॥ आद्यरथंभानुमोभानुमंतमग्नेतिष्ठयजते
भिःसमंतं॥ विद्वान्पथीनामुर्वंतरिक्षमेहदेवान्हविरद्यायवक्षि॥ अ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त॰ सं॰ ३

ध्याय २

॥८२॥ वो वाम कवये मेध्याय वचो वंदारु वृषभाय वृष्णे॥ गविष्ठिरो नमसा स्तोमम
ग्नौ दिवीव रुक्ममुरुव्यंचमश्रेत्॥१२॥ ॥कुमारं माता युवतिः समुब्धं गु
हा बिभर्ति न ददाति पित्रे॥ अनीकमस्य न मिनज्जनासः पुरः पश्यंति नि
हितमरतौ॥ कमेतं त्वं युवते कुमारं पेषी बिभर्षि महिषी जजान॥ पूर्वीर्हि
५ धौ गर्भः शरदो ववर्धापश्यं जातं यदसूत माता॥ हिरण्यदंतं शुचिवर्णमा
रात्क्षेत्रादपश्यमायुधा मिमानं॥ ददानो अस्मा अमृतं विपृक्वत्किं मामनिं
द्राः कृणवन्ननुक्थाः॥ क्षेत्रादपश्यं सनुतश्चरंतं सुमद्यूथं न पुरु
शोभमानं॥ न ता अगृभ्रन्नजनिष्ट हि षः पलिक्नीरिद्युवतयो भवंति॥
के मे मर्यकं वि यवंत गोभिर्न येषां गोपा अरणश्चिदास॥ य ईं जगृभुरव
ते सृजंत्वाजाति पश्व उप नश्चिकित्वान्॥ वसां राजानं वसतिं जनानामरात ॥८२॥
यो नि दधुर्मर्त्येषु॥ ब्रह्माण्यत्रेरव तं सृजंतु निंदितारो निंद्यासो भवंतु॥१४॥ ॥ राम

श्रि शुनश्चिच्छेपं निदितं सहस्राद्यूपादमुंचो अशमिष्ट हि षः॥ एवास्मद
ग्ने वि मुमुग्धि पाशान्होतश्चिकित्व इह तू निषद्य॥ हृणीयमानो अप
हि मदैयेः प्र मे देवानां व्रतपा उवाच॥ इंद्रो विद्वाँ अनु हि त्वा चचक्ष तेना
हमग्ने अनुशिष्ट आगां॥ वि ज्योतिषा बृहता भात्यग्निराविर्विश्वानि
कृणुते महित्वा॥ प्रादेवीर्मायाः सहते दुरेवाः शिशीते शृंगे रक्षसे विनि
ना क्षे॥ उत स्वानासो दिवि षंत्वग्नेस्तिग्मायुधा रक्षसे हंतवा उ॥ मदे चिदस्य प्र
रुजंति भामा न वरंते परिबाधो अदेवीः॥ एतं ते स्तोमं तुविजात विप्रो रथं
न धीरः स्वपा अतक्षं॥ यदीदग्ने प्रति त्वं देव हर्याः स्वर्वतीरप एना जयेम॥
तुविग्रीवो वृषभो वावृधानोऽशत्र्वर्यः समजाति वेदः॥ इतीममग्निममृ
ता अवोचन्बर्हिष्मते मनवे शर्म यंसद्धविष्मते मनवे शर्म यंसत्॥१५॥ ॥
त्वमग्ने वरुणो जायसे यत्त्वं मित्रो भवसि यत्समिद्धः॥ त्वे विश्वे सहसस्पुत्र दे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऋ० सं० २

म

॥८३॥ वास्त्वमिंद्रो दाशुषे मर्त्याय॥ त्वमर्यमा भवसि यत्कनीनां नाम स्वधावन्गुह्यं बि
भर्षि॥ अंजंति मित्रं सुधितं न गोभिर्यद्दंपती समनसा कृणोषि॥ तव श्रि
ये मरुतो मर्जयंत रुद्र यत्ते जनिम चारु चित्रं॥ पदं यद्विष्णोरुपमं निधायि तेन
पासि गुह्यं नाम गोनां॥ तव श्रिया सुदृशो देव देवाः पुरू दधाना अमृतं सपं
त॥ होतारमग्निं मनुषो नि षेदुर्दशस्यंत उशिजः शंसमायोः॥ न त्वद्धोता पूर्वो
अग्ने यजीयान्न काव्यैः परो अस्ति स्वधावः॥ विशश्च यस्या अतिथिर्भवा
सि स यज्ञेन वनवद्देव मर्तान्॥ वयमग्ने वनुयाम त्वोता वसूयवो हविषा बुध्य
मानाः॥ वयं समर्ये विदथेष्वह्नां वयं राया सहसस्पुत्र मर्तान्॥ १६॥ ॥ यो न
आगो अभ्येनो भरात्यधीदघमघशंसे दधात॥ जही चिकित्वो अभिश
स्तिमेतामग्ने यो नो मर्चयति द्वयेन॥ त्वामस्या व्युषि देव पूर्वे दूतं कृण्वाना ॥८३॥
अयजंत हव्यैः॥ संस्थे यदग्न ईयसे रयीणां देवो मर्तैर्वसुभिरिध्यमानः॥ राम

अव स्पृधि पितरं योधि विद्वान्पुत्रो यस्ते सहसः सूनऊहे॥ कदा चिकित्वो
अभि चक्षसे नोऽग्ने कदाँ ऋतचिद्यातयासे॥ भूरि नाम वंदमानो दधाति पि
ता वसो यदि तज्जोषयासे॥ कुविद्देवस्य सहसो चकानः सुम्नमग्निर्वनते
वावृधानः॥ त्वमंग जरितारं यविष्ठ विश्वान्यग्ने दुरिताति पर्षि॥ स्तेना अ
दृश्रन्रिपवो जनासोऽज्ञातकेता वृजिना अभूवन्॥ इमे यामासस्त्वद्रिग
भूवन्वसवे वा तदिदागो अवाचि॥ नाह यमग्निरभिशस्तये नो न रीषते वा
वृधानः परा दात्॥ १७॥ ॥ त्वामग्ने वसुपतिं वसूनामभि प्र मंदे अध्वरेषु
राजन्॥ त्वया वाजं वाजयंतो जयेमाभि ष्याम पृत्सुतीर्मर्त्यानां॥ हव्यवाळ
ग्निरजरः पिता नो विभुर्विभावा सुदृशीको अस्मे॥ सुगार्हपत्याः समि
षो दिदीह्यस्मद्र्यक्सं मिमीहि श्रवांसि॥ विशां कविं विश्पतिं मानुषीणां
शुचिं पावकं घृतपृष्ठमग्निं॥ नि होतारं विश्वविदं दधिध्वे स देवेषु वनते वा ते १
र्याणि॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऋ०स०३

॥ ८४॥ जुषस्वाग्न इळया सजोषा यतमानो रश्मिभिः सूर्यस्य॥ जुषस्व नः समिधं
जातवेद आ च देवान्हविरद्याय वक्षि॥ जुष्टो दमूना अतिथिर्दुरोण इमं नो
यज्ञमुप याहि विद्वान्॥ विश्वा अग्ने अभियुजो विहत्या शत्रूयतामा भरा
भोजनानि॥ १८॥ ॥ वधेन दस्युं प्र हि चातयस्व वयः कृण्वानस्तन्वे स्वा
यै॥ पिपर्षि यत्सहसस्पुत्र देवान्त्सो अग्ने पाहि नृतम वाजे अस्मान्॥ व
यं ते अग्न उक्थैर्विधेम वयं हव्यैः पावक भद्रशोचे॥ अस्मे रयिं विश्ववा
रं समिन्वास्मे विश्वानि द्रविणानि धेहि॥ अस्माकमग्ने अध्वरं जुषस्व स
हसः सूनो त्रिषधस्थ हव्यं॥ वयं देवेषु सुकृतः स्याम शर्मणा नस्त्रिवरू
थेन पाहि॥ विश्वानि नो दुर्गहा जातवेदः सिंधुं न नावा दुरितातिपर्षि॥ अग्ने ॥ ८४॥
अत्रिवन्नमसा गृणानो अस्माकं बोध्यविता तनूनां॥ यस्त्वा हृदा कीरि
णा मन्यमानो मर्त्यं मर्त्यो जोहवीमि॥ जातवेदो यशो अस्मासु धेहि प्रजा राम

भिरग्ने अमृतत्वमश्यां॥ यस्मै त्वं सुकृते जातवेद उ लोकमग्ने कृणवः स्यो
नं॥ अश्विनं स पुत्रिणं वीरवंतं गोमंतं रयिं नशते स्वस्ति॥ १९॥ ॥ सुसमि
द्धाय शोचिषे घृतं तीव्रं जुहोतन॥ अग्नये जातवेदसे॥ नराशंसः सुषूदती
मं यज्ञमदाभ्यः॥ कविर्हि मधुहस्त्यः॥ ईळितो अग्न आ वहेंद्रं चित्रमिह
प्रियं॥ सुखै रथेभिरूतये॥ ऊर्णम्रदा वि प्रथस्वाभ्यर्का अनूषत॥ भ
वा नः शुभ्र सातये॥ देवीर्द्वारो वि श्रयध्वं सुप्रायणा न ऊतये॥ प्रप्र यज्ञं पृणी
तन॥ २०॥ ॥ सुप्रतीके वयोवृधा यह्वी ऋतस्य मातरा॥ दोषामुषासमी
महे॥ वातस्य पत्मन्नीळिता दैव्या होतारा मनुषः॥ इमं नो यज्ञमा गतं॥ इ
ळा सरस्वती मही तिस्रो देवीर्मयोभुवः॥ बर्हिः सीदंत्वस्रिधः॥ शिवस्त्वष्ट
रिहा गहि विभुः पोष उत त्मना॥ यज्ञेयज्ञे न उदव॥ यत्र वेत्थ वनस्पते देवानां
गुह्या नामानि॥ तत्र हव्यानि गामय॥ स्वाहाग्नये वरुणाय स्वाहेंद्राय म

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त०सं०३

॥८५॥ रुद्रः॥ स्वाहा देवेभ्यो हविः॥२१॥ ॥अग्निं तं मन्ये यो वसुरस्तं यं यंति
धेनवः॥ अस्तमर्वंत आशवोस्तं नित्यासो वाजिन इषं स्तोतृभ्य आ
भर॥ सो अग्निर्यो वसुर्गृणे सं यमायंति धेनवः॥ समर्वंतो रघुद्रु
वः सं सुजातासः सूरय इषं०॥ अग्निर्हि वाजिनं विशे ददाति विश्वच
र्षणिः॥ अग्नी राये स्वाभुवं स प्रीतो याति वार्यमिषं०॥ आ ते अग्न इधी
महि द्युमंतं देवाजरं॥ यद्ध स्या ते पनीयसी समिद्दीदयति द्यवीषं०॥ आ
ते अग्न ऋचा हविः शुक्रस्य शोचिषस्पते॥ सुश्चंद्र दस्म विश्पते हव्य
वाट् तुभ्यं हूयत इषं०॥२२॥ ॥प्रो त्ये अग्नयोग्निषु विश्वं पुष्यंति वार्यं
॥ते हिन्विरे त इन्विरे त इषण्यंत्यानुषगिषं०॥ तव त्ये अग्ने अर्चयो महि
व्राधंत वाजिनः॥ ये पत्वभिः शफानां व्रजा भुरंत गोनामिषं०॥ नवा नो ॥८५॥
भग्न अभर स्तोतृभ्यः सुक्षितीरिषः॥ ते स्याम य आनृचुस्त्वादूतासो दमेदमे राम

सं०३
त०...३

०प३

॥८६॥ धस्म स्वधितीव रीयते॥ सुषूरसूत माता क्राणा यदानशे भगं॥ आ यस्ते
सर्पिरासुते अग्ने शमस्ति धायसे॥ ऐषु द्युम्नमुत श्रव आ चित्तं मर्त्येषु धाः
॥इति चिन्मन्युमध्रिजस्त्वादातमा पशुं ददे॥ आदग्ने अपृणतोत्रिः सास
ह्याद्दस्यूनिषः सासह्यान्नॄन्॥२५॥ ॥त्वामग्न ऋतायवः समीधिरे प्र
त्नं प्रत्नास ऊतये सहस्कृत॥ पुरुश्चंद्रं यजतं विश्वधायसं दमूनसं गृ
गृहपतिं वरेण्यं॥ त्वामग्ने अतिथिं पूर्व्यं विशः शोचिष्केशं गृहपतिं नि
षेदिरे॥ बृहत्केतुं पुरुरूपं धनस्पृतं सुशर्माणं स्ववसं जरद्विषं॥ त्वामग्ने
मानुषीरीळते विशो होत्राविदं विविचिं रत्नधातमं॥ गुहा संतं सुभ
ग विश्वदर्शतं तुविष्वणसं सुयजं घृतश्रियं॥ त्वामग्ने धर्णसिं विश्वधा
वयं गीर्भिर्गृणंतो नमसोपसेदिम॥ स नो जुषस्व समिधानो अंगिरो दे ॥८६॥
वो मर्तस्य यशसा सुदीतिभिः॥ त्वमग्ने पुरुरूपो विशेविशे वयो दधा राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उ मे सु श्वं द सखा ३

॥ मे सत्तस्तोम्यस्य कान्तसुर्पिषो स्वरश्रीणी ष आसनि ॥ उतो न उत्पुपूर्या उक्थे
षु शवसस्पत इषं ॥ एवा अग्निमनुर्यमुर्गीर्भिर्यज्ञेभिरानुषक् ॥ दध
दस्मे सुवीर्यमुत त्यदाश्वश्व्यमिषं ॥ २३ ॥ यः संवः सुम्नयुवमिषं स्तो
मं वाग्नये ॥ वो र्षिष्ठा याक्षिती नाम्नूर्जो न प्रेसहस्वते ॥ कुत्राचिद्यस्य संमृतो
रण्वा नरो नृषदने ॥ अर्हंतश्चिद्यमिंधते संजनयंति जंतवः ॥ संयदिषो व
नामहे संहव्या मानुषाणां ॥ उत द्युम्नस्य शवस ऋतस्य रश्मिमाददे ॥
स स्मा कृणोति केतुमा नक्तं चिद्दूर आसते ॥ पावको यद्वनस्पतीन्प्र स्मा
मिना त्यजरः ॥ अव स्म यस्य वेषणे स्वेदं पथिषु जुह्वति ॥ अभीमह स्वजे
न्यं भूमा पृष्ठेव रुरुहुः ॥ २४ ॥ यं मर्त्यः पुरुस्पृहं विदद्विश्वस्य धायसे ॥
२५ प्र स्वादनं पितूनामस्ततातिं चिदायवे ॥ स हि ष्मा धन्वाक्षितं दाता न दात्या प
शुः ॥ हिरिश्मश्रुः शुचिदन्नृभुरनिभृष्टतविषिः ॥ शुचिः ष्मा यस्मा अत्रि वि १

चि २

स ०३ धा ४

॥८७॥ वत्प्र स्वधितीव रीयते ॥ सुषूरसूत माता क्राणा यदानशे भगं ॥ ...

॥८७॥ सि अत्रलध्यां पुरुष्टुत ॥ पुरूण्यन्ना सहसा विराजसि त्विषिः सा ते तितृ
षाणस्य नाधृषे ॥ त्वामग्ने समिधानं यविष्ठ्य देवा दूतं चक्रिरे हव्यवा ह
नं ॥ उरुज्रयसं घृतयोनिमाहुतं त्वेषं चक्षुर्दधिरे चोदयन्मति ॥ त्वाम
ग्ने प्रदिव आहुतं घृतैः सुम्नायवः सुषमिधा समीधिरे ॥ स वावृधान ओ
षधीभिरुक्षितोभि ज्रयांसि पार्थिवा वितिष्ठसे ॥ २६ ॥ ॥ इति तृतीया
ष्टके अष्टमोध्यायः ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ छ ॥ छ ॥ ॥ छ ॥
शाके १६८७ पार्थिवनाम संवत्सरे श्रावण शुद्ध १० मंदवासरे तद्दिने ल
क्ष्मभट्टात्मजेन काशीभट्टमहाबळेश्वरकरेण इदं पुस्तकं लिखितं स
मा प्तं ॥ ॥ भग्नपृष्ठिकटिग्रीवा अधोदृष्टिरधोमुखं ॥ कष्टेन लिखितं ॥८७॥
ग्रंथं यत्नेन परिपालयेत् ॥ ॥ श्रीवेदपुरुषार्पणमस्तु ॥ ॥ छ ॥ ॥ ॥ ८७ राम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥छ॥ इति तृतीयाष्टकः समाप्तः॥छ॥

चतुर्थाष्टप्रारंभः॥

॥ ॐ नमो नारायणाय नमः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीगणेशाय नमः॥ हरिः ओम्॥ युंजानः प्रथमं मनस्तत्वाय सविता धि
ज्योतिर्निचाय्य पृथिव्या अध्याभरत्। युक्त्वाय मनसा देवान्त्सुवर्यतो धि
हज्योतिः करिष्यतः सविता प्रसुवाति तान्। युक्तेन मनसा वयं देवस्य
वः सुवर्गेयाय शक्त्यै। युंजते मन उत युंजते धियो विप्रा विप्रस्य बृहतो
। वि होत्रा दधे वयुनाविदेक इत्॥१॥ मही देवस्य सवितुः परिष्टुतिः। युजे वां
न्नमोभिर्वि श्लोका यंतिपथ्येव सूरेः। शृण्वंति विश्वे अमृतस्य पुत्रा आ
नि दिव्यानि तस्थुः। यस्य प्रयाणमन्वन्य इद्ययुर्देवा देवस्य महिमान
पार्थिवान्यहो निर्विममे स एतशो रजांसि देवः सविता महित्वना॥ देव स
वयसं प्रसुव॥२॥ यज्ञपतिं भगाय दिव्यो गंधर्वः। केतपूः केतं नः पुनातु

तिर्वाचमद्य स्वदाति नः। इमं नो देव सवितर्यज्ञं प्रसुव देवायुवं सखिविदं सत्राजि
तं धनजितं सुवर्जितं॥ ऋचा स्तोमं समर्धय गायत्रेण रथंतरं॥ बृहद्गायत्र
वर्तनि॥ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां गायत्रेण छंद
सादेदंगिरस्वदभ्रिरसि नारिः॥३॥ असि पृथिव्याः सधस्थादग्निं पुरीष्यमंगि
रस्वदाभर त्रैष्टुभेन त्वा छंदसादेदंगिरस्वदभ्रिरसि नारिरसि त्वया वयं सधस्थ
आग्निं शकेम खनितुं पुरीष्यं जागतेन त्वा छंदसादेदंगिरस्वद्धस्त आधाय सविता
बिभ्रदभ्रिं हिरण्ययीं। तया ज्योतिरजस्रमिदग्निं खात्वी न आभरानुष्टुभेन
त्वा छंदसादेदंगिरस्वत्॥४॥ इ घ संप्रसुव नारिरानुष्टुभेन त्वा। घंसो त्रीणि
य॥१॥ इमामगृभ्णन्रशनामृतस्य पूर्व आयुषि विदथेषु कव्या। तया देवाः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं॰च॰

2 शुलमा बभ्रत्कुर्वन्नृत्यसामन्सरमारपंती॥ प्रतूर्त्तं वाजिन्नाद्रव वरिष्ठामनु संवतं दिवि ते
जन्म परममंतरिक्षे नाभिः पृथिव्यामधि योनिः॥ युंजाथाꣳ रासभं युवमस्मिन्यामे वृ
षण्वसू। अग्निं भरंतमस्मयुं॥ योगेयोगे तवस्तरं वाजेवाजे हवामहे। सखाय इ
द्रमूतये प्र तूर्वन्न॥२॥ एह्यवक्रामन्न शस्तीरुद्रस्य गाणपत्यान्मयो भूरेहि॥ उ
र्वंतरिक्षमन्विहि स्वस्तिगव्यूतिरभयानि कृण्वन्न। पूष्णा सयुजा सह। पृथिव्याः
सधस्थादग्निं पुरीष्यमंगिरस्वदच्छेह्यग्निं पुरीष्यमंगिरस्वदच्छेमोग्निं पुष्यमंगि री
रस्वद्भरिष्यामोग्निं पुरीष्यमंगिरस्वद्भरामः॥ अन्वग्निरुषसामग्रमख्यदन्वहा
नि प्रथमो जातवेदाः। अनु सूर्यस्य पुरुत्रा च रश्मीन्ननु द्यावापृथिवी आततान।
आगत्य वाज्यध्वनः सर्वा मृधो विधूनुते। अग्निꣳ सधस्थे महति चक्षुषा निचिकी
षते। आक्रम्य वाजिन्पृथिवीमग्निमिच्छ रुचा त्वं। भूम्या वृत्वाय नो ब्रूहि यतः ख

नाम तं वयं। द्यौस्ते पृष्ठं पृथिवी सधस्थमात्मान्तरिक्षꣳ समुद्रो योनिः। विख्याय च
क्षुषा त्वमभितिष्ठ॥३॥ पृतन्यतः। उत्क्राम महते सौभगायास्मादास्थानाद्द्रविणो
दा वाजिन्॥ वयꣳ स्याम सुमतौ पृथिव्या अग्निं खनिष्यंत उपस्थे अस्याः। उदक्र
मीद्द्रविणोदा वाज्यर्वाकः सलोकꣳ सुकृतं पृथिव्याः। ततः खनेम सुप्रतीकमग्निꣳ
स्वो रुहाणा अधि नाकमुत्तमे। अपो देवीरुपसृज मधुमतीरयक्ष्माय प्रजाभ्यः।
तासाꣳ स्थानादुज्जिहतामोषधयः सुपिप्पलाः। जिघर्मि॥४॥ अग्निं मनसा च
तेन प्रतिक्ष्यंतं भुवनानि विश्वा॥ पृथुं तिरश्चा वयसा बृहंतं व्यचिष्ठमन्नꣳ रभसं वि
दानं। आ त्वा जिघर्मि वचसा घृतेनारक्षसा मनसा तज्जुषस्व॥ मर्यश्रीः स्पृह
यद्वर्णो अग्निर्नाभिमृशे तनुवा जर्हृषाणः। परि वाजपतिः कविरग्निर्हव्यान्यक्र
मीत्। दधद्रत्नानि दाशुषे। परि त्वाग्ने पुरं वयं विप्रꣳ सहस्य धीमहि। धृषद्वर्णं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०च० दिवे दिवे मेत्तारं भं गुरावतः। त्वमग्ने द्युभिस्त्वमाशुशुक्षणि स्त्वमद्भ्यः स्त्वमश्मन
स्परि। त्वं वनेभ्य स्त्वमोषधीभ्यः स्त्वं नृणां नृपते जायसे शुचिः॥५॥ प्रतूर्वन्नेह्यू
३ स्पतिष्ठ जिघर्मि मेत्तारं विः शति श्रव॥२॥ देवस्य त्वा सवितुः प्रसवेश्विनोर्बाहुभ्यां
पूष्णो हस्ताभ्यां पृथिव्याः सधस्थे ग्निं पुरीष्यमंगिरस्वत्खनामि। ज्यो
तिष्मंतं त्वाग्ने सुप्रतीकमजस्रेण भानुना दीद्यानं। शिवं प्रजाभ्यो
हिंसंतं पृथिव्याः सधस्थे ग्निं पुरीष्यमंगिरस्वत्खनामि। अपां पृष्ठमसि सप्र ३
रा थाउर्वग्निं भरिष्यदपरावपिष्ठं। वर्धमानं मह आ च पुष्करं दिवो मात्रया वरि
१ णा प्रथस्व॥ शर्म च स्थो॥२॥ वर्म च स्थो अच्छिद्रे बहुले उभे। व्यचस्वती
सा संवसाथां भर्तमग्निं पुरीष्यं। संवसाथां स्वर्विदा समीची उरसा त्मना।
अग्निमंतर्भरिष्यंती ज्योतिष्मंतमजस्रमित्। पुरीष्योसि विश्वभराः।

अथर्वा त्वा प्रथमो निरमंथदग्ने। त्वामग्ने पुष्करादध्यथर्वा निरमंथत॥ मूर्ध्नो वि
श्वस्य वाघतः॥ तमु त्वा दध्यङ् ऋषिः पुत्र ईधे॥२॥ अथर्वणः। वृत्रहणं पुरंदरं।
तमु त्वा पाथ्यो वृषा समीधे दस्युहंतमं। धनंजयं रणे रणे। सीद होतः स्व उ लो
के चिकित्वान्सादया यज्ञं सुकृतस्य योनौ। देवावीर्देवान्हविषा यजास्यग्ने
बृहद्यजमाने वयो धाः। नि होता होतृषदने विदानस्त्वेषो दीदिवाँ असद
त्सुदक्षः। अदब्धव्रतप्रमतिर्वसिष्ठः सहस्रंभरः शुचिजिह्वो अग्निः। सं
सीदस्व महाँ असि शोचस्व देव॥३॥ वीतमः। विधूममग्ने अरुषं मि
येध्य सृज प्रशस्त दर्शतं। जनिष्वा हि जेन्यो अग्ने अन्हां हितो हितेष्वरुषो व
नेषु। दमे दमे सप्त रत्ना दधानो ग्निर्होता निषसादा यजीयान्॥४॥ स्यईपे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं॰च॰ शोचस्व सं मविड्ढ शास्तिभिः॥३॥ सं ते वायुर्मातरिश्वा दधातूत्तानायै हृदयं यद्विलि
ष्टं। देवानां यश्चरति प्राणथेन तस्मै च देवि वषडस्तु तुभ्यं। सुजातो ज्योतिषा सह श
४ र्म वरूथमासदः स्वः॥ वासो अग्ने विश्वरूपं सं व्ययस्व विभावसो। उदु तिष्ठ स्व
ध्वरावा नो देव्या कृपा॥ दृशे च भासा बृहता सुशुक्वनिराग्ने याहि सुशस्तिभिः
॥१॥ ऊर्ध्व ऊ षु ण ऊतये तिष्ठा देवो न सविता। ऊर्ध्वो वाजस्य सनिता यदञ्जिभि
र्वाघद्भिर्विह्वयामहे। स जातो गर्भो असि रोदस्योरग्ने चारुर्विभृत ओषधी
षु। चित्रः शिशुः परि तमांस्यक्तूः प्र मातृभ्यो अधि कनिक्रदद्गाः। स्थिरो भ ४
व वीड्वङ्ग आशुर्भव वाज्यर्वन्। पृथुर्भव सुषदस्त्वमग्नेः पुरीषवाहनः। शि
वो भव॥२॥ प्रजाभ्यो मानुषीभ्यस्त्वमङ्गिरः॥ मा द्यावापृथिवी अभि शूशुचो
मान्तरिक्षं मा वनस्पतीन्। प्रैतु वाजी कनिक्रदन्नानदद्रासभः पत्वा। भर

मा न्नग्निं पुरीष्यं मा पाद्यायुषः पुरा। रासभो वां कनिक्रदत्सुयुक्तो वृषणा रथे। स वामग्निं
पुरीष्यमाशुर्दूतो वहादितः। वृषाग्निं वृषणं भरन्नपां गर्भं समुद्रियं। अग्न आ
याहि॥३॥ वीतये ऋतं सत्यं। ओषधयः प्रतिगृभ्णीताग्निमेतं शिवमायन्त
मभ्यत्र युष्मान्। व्यस्यन्विश्वा अमतीररातीर्निषीदन्नो अप दुर्मतिं हनत्।
ओषधयः प्रतिमोदध्वमेनं पुष्पावतीः सुपिप्पलाः। अयं वो गर्भ ऋत्वियः
प्रत्नं सधस्थमासदत्॥४॥ सुशस्तिभिः शिवो भव याहि षउ सिंशाश्च॥
५॥ विपाजसा पृथुना शोशुचानो बाधस्व द्विषो रक्षसो अमीवाः। सुश
र्मणो बृहतः शर्मणि स्यामग्नेरहं सुहवस्य प्रणीतौ। आपो हि ष्ठा मयोभुवस्ता
वस्ता न ऊर्जे दधातन। महे रणाय चक्षसे। यो वः शिवतमो रसस्तस्य भाज
यतेह नः। उशतीरिव मातरः। तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ। आ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०७० पोजनयथाचनः ॥ मित्रः ॥ २ ॥ सꣳसृज्य पृथिवीं भूमिं च ज्योतिषा सह ॥ सुजातं जातवे
८ दसमग्निं वैश्वानरं विभुं ॥ यक्ष्माय त्वा सꣳसृजामि प्रजाभ्यः ॥ विश्वे त्वा देवा वैश्वानराः
सꣳसृजंत्वानुष्टुभेन छंदसांगिरस्वत् ॥ रुद्राः संभृत्य पृथिवीं बृहज्ज्योतिः स
मीधिरे ॥ तेषां भानुरजस्र इच्छुक्रो देवेषु रोचते ॥ सꣳसृष्टां वसुभी रुद्रैर्धीरैः क
र्मण्यां मृदं ॥ हस्ताभ्यां मृद्वीं कृत्वा सिनीवाली करोतु ॥ ३ ॥ तां सिनीवाली सुक
पर्दा सुकुरीरा स्वौपशा ॥ सा तुभ्यमदिते मह्योखां दधातु हस्तयोः ॥ उखां ५
करोतु शक्त्या बाहुभ्यामदितिर्धिया ॥ माता पुत्रं यथोपस्थे साग्निं बिभर्तु ग
र्भ आ ॥ मखस्य शिरोसि यज्ञस्य पदे स्थः ॥ वसवस्त्वा कृण्वंतु गायत्रेण छंद
सांगिरस्वत्पृथिव्यसि रुद्रास्त्वा कृण्वंतु त्रैष्टुभेन छंदसांगिरस्वदंतरिक्ष
सि ॥ ३ ॥ आदित्यास्त्वा कृण्वंतु जागतेन छंदसांगिरस्वद्द्यौरसि

विश्वे त्वा देवा वैश्वानराः कृण्वंत्वानुष्टुभेन छंदसांगिरस्वद्दिशोसि ध्रुवासि धा
रयामयि प्रजाꣳ रायस्पोषं गौपत्यꣳ सुवीर्यꣳ सजातान्यजमानायादित्यै रास्ना
स्यदितिस्ते बिलं गृभ्णातु पांक्तेन छंदसांगिरस्वत् ॥ कृत्वाय सा महीमुखां मृ
न्मयीं योनिमग्नये ॥ तां पुत्रेभ्यः संप्रायच्छददितिः श्रपयानिति ॥ ४ ॥ मित्रः करोत्वंत
रिक्षमसि प्र चत्वारि च ॥ ५ ॥ वसवस्त्वा धूपयंतु गायत्रेण छंदसांगिरस्वद्रुद्रास्त्वा धू
पयंतु त्रैष्टुभेन छंदसांगिरस्वदादित्यास्त्वा धूपयंतु जागतेन छंदसांगिरस्वद्विश्वे
त्वा देवा वैश्वानरा धूपयंत्वानुष्टुभेन छंदसांगिरस्वदिंद्रस्त्वा धूपयत्वंगिरस्वद्वि
ष्णुस्त्वा धूपयत्वंगिरस्वद्वरुणस्त्वा धूपयत्वंगिरस्वददितिस्त्वा देवी विश्वदेव्याव
ती पृथिव्याः सधस्थेंगिरस्वत्खनत्ववटदेवानां त्वा पत्नीः ॥ २ ॥ देवीर्विश्वदे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०च
६

व्यावतीः पृथिव्याः सधस्थेंगिरस्वद्दधतूखे धिषणास्त्वादेवीर्विश्वदेव्यावतीः पृथि
व्याः सधस्थेंगिरस्वदभींधतामुखे ग्नास्त्वादेवीर्विश्वदेव्यावतीः पृथिव्याः सध
स्थेंगिरस्वछ्रपयंतूखे वरूत्रयो जनयस्त्वादेवीर्विश्वदेव्यावतीः पृथिव्याः सधस
स्थेंगिरस्वत्पचंतूखे। मित्रैतामुखांपचैषामाभेदि। एतांतेपरिददाम्यभित्त्यै॥
अभीमां॥२॥ महिनादिवंमित्रोबभूवसप्रथाः॥ उतश्रवसापृथिवीं॥ मित्रस्य
चर्षणीधृत श्रवोदेवस्यसानसिं। द्युम्नंचित्रश्रवस्तमं। देवस्त्वासवितोद्वप ६
तुसुपाणिःस्वंगुरिः। सुबाहुरुतशक्त्या। अव्यथमानापृथिव्यामाशादिशआपृ
णा। उत्तिष्ठबृहतीभवोर्ध्वातिष्ठध्रुवात्वं। वसवस्त्वाछृंदंतुगायत्रेणछंद
सांगिरस्वद्रुद्रास्त्वाछृंदंतुत्रैष्टुभेनछंदसांगिरस्वदादित्यास्त्वाछृंदंतु

जागतेनछंदसांगिरस्वद्विश्वेत्वादेवावैश्वानराआछृंदंत्वानुष्टुभेनछंदसांगिरस्वत्॥३॥
फ्लोपरिमाः॥ रुद्रास्त्वाछृंदंत्वेकान्नविंशतिश्च॥६॥ समास्त्वाग्नऋतवो
वर्धयंतुसंवत्सराऋषयोयानिसत्या। संदिव्येनदीदिहिरोचनेनविश्वाआभा दी
हि प्रदिशःपृथिव्याः। संचेध्यस्वाग्नेप्रचबोधयैनमुच्चतिष्ठमहतेसौभगाय॥
।माचरिषदुपसत्तातेअग्नेब्रह्माणस्तेयशसःसंतुमान्ये। त्वामग्नेवृणतेब्रा
ह्मणाइमेशिवोअग्ने॥१॥ संवरणेभवानः। सपत्नहानोअभिमातिजिच्चस्वे
गयेजागृह्यप्रयुछन्॥ इहैवाग्नेअधिधारयारयिंमा ~~निक्रं~~ ॥ त्वानि
क्रन्पूर्वचित्तानिकारिणः॥ क्षत्रमग्नेसुयममस्तुतुभ्यमुपसत्तावर्धतां म
तेअनिष्टृतः॥ क्षत्रेणाग्नेस्वायुःसंरभस्वमित्रेणाग्नेमित्रधे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं॰च॰ ह्वौअति॥२॥

येतेयेस्व॥सप्तातानांमध्यमस्याऽएधिरा तामग्नेविहव्यो दीदिहीं॥२॥निहोअ
तिस्रिघोत्यक्षितिमत्यरामीतेग्ने॥विश्वाघ मेदुंता सहस्वा या समभ्यं॑ सहस्वीरां रयिं
दाः॥अनाधृष्यो जातवेदा अनिष्टृतो विराडग्ने क्षत्रभृद् दीदिहीह॥विश्वा आशाः
प्रमुंचन्मानुषीर्भियः शिवाभिरद्यपरि पाहि नो वृधे॥बृहस्पते सवितर्बोधये
नं॒ संशितं चित्संतरां सं शिशाधि॥वर्द्धयैनं महते सौभगाय॥३॥
विश्वएनमनुमदंतु देवाः॥अमुत्रभूयादध यद्यमस्य बृहस्पते अभिशस्तेरमु
चः॥प्रत्यौहतामश्विनामृत्युमस्माद्देवानामग्ने भिषजा शचीभिः॥उद्वयं
तमसस्परि स्वः पश्यंत उत्तरं॥देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमं
॥४॥ इमेशिवो अग्नेति सौभगायय तुरिशाद्य॥७॥उर्ध्वा अ

स्य समिधो भवंत्यूर्ध्वा शुक्रा शोचींष्यग्नेः॥द्युमत्तमा सुप्रतीकस्य सूनोः॥तनून
पादसुरो विश्ववेदा देवो देवेषु देवः॥पथ आनक्ति मध्वा घृतेन॥मध्वा यज्ञं न
क्षसे प्रीणानो नराशंसो अग्ने॥सुकृद्देवः सविता विश्ववारः॥अच्छायमेति
शवसा घृतेनेडानो वह्निर्नमसा॥अग्निं स्रुचो अध्वरेषु प्रयक्षु॥सयक्ष
दस्य महिमानमग्नेः॥१॥ई मंद्रासु प्रयसः॥वसुश्चेतिष्ठो वसुधातमश्च
॥द्वारो देवीरन्वस्य विश्वे व्रतादंदते अग्नेः॥उरुव्यचसो धाम्ना पत्यमानाः १४
॥ते अस्य योषणे दिव्ये न योना उषासानक्ता॥इमं यज्ञमवतामध्वरं नः॥
दैव्या होतारा ऊर्ध्वमध्वरं नो ग्नेर्जिह्वामभिगृणीतं॥कृणुतं नः स्विष्टिं॥
तिस्रो देवीर्बर्हिरेदं सदंतु इडा सरस्वती॥२॥भारती॥मही गृणाना॥त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं० ब
९

न्ने: सुरीपमन्तु तेपुरुक्षु त्वेषाः सुवीरं। रायस्पोषं विष्यतु नाभिमस्मे। वनस्पतेव
सृजा रराणः त्मना देवेषु। अग्निर्हव्यं शमिता सूदयाति। अग्ने स्वाहा कृ
णुहि जातवेद इंद्राय हव्यं। विश्वे देवा हविरिदं जुषंतां। हिरण्यगर्भः समवर्त
ताग्रे भूतस्य जातः पतिरेक आसीत्। स दाधार पृथिवीं द्यां। १। उतेमां कस्मै देवा
य हविषा विधेम। यः प्राणतो निमिषतो महित्वैक इद्राजा जगतो बभूव। य ई
शे अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम। य आत्मदा बल
दा यस्य विश्व उपासते प्रशिषं यस्य देवाः। यस्य छायामृतं यस्य मृत्युः राम
कस्मै देवाय हविषा विधेम। यस्येमे हिमवंतो महित्वा यस्य समुद्रं
रसया सह। ४। आहुः। यस्येमाः प्रदिशो यस्य बाहू कस्मै देवाय

हविषा विधेम। यं क्रंदसी अवसा तस्तभाने अभ्यैक्षेतां मनसा रेजमाने। यत्राधि
सूर उदितो व्येति कस्मै देवाय हविषा विधेम। येन द्यौरुग्रा पृथिवी च दृढे येन स्वस्त सु
भितं येन नाकः। यो अंतरिक्षे रजसो विमानः कस्मै देवाय हविषा विधेम। आ
पो ह यन्महतीर्विश्वं। ५। पाद। आयं दक्षं दधाना जनयंतीरग्निं। ततो देवानां समवर्ततासु
रेकः। कस्मै देवाय हविषा विधेम। यश्चिदापो महिना पर्यपश्यद्दक्षं दधाना जनयंतीरग्निं
। यो देवेष्वधि देव एक आसीत् कस्मै देवाय हविषा विधेम। ६। अग्नेः स
सरस्वती याः सह विश्वं चतुस्त्रिंशत्। ७। आकूतिमग्निं प्रयुजं स्वा
हा मनो मेधामग्निं प्रयुजं स्वाहा चित्तं विज्ञातमग्निं प्रयुजं स्वाहा वाचो
विधृतिमग्निं प्रयुजं स्वाहा प्रजापतये मनवे स्वाहाग्नये वैश्वानरा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं॰च

पुत्वाह। विश्वेदेवस्य नेतुर्मर्तो वृणीत सख्यं विश्वे राय इषुध्यसि द्युम्नं वृणीत पुष्यसे स्वाहा। मा
१ सु भित्था मा सु रिषो दृं२ स्वेह वीड्य स्वसु। अंब धृष्णु वीरस्वा॥। १॥ अग्निश्चेदं करिष्यथः॥
दृं२ह स्व देवी पृथिवि स्वस्तय आसुरी माया स्वधया कृतासि। जुष्टं देवानामिदमस्तु हव्यम
रिष्टा त्वमुदिहि यज्ञे अस्मिन्न। मित्रैतामु खां तपेषा मा भेदि। एतां ते परिददाम्यभित्त्यै। द्रु
वन्नः सर्पिरासुतिः प्रत्नो होता वरेण्यः। सहसस्पुत्रो अद्भुतः। परस्या अधि संवतोवरां२ १
अभ्या॥२॥ तरा यत्राहमस्मि तां२ अव। परमस्याः परावतो रोहिदश्व इहा गहि।
पुरीष्यः पुरुप्रियोग्ने त्वं तरा मृधः। सीद त्वं मातुरस्या उपस्थे विश्वान्यग्ने वयुनानि वि
२१ द्वान्। मैनामर्चिषा मा तपसाभि शूशुचोन्तरस्यां शुक्रज्योतिर्विभाहि। अन्तरग्ने रु
चा त्वमुखायै सदने स्वे। तस्यास्त्वं हरसा तपञ्जातवेदः शिवो भव॥ शिवो भूत्वा मह
३ मग्ने अथो सीद शिवस्त्वं। शिवाः कृत्वा दिशः सर्वाः स्वां योनिमिहासदः॥ ३॥ वीरयस्वो

घ

तपन्विं२ शतिश्च॥१॥ यदग्ने यानि कानि चा ते दारूणि दध्मसि। तदस्तु तुभ्यमिद्घृतं तज्जु
षस्व यविष्ठ्य। यदत्त्युपजिह्विका यद्वम्रो अतिसर्पति। सर्वं तदस्तु ते घृतं तज्जुषस्व
यविष्ठ्य। रात्रिं२ रात्रिमप्रयावं भरन्तोश्वायेव तिष्ठते घासमस्मै। रायस्पोषेण समिषा म
दन्तोग्ने मा ते प्रतिवेशा रिषाम। ना ना॥१॥ पृथिव्याः सिं समिधानमग्निं२ रायस्पोषाय बृ
हते हवामहे। इरंमदं बृहदुक्थं यजत्रं जेतारमग्निं पृतनासु सासहिं। याः सेना अभी
त्वरीराव्याधिनीरुगणा उत॥ ये स्तेना ये च तस्करास्तां२ स्ते अग्नेपि दधाम्यास्ये।
दं२ष्ट्राभ्यां मलिम्लूञ्जम्भ्यैस्तस्करां२ उत। हनुभ्यां स्तेनान्भगवस्तां२ स्त्वं खाद सुखा
दितान्॥ ये जनेषु मलिम्लव स्तेनासस्तस्करा वने। ये॥२॥ कक्षेष्वघायवस्तां२ स्ते
दधामि जम्भयोः। यो अस्मभ्यमरातीयाद्यश्च नो द्वेषते जनः। निन्दाद्यो अ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं॰च॰ स्मांदिवंगच्छसुवःपत॥ससाकुरु। संशितंमेब्रह्मसंशितंवीर्यंबलं। संशितंक्षत्रंजिष्णु
यस्याहमस्मिपुरोहितः। उदेषांबाहूअतिरमुद्वर्चोउदुबलं॥ क्षिणोमिब्रह्मणामित्रां
१० उन्नयामि॥३॥ स्वां॥ अहं॥ दृशानोरुक्मउर्व्याव्यद्यौद्दुर्मर्षमायुश्रियेरुचानः। अ
ग्निरमृतोअभवद्वयोभिर्यदेनंद्यौरजनयत्सुरेताः। विश्वारूपाणिप्रतिमुंचतेक
विःप्रासावीद्भद्रंद्विपदेचतुष्पदे। विनाकमख्यत्सवितावरेण्यानुप्रयाणमुषसो
विराजति। नक्तोषासासमनसाविरूपेधापयेतेशिशुमेकंसमीची। द्यावाक्षामा १०
रुक्मः॥४॥ अंतर्विभातिदेवाअग्निंधारयंद्रविणोदाः। सुपर्णोसिगरुत्मांत्रिवृत्ते
शिरोगायत्रंचक्षुस्तोमआत्मासामतेतनूर्वामदेव्यंबृहद्रथंतरेपक्षौयज्ञाय
ज्ञियंपुच्छंछंदांस्यंगानिधिष्णियाःशफायजूंषिनाम। सुपर्णोसिगरुत्मांदि

वंगच्छसुवःपत॥८॥ नाभावनेयेनयामिक्षामारुक्मोष्ठात्रिंशाख॥१०॥ अग्नेयंयज्ञ
मध्वरंविश्वतःपरिभूरसि। सइद्देवेषुगच्छति। सोमयास्तेमयोभुवऊतयःसंदाशुषे। ता ति २
भिर्नोविताभव। अग्निर्मूर्धा। भुवः। त्वंनः। सोमयाते धामानि। तत्सवितुर्वरेण्यंभर्गो
देवस्यधीमहि। धियोयोनःप्रचोदयात्॥ अचित्तीयच्चकृमादैव्येजनेदीनैर्दक्षैः ३
प्रभूतीपूरुषत्वता॥३॥ देवेषुचसवितर्मानुषेषुचत्वंनोअत्रसुवतादनागसः।
चोदयित्रीसूनृतानांचेतंतीसुमतीनां। यज्ञंदधेसरस्वती। पावीरवीकन्याचित्रा
युःसरस्वतीवीरपत्नीधियंधात्। ग्नाभिरच्छिद्रंशरणंसजोषादुराधर्षंगृ
णतेशर्मयंसत्। पूषागाअन्वेतुनःपूषारक्षत्वर्वतः। पूषावाजंसनोतुनः।
शुक्रंतेअन्यद्यजतंतेअन्यत्॥२॥ विषुरूपेअहनीद्यौरिवासि। विश्वाहि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं० व
मा या। अवसिस्व ध्यावो भग्नालेपूषंन्निह रातिरस्क। तेवर्ई लस्वतवसोम हित्व नाकं तुङ
२२ स्थु रु रु चक्रिरे सदः। विष्णुर्य ध्यावद्ध षणंमदच्युतं वयो नसीदं न धिर्वार्हिषिप्रिये
।प्रचित्रमर्के गृणते तु रायमारु ताय स्वतवसे भ्रर ध्वं। येसहांऽसिसहसा सहंते।।
शा रेजते अग्ने पृथिवी मखेभ्यः। विश्वे देवा विश्वेदेवाः।। द्यावा नः पृथिवी
१ इमंऽसिध्रमद्यदिस्पृशं। यज्ञं देवेषु यच्छतां। प्रपूर्वजे पितरा नव्यसीभिर्गीर्भिः
कृणुध्वंऽसदने ऋतस्य। आनो द्यावापृथिवी दैव्येन जनेन यातं महि वां व
अ रूथं। अग्निंऽस्तोमेन बोधय समिधानो अमर्त्यं। हव्या देवेषु नो दधत्।। स हव्य २२।
३ वाड मर्त्य उशिग्दूतश्च नोहितः। अग्निर्धिया समृण्वति।। शं नो भवंतु वा
जे वाजे।।४।। पुरुषत्वता यज्ञांतं ने अन्यत्संहते च नोहितोषोचे।। युञ्जानः

मामग्र भ्यां देवस्य सं ते विपा जसः व सवं समोस्त्वोऽर्ध्वा अस्याकूतिं यदग्नेयां न्य स्त्वा
१ ग्नेयं सोमे काद्दश।।१।। युञ्जानो वर्मे चस्थ आदित्यास्त्वा भारती स्वाऽहऽ
षट्चत्वारिंऽशत्।। ४६।। हरिः ओम्।। ।।विष्णोः क्रमोस्यभिमाति
हा गायत्रं छंद आरोह पृथिवीमनु विक्रमस्व निर्भक्तः स यं द्विष्मो विष्णोः क्र
मोस्यभि शस्तिहा त्रैष्टुभं छंद आरोहांतरिक्षमनु विक्रमस्व निर्भक्तः स
क्रे यं द्विष्मो विष्णोः क्रमोस्यरातीयतो हंता जागतं छंद आऽरोह दिवमनु विक्र
४ मस्व निर्भक्तः स यं द्विष्मो विष्णोः।।१।। क्रमोसि शत्रूयतो हंतानुष्टुभं छं
५ द आरोह दिशोनु विक्रमस्व निर्भक्तः यं से द्विष्मः। अक्रंदद् अग्नि स्तनयन्नि
२ व द्यौः क्षामा रेरिहद्वीरुधः समंजन्। सद्यो जज्ञानो विहीमिद्धो अ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

व्यचसा रोदसी भानुना भात्यंता:। अग्नेभ्यावर्तिन्नभिन आवर्त्तस्वायुषावर्चसा स
१२ न्यामेधयाप्रजयाधनेन॥ अग्ने॥२॥ अग्नि शतंतेसंत्वावृत: सहस्रंतउपाव
त:। अधापोषस्यपोषेणपुनर्नोनष्टमाकृधिपुनर्नोरयिमाकृधि। पुनरू
र्जानिवर्त्तस्वपुनरग्नइषायुषा॥ पुनर्न:पाहिविश्वत:॥ सहरय्यानिवर्त्त
स्वाग्नेपिन्वस्वधारया॥ विश्वप्स्न्यायाविश्वतस्परि। उदुत्तमंवरुणपाशमस्म
दवाधमं॥३॥ विमध्यमंश्रथाय। अथावयमादित्यव्रतेतवानागसोअदि
तयेस्याम। आत्वाहार्षमंतरभूर्ध्रुवस्तिष्ठाविचाचलि:। विशस्त्वासर्वावांछंत्व
स्मिन्राष्ट्रमधिश्रया। अग्रेबृहन्नुषसामूर्ध्वोअस्थान्निर्जगन्वान्तमसोज्यो
तिषागात्। अग्निर्भानुनारुशतास्वंगआजातोविश्वासद्मान्यप्रा:। सीदत्वंमा
तुरस्या:॥४॥ उपस्थेविश्वान्यग्नेवयुनानिविद्वान्। मैनामर्चिषामा तपसा

भिशूशुचोंतरस्या:शुक्रज्योतिर्विभाहि। अंतरग्नेरुचात्वमुखायै सदनेस्वे। तस्या
स्त्वं:हरसातपंजातवेद:शिवोभव। शिवोभूत्वामह्यमग्नेथोसीदशिवस्त्वं। शिवा:
कृत्वादिश:सर्वा:स्वांयोनिमिहासद:। हंस:शुचिषद्वसुरंतरिक्षसद्धोतावेदिषद
तिथिर्दुरोणसत्। नृषद्वरसदृतसद्व्योमसदब्जागोजाऋतजाअद्रिजाऋतंबृहत् स४३
॥५॥ दिवमनुविक्रमस्वनिर्भक्त:सयंद्विष्मोविष्णोर्धनेनाग्नेधममस्या:शुचिषत्
षोडश॥१॥ दिवस्परिप्रथमंजज्ञेअग्निरस्मद्द्वितीयंपरिजातवेदा:। तृतीयम
प्सुनृमणाअजस्रमिंधानएनंजरतेस्वाधी:। विद्मातेअग्नेत्रेधात्रयाणिविद्माते
धामविभृतापुरुत्रा। विद्मातेनामपरमंगुहायद्विद्मातमुत्संयतआजगंथ। स
मुद्रेत्वानृमणाअप्स्वंतर्नृचक्षाईधेदिवोअग्नऊधन्। तृतीयेत्वा॥२॥ रजसि
तस्थिवांसमपामुपस्थेमहिषाअवर्धन्। अक्रंदद्ग्निस्तनयन्निवद्यौ:

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०च० क्षामारेरिहद्वीरुधःसमंजन्।सद्योजज्ञानोविहीमिद्धोअ[illegible]ख्यदारोदसीभानुना
२३ भात्यंतः।उशिक्पावकोअरतिःसुमेधामर्त्तेष्वग्निरमृतोनिधायि।इयर्त्तिधूममम
रुषंभरिभ्रदुच्छुक्रेणशोचिषाद्यामिनक्षन्।विश्वस्यकेतुर्भुवनस्यगर्भआ॥२॥
रोदसीअपृणाज्जायमानः।वीडुंचिदद्रिमभिनत्परायंजनायदग्निमयजंतपंच।
श्रीणामुदारोधरुणोरयीणांमनीषाणांप्रार्पणःसोमगोपाः।वसोःसूनुःसह
सोअप्सुराजाविभात्यग्रेउषसामिधानः।यस्तेअद्यकृणवद्भद्रशोचेपूपंदे
वघृतवंतमग्ने।प्रतंनयप्रतरांवस्योअच्छाभिसुम्नंदेवभक्तंयविष्ठ।आ॥३॥ २३
तंभजसौ[illegible]श्रवसेष्वग्नउक्थउक्थआभजशस्यमाने।प्रियःसू[illegible]र्येप्रियो
अग्नाभवात्युज्जातेनभिनददुज्जनित्वैः।त्वामग्नेयजमानाअनुद्यून्विश्वा
वसूनिदधिरेवार्याणि।त्वयासहद्रविणमिच्छमानाव्रजंगोमंतमुशिजोविव

व्रुः।दृशानोरुक्मउर्व्याव्यद्यौद्दुर्मर्षमायुःश्रियेरुचानः।अग्निरमृतोअभवद्वयोभि
र्यदेनंद्यौरजनयत्सुरेताः॥१॥त्वतीयेत्वागमेआयविष्ठायचत्वारिच॥२॥अं
नपतेन्नस्यनोदेहि[illegible]ह्यनमीवस्यशुष्मिणः।प्रप्रदातारंतारिषऊर्जं
नोधेहिद्विपदेचतुष्पदे।उदुत्वाविश्वेदेवाअग्नेभरंतुचित्तिभिः।सनोभवशिव
तमःसुप्रतीकोविभावसुः।प्रेदग्नेज्योतिष्मान्याहिशिवेभिरर्चिभिस्त्वं।बृहद्भि
र्भानुभिर्भासन्माहिंसीस्तन्वाप्रजाः।समिधाग्निंदुवस्यतघृतैर्बोधयता
तिथिं।आ॥४॥अस्मिन्हव्याजुहोतन।प्रप्रायमग्निर्भरतस्यशृण्वेवियत्सूर्यो
नरोचतेबृहद्भाः।अभियःपूरुंपृतनासुतस्थौदीदायदैव्योअतिथिःशिवोनः।
आपोदेवीःप्रतिगृह्णीतभस्मैतत्स्योनेकृणुध्वंसुरभावुलोके।तस्मै

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०च०

नमेतां जयः सुपत्नी मातेव पुत्रं बिभृता स्वेनं। अप्स्वग्ने सधिष्टव ॥३॥ सौषधीरनुरुध्य
२४ से। गर्भे सं जायसे पुनः। गर्भो अस्योषधीनां गर्भो वनस्पतीनां। गर्भो विश्वस्य भूतस्या
ग्ने गर्भो अपामसि। प्रसद्य भस्मना योनिमपश्च पृथिवीमग्ने। संसृज्य मातृभि
ष्ट्वं ज्योतिष्मान्पुनरासदः। पुनरासद्य सदनमपश्च पृथिवीमग्ने। शेषे मातुर्यथो
पस्थेन्तरस्यां शिवतमः। पुनरूर्जा ॥३॥ निवर्तस्व पुनरग्न इषायुषा। पुनर्नः पा
हि विश्वतः ॥ सह रय्या निवर्तस्वाग्ने पिन्वस्व धारया। विश्वप्स्न्या विश्वतस्प २४
दि स्यौरि। पुनस्त्वादित्या रुद्रा वसवः समिन्धतां पुनर्ब्रह्माणो वसुनीथ यज्ञैः। घृतेन त्वं तनु
वं वर्धयस्व सत्याः सन्तु यजमानस्य कामाः। बोधा नो अस्य वचसो यविष्ठ
मंहिष्ठस्य प्रभृतस्य स्वधावः। पीयति त्वो अनु त्वो गृणाति वन्दारुष्टे तनु
वं वन्दे अग्ने। स बोधि सूरिर्मघवा वसुदावा वसुपतिः। युयोध्यस्म

द्वेषांसि ॥४॥ आलवो जीनुषाउश्च ॥३॥ अपेत वीत वि च सर्पतातो येऽत्र स्थ पुराणा
ये च नूतनाः। अदाद्दिदं यमोऽवसानं पृथिव्या अक्रन्निमं पितरो लोकमस्मै। अग्ने
र्भस्मास्यग्नेः पुरीषमसि संज्ञानमसि कामधरणं मयि ते कामधरणं भूयात्। संया
वः प्रियास्तनुवः संप्रिया हृदयानि वः। आत्मा वो अस्तु ॥१॥ संप्रियः संप्रियास्तनुवो मम।
अयं सो अग्निर्यस्मिन्त्सोममिन्द्रः सुतं दधे जठरे वावशानः। सहस्रियं वाजमत्यं न
८ सप्तिं ससवान्त्सन्त्स्तूयसे जातवेदः। अग्ने दिवो अर्णमच्छा जिगास्यच्छा देवाँ ऊचि
षे धिष्ण्या ये। याः परस्ताद्रोचने सूर्यस्य याश्चावस्तादुपतिष्ठन्त आपः। अग्ने यत्ते दि
वि वर्चः पृथिव्यां यदोषधीष्वा ॥२॥ अप्सु वा यजत्र। येनान्तरिक्षमुर्वाततन्थ त्वेषः स भा
नुरर्णवो नृचक्षाः। पुरीष्यासो अग्नयः प्रावणेभिः सजोषसः। जुषन्तां हव्यमाहु
तमनमीवा इषो महीः ॥ इडामग्ने पुरुदंसं सनिं गोः शश्वत्तमं हवमानाय साध।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं॰च॰

स्यान्नः सूनुः स्तनयो विजावाग्नेसालेसुमतिर्मेस्तु स्मे। यं ते योनिर्ऋत्वियायतो जा

१५ तो अरोचथाः। तं जानन्न॥ ३॥ अग्न आरोहाथा नो वर्धयारयिं। चिदसितयादेवत

यांगिरस्वद्ध्रुवासीदपरिचिदसितयादेवतयांगिरस्वद्ध्रुवासीद लोकंपृणछिद्रंपृण

थोसीदशिवात्वं॥ इन्द्राग्नी त्वा बृहस्पतिरस्मिन्योनावसीषदन्॥ ता अस्यसूददो

हसः सोमं श्रीणन्ति पृश्नयः। जन्मन्देवानांविशस्त्रिष्वा रोचने दिवः॥ ४॥ अनु त्वाप

चीसु जानंभुष्टाचत्वारिंशच्च॥ ४॥ समितं संकल्पेथां संप्रियौ रोचिष्णू सु १५

मनस्यमानौ। इषमूर्जमभिसंवसानौ संवाम्मनांसि सं व्रता समु चित्तान्याकरं॥

अग्ने पुरीष्याधिपा भवा त्वं नः। इषमूर्जं यजमानाय धेहि। पुरीष्यस्त्वमग्ने र

यिमान्पुष्टिमां अंसि। शिवाः कृत्वा दिशः सर्वाः स्वां योनिमिहासदः। भवतं नः सम

नसौ समोकसौ। २। अरेपसौ। माय ज्ञं हिं सिष्टं मा यज्ञपतिं जातवेदसौ शि

वौ भवतमद्य नः। मातेव पुत्रं पृथिवी पुरीष्यमग्निं स्वे योनावभारुखा। तां विश्वैर्देवैरृतु

भिः संविदानः प्रजापतिर्विश्वकर्मा विमुञ्चतु। यदस्य पारे रजसः शुक्रं ज्योतिरजाय

त। तन्नः पर्षदति द्विषोग्ने वैश्वानर स्वाहा। नमः सु ते निर्ऋते विश्वरूपे। ॥२॥ अ

यस्मयं वि चृता बन्धमेतं। यमेन त्वं यम्या संविदानोत्तमं नाकमधिरोहयेमं। यत्ते

देवी निर्ऋतिराबबन्ध दाम ग्रीवास्वविचृत्यं। इदं ते तद्विष्याम्यायुषो न मध्यादथा जीवः

पितुमद्धि प्रमुक्तः। यस्यास्ते अस्याः क्रूर आसंजुहोम्येषां बन्धानामवसर्जनाय॥ भू

मिरिति त्वा जना विदुर्निर्ऋतिः॥ ३॥ इति त्वाहं परि वेद विश्वतः। असुन्वन्तमयज मा x ७

मानमिच्छ स्तेनस्येत्यां तस्करस्यान्वेषि। अन्यमस्मदिच्छ सा त इत्या नमो देवि निर्ऋते तु

भ्यमस्तु। देवीमहं निर्ऋतिं वन्दमानः पितेव पुत्रं दसये वचोभिः। विश्वस्य या जायमान

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं॰च॰ स्यवेदशिरःशिरःप्रतिसूरीविचष्टे।निवेशनःसंगमनोवसूनांविश्वारूपाभिचष्टे॥
२६ ४॥शचीभिः।देवइवसवितासत्य।धर्मेन्द्रोनतस्थौसमरेपथीनां।संवरत्रादधात
ननिराहावान्कृणोतन।सिंचामहा।अवटमुद्रिणंवयंविश्वाहादस्तमक्षितं। नि
ष्कृताहावमवटःसुवरत्रंसुषेचनं।उद्रिणंसिंचेअक्षितं।सीरायुंजंतिक
ते वयोयुगाविन्वतेपृथक्।धीरादेवेषुसुम्नया।युनक्तसीराविषुगातनोतकृतेयो
नौवपतेह॥८॥बीजं।गिराचश्रुष्टिःसभराअसन्नोनेदीयइत्सृण्यःपक्वमाय २६
त्।लांगलंपवीरवत्सुशेवंसुमतित्सरु।उदित्कृषतिगामविंप्रफर्व्यंचपीव
री।प्रस्थावद्रथवाहनं।शुनंनःफालावितुदंतुभूमिंशुनंकीनाशाअभि
यंतुवाहान्।शुनंपर्जन्योमधुनापयोभिःशुनासीराशुनमस्मासुधत्तं।का

मेकामदुघेधुक्ष्वमित्रायवरुणायच॥इंद्रायाग्नयेपूष्णओषधीभ्यःप्रजाभ्यः।घृते
नसीतामधुनासमक्ताविश्वैर्देवैरनुमतामरुद्भिः।ऊर्जस्वतीपयसापिन्वमाना
स्मांत्सीतेपयसाभ्याववृत्स्व॥६॥समीकसौविश्वरूपेविदुर्निर्ऋतिरभिचष्टइह
मित्रायद्वाविंशतिश्च॥५॥याजाताओषधयोदेवेभ्यस्त्रियुगंपुरा।मंदामि
बभ्रूणामहंशतंधामानिसप्तच।शतंवोअंबधामानिसहस्रमुतवोरुहः।अ
थाशतक्रत्वोयूयमिमंमेअगदंकृत।पुष्पावतीःप्रसूवतीःफलिनीरफलाउत।
अश्वाइवसजित्वरीर्वीरुधःपारयिष्ण्वः।ओषधीरितिमातरस्तद्वोदेवीरुप
ब्रुवे।रपांसिविघ्नतीरितरपः॥१॥चातयमानाः।अश्वत्थेवोनिषदनंप
र्णेवोवसतिष्कृता।गोभाजइत्किलासथयत्सनवथपूरुषं।यदहंवाजयन्नि
माओषधीर्हस्तआदधे।आत्मायक्ष्मस्यनश्यतिपुराजीवगृभोयथा।य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं॰च॰
दोषधयः संगच्छंते राजानः समिताविव। विप्रः स उच्यते भिषग्रक्षोहामीवचातनः।
१७ निष्कृतिर्नाम वो माता था यूयं स्थ संकृतीः। सराः पतत्रिणीः।।२।। स्थन यदाम
यति निष्कृता। अन्या वो अन्यामवत्वन्यान्यस्या उपावत। ताः सर्वा ओषधयः सं
विदाना इदं मे प्रावता वचः। उच्छुष्मा ओषधीनां गावो गोष्ठादिवेरते। धनं सनि
ष्यंतीनामात्मानं तव पूरुष।। अति विश्वाः परिष्ठा स्तेन इव व्रजमक्रमुः। ओ
ओषधयः प्राचुच्यवुर्यत्किं च तन्वो३ रपः। या ३।। ल आ तस्थुरात्मानं या आ
विविशुः परुः परुः। तास्ते यक्ष्मं विबाधंतामुग्रो मध्यमशीरिव। साकं यक्ष्मप्र २७
पतश्येनेन किकिदीविना। साकं वातस्य ध्राज्या साकं नश्य निहाकया। अश्वा
वतीं सोमवतीमूर्जयंतीमुदोजसं। आवित्सि सर्वा ओषधीरस्मा अरिष्ट
तातये। याः फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः। बृहस्पतिप्रसूता

स्तानो मुंचंत्वंहसः। पा।। ५।। ओषधयः सोमराज्ञीः प्रविष्टाः पृथिवीमनु। तासां त्व
मस्युत्तमा प्रणो जीवातवे सुव।। अवपतंतीरवदन्दिव ओषधयः परि। यं जीवमश्नवा
महै न स रिष्याति पूरुषः। याश्चेदमुपशृण्वंति याश्च दूरं परागताः। इह संगत्य ताः सर्वा
अस्मै सं दत्त भेषजं। मा वो रिषत्खनिता यस्मै चाहं खनामि वः।। द्विपच्चतुष्पदस्माकं स
र्वमस्त्वनातुरं। ओषधयः संवदंते सोमेन सह राज्ञा। यस्मै करोति ब्राह्मणस्तं राज
न्पारयामसि।। ६।। र पः पतत्रिणीर्या अंहसो याः खनामि वोषादश्च च।। ६।।
मा नो हिंसीज्जनिता यः पृथिव्या यो वा दिवं सत्यधर्मा जजान। यश्चापश्चंद्रा
बृहतीर्जजान कस्मै देवाय हविषा विधेम। अभ्यावर्तस्व पृथिवि यज्ञेन पय
यसा सह। वपां ते अग्निरिषितो वसर्पतु। अग्ने यत्ते शुक्रं यच्चंद्रं यत्पूतं यद्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं० व० शियन्नं देवेभ्यो भरामसि। इषमूर्ज्जमहमित आ॥१॥ दद ऋतस्य धाम्नो अमृतस्य योनेः॥
आ नो गोषु विशत्वौषधीषु जहामि सेदिमनिराममीवां॥ अग्ने तव श्रवो वयो महि भ्राजं
१८ त्यर्च्चयो विभावसो। बृहद्भानो शवसा वाजमुक्थ्यं दधासि दाशुषे कवे॥२॥ त्वं नग्ने प्र
अ थयस्व जंतुभिरस्मे रायो मर्त्य। स दर्शतस्य वपुषो विराजानि सि पृणक्षि सानसिं रयिं।
ऊर्ज्जो नपाज्जातवेदः सुशस्तिभिर्म्मन्दस्व॥२॥ धीतिभिर्हितः त्वे इषः संदधुर्भू
रिरेतसश्चित्रोतयो वामजाताः। पावकवर्च्चाः शुक्रवर्च्चा अनूनवर्च्चा उदियर्षि भा १८
नुना। पुत्रः पितरा विचरन्नुपावस्युभे पृणक्षि रोदसी॥ ऋतावानं महिषं विश्व
चर्षणिमग्निं सुम्नाय दधिरे पुरो जनाः॥ श्रुत्कर्णं सप्रथस्तमं त्वा गिरा दैव्यं
मानुषा युगा। निष्कर्त्तारमध्वरस्य प्रचेतसं क्षयन्तं राधसे महे। रातिं भृगूणामु

क शिजं कविक्रतुं पृणक्षि सानसिं॥३॥ रयिं। चितस्थ परिचित ऊर्ध्वचितः श्रयध्वं तया देव
तयाङ्गिरस्वद्ध्रुवाः सीदत। आप्यायस्व समेतु ते विश्वतः सोम वृष्ण्यं। भवा वाज
स्य संगथे। सं ते पयांसि समु यन्तु वाजाः सं वृष्ण्यान्यभिमातिषाहः॥ आप्यायमा
नो अमृताय सोम दिवि श्रवांस्युत्तमानि धिष्व॥४॥ आ मंदस्व सानसि मेकान्नचत्ता
रिः शत्रु॥७॥ अभ्यस्थाद्विश्वाः पृतना अरातीस्तदग्निराह तदु सोम आह। बृह
स्पतिः सविता तन्म आह पूषा माधात्सुकृतस्य लोके। यदक्रन्दः प्रथमं जायमान उ
द्यन्त्समुद्रादुत वा पुरीषात्॥ श्येनस्य पक्षा हरिणस्य बाहू उपस्तुत्यं जनिम तत्ते अर्
वन्॥ अपां पृष्ठमसि योनिरग्नेः समुद्रमभितः पिन्वमानं। वर्द्धमानं महः॥२॥ आ
च पुष्करं दिवो मात्रया वरिणा प्रथस्व। ब्रह्म जज्ञानं प्रथमं पुरस्ताद्वि सीमतः सु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं॰व॰ रुचौ वेन आवः । सबुध्निया उपमा अस्य विष्ठाः सतश्च योनिमसतश्च विवः । हिरण्यग
१० र्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक आसीत् । सदाधार पृथिवीं द्यामुतेमां क
स्मै देवाय हविषा विधेम । द्रप्सश्चस्कन्द पृथिवीमनु ॥ २ ॥ द्यामिमं च योनिमनु य
श्च पूर्वः । तृतीयं योनिमनु संचरन्तं द्रप्सं जुहोम्यनु सप्त होत्राः । नमो अस्तु सर्पे
भ्यो ये के च पृथिवीमनु । ये अन्तरिक्षे ये दिवि तेभ्यः सर्पेभ्यो नमः । ये दो रोचने दि
वो ये वा सूर्यस्य रश्मिषु । येषामप्सु सदः कृतं तेभ्यः सर्पेभ्यो नमः । या इषवो यातु १०
व धानानां ये वा वनस्पतीँ२रनु । ये वा वटेषु शेरते तेभ्यः सर्पेभ्यो नमः ॥ ३ ॥ महो नुया
तुष्या नो मा मे का दूराच ॥ ४ ॥ ध्रुवासि धरुणास्तृता विश्वकर्मणा सुकृता । मा त्वा स
मुद्र उद्वधीन्मा सुपर्णो व्यथमाना पृथिवीं दृंह । प्रजापतिस्त्वा सादयतु पृष्ठे पृथिव्याः

पृष्ठे व्यचस्वतीं प्रथस्वतीं प्रथोसि पृथिव्यसि । भूरसि भूमिरस्यदितिरसि विश्व
धाया विश्वस्य भुवनस्य धर्त्री पृथिवीं यच्छ पृथिवीं दृंह पृथिवीं मा हिंसीः विश्व ह
स्मै प्राणायापानाय व्यानायोदानाय प्रतिष्ठायै ॥ ५ ॥ चरित्राय अग्निस्त्वाभि
पातु मह्या स्वस्त्या छर्दिषा शंतमेन तया देवतयाङ्गिरस्वद्ध्रुवा सीद । काण्डात्का
ण्डात्प्ररोहन्ती परुषः परुषः परि । एवा नो दूर्वे प्रतनु सहस्रेण शतेन च । या श
तेन प्रतनोषि सहस्रेण विरोहसि । तस्यास्ते देवीष्टके विधेम हविषा वयं । अ
षाढासि सहमाना सहस्वारातीः सहस्वारातीयतः सहस्व पृतनाः सहस्व
पृतन्यतः । सहस्रवीर्या ॥ ६ ॥ असि सा मा जिन्व । मधु वाता ऋताय
ते मधु क्षरन्ति सिन्धवः । माध्वीर्नः सन्त्वोषधीः । मधु नक्तमुतोषसो मधुम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं॰चं॰ स्पार्थिवꣳ रजः। मधु द्यौरस्तु नः पिता मधुमान्नो वनस्पतिर्मधुमाꣳ॥ अस्तु सूर्यः
।माध्वीर्गावो भवन्तु नः। मही द्यौः पृथिवी च न इमं यज्ञं मिमिक्षतां॥ पिपृतान्नो
२० भरीमभिः। तद्विष्णोः परमं॥ ३॥ पदꣳ सदा पश्यन्ति सूरयः। दिवीव चक्षुरात
तं। ध्रुवासि पृथिवि सहस्व पृतन्यतः। स्यूता देवेभिरमृतेनागाः॥ यास्ते अग्ने
सूर्ये रुच उद्यतो दिवमातन्वंति रश्मिभिः। ताभिः सर्वाभी रुचे जनाय नस्कृ २०
धि। या वो देवाः सूर्ये रुचो गोष्वश्वेषु या रुचः। इंद्राग्नी ताभिः सर्वाभी रुचं नो
धत्त बृहस्पते विराट्॥ ४॥ ज्योतिरधारयत्सम्राट्। ज्योतिरधारयत्स्व
२२ राट्। ज्योतिर्धा यत्। अग्ने युक्ष्वा हि ये तवाश्वासो देव साधवः। अरं व
हन्त्याशवः। युक्ष्वा हि देवहूतमाꣳ॥ अश्वाꣳ॥ अग्ने रथीरिव। नि होता पूर्व्यः

सदः। द्रप्सश्चस्कंद पृथिवीमनु द्यामिमं च योनिमनु यश्च पूर्वः। तृतीयं योनिमनु सं
चरंतं द्रप्सं जुहोम्यनु सप्त॥ ५॥ होत्राः। अभूदिदं विश्वस्य भुवनस्य वाजिनम
ग्नेर्वैश्वानरस्य च। अग्निर्ज्योतिषा ज्योतिष्मान्रुक्मो वर्चसा वर्चस्वान्। स
पैत्वारुचे त्वा समित्स्रवंति सरितो न धेनाः। अंतर्हृदा मनसा पूयमानाः। घृ
तस्य धारा [illegible] अभिचाकशीमि। हिरण्ययो वेतसो मध्य
आसां। तस्मिन्सुपर्णो मधुकृत्कुलायी भजन्नास्ते मधु देवताभ्यः। तस्या
सते हरयः सप्त तीरे स्वधां दुहाना अमृतस्य धाराः॥ ६॥ प्रतिष्ठायै सहस्र
वीर्याय परमं विराट् सप्त तीरे चेत्वा रिच॥ ७॥ आदित्यं गर्भं पयसा समंग्ध
सहस्रस्य प्रतिमां विश्वरूपं। परि वृंग्धि हरसा माभिमृक्षः शतायुषं कृणुहि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं॰च॰ चीयमानः। इमं मा हिंसीर्द्विपादं पशुं सहस्राक्ष मेध आ चीयमानः। मयुमार
२१ ण्यमनु ते दिशामि तेन चिन्वानस्तनुवो निषीद। वातस्य ध्राजिं वरुणस्य नाभि
मश्वं जज्ञानं सरिरस्य मध्ये। शिशुं नदीनां हरिमद्रिबुध्नमग्ने मा हिं
सीः॥१॥ परमे व्योमन्। इमं मा हिंसीरेकशफं पशुं कनिक्रदं वाजिनं वा
जिनेषु। गौरमारण्यमनु ते दिशामि तेन चिन्वानस्तनुवो निषीद। अजस्रमि
न्दुमरुषं भुरण्युमग्निमीडे पूर्वचित्तिं नमोभिः॥ स पर्वभिर्ऋतुशः कल्पमा
नो गां मा हिंसीरदितिं विराजं। इमं समुद्रं शतधारमुत्सं व्यच्यमानं भु २१
वनस्य मध्ये। घृतं दुहानामदितिं जनायाग्ने मा॥२॥ हिंसीः परमे व्यो
मन्। गवयमारण्यमनु ते दिशामि तेन चिन्वा नस्तनुवो निषीद। वरूत्रिं

त्वष्टुर्वरुणस्य नाभिमविं जज्ञानां रजसः परस्मात्। महीं साहस्रीमसुर
स्य मायामग्ने मा हिंसीः परमे व्योमन्। इमामूर्णायुं वरुणस्य मायां त्वचं पशू
नां द्विपदां चतुष्पदां। त्वष्टुः प्रजानां प्रथमं जनित्रमग्ने मा हिंसीः परमे व्योमन्।
उष्ट्रमारण्यमनु॥३॥ ते दिशामि तेन चिन्वानस्तनुवो निषिद॥ यो अग्निरग्ने
स्तपसोधि जातः शोचात्पृथिव्या उत वा दिवस्परि। येन प्रजा विश्वकर्मा व्यानट् तमग्ने
हेडः परि ते वृणक्तु। अजा ह्यग्नेरजनिष्ट गर्भात्सा वा अपश्यज्जनितारमग्रे। त न
या रोहमायन्नुप मेध्यासस्तया देवा देवतामग्र आयन्। शरभमारण्यमनु
ते दिशामि तेन चिन्वानस्तनुवो निषीद॥४॥ अग्ने मा हिंसीरग्ने मोष्ट्रमार
ण्यमनु शरभं न्नवच॥५॥ इन्द्राग्नी रोचना दिवः परि वाजेषु भूषथः॥
तद्वां चेति प्र वीर्यं। श्नथद्वृत्रमुत सनोति वाजमिन्द्रा यो अग्नी। सहुरी सप

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं ०वें

पीतये॥ इदं अंतावसन्नस्य शूरैः सहस्तमा सहसावा जयंता॥ प्रचर्षणिभ्यः पृतनाहवेषु
२२ प्रपृथिव्या रिरिचाथे दिवश्चां प्रसिंधुभ्यः प्रगिरिभ्यो महित्वा प्रेंद्राग्नी विश्वा भुव
नीत्यन्या॥ मरुतो पयस्पाहि॥३॥ क्षयेपा पाहि दिवो विमहसः॥ समुद्रो पातमो जनः॥
यसैवी य स वाहुसो विप्रस्य वा मतीनां॥ मरुत स्तत्रुनाहवा॥ श्रियसे कं भानुभिः
संमिमिक्षिरे तेरश्मिभिः स्तऋक्वभिः सुखादयः॥ तेवासीमंतइष्मिणो अभीरवो
विद्रे प्रियस्य मारुतस्य धाम्नः॥ अवतेहे उदुत्तमं॥ कयानश्चित्र आभुवदू २२
ती सदावृधः सखा॥ कया शचिष्ठया वृता॥२॥ को अद्य युंक्ते धुरि गा ऋतस्य
शिमीवतो भामिनो दुर्हृणायून्॥ आसन्निषून्हृत्स्वसो मयो भून्य एषां भृत्या
मृणध्पस जीवात्॥ अग्नेनयादेवानां॥ शं नो भवंतु वाजे॥ अप्स्वग्ने सधि
वाजे॥

ष्टवसोषधीरनुरुध्यसे॥ गर्भे संजायसे पुनः॥ वृषासोम द्युमां॥ असि वृषा देव वृष
व्रतः॥ वृषा धर्माणि दधिषे॥ इमं मे वरुण तत्वा यामि त्वन्नो अग्ने स त्वन्नो अग्ने॥
॥३॥ हिप्रतामएकादशर्चा॥२१॥ विश्वो दिवस्पर्यग्ने पतें पेतसमितं या जाता
मानो भ्यसृष्टा ध्रुवासि धरुणादित्यं गर्भमिंद्राग्नी रोचने कादश॥॥ विश्वोर
स्मिन्हव्येति चाहं पीतिभिर्होत्रा अष्टाचत्वारिंशत्॥॥ इ हरिः ॐ म
अपां त्वेमन्सादयाम्यपां त्वो भ्मन्सादयाम्यपां त्वा भस्मन्सादयाम्यपां त्वा
ज्योतिषि सादयाम्यपां त्वायने सादयाम्यर्णवे सदने सी॥ द समुद्रे स
दने सीद सलिले सदने सीदापां क्षये सीदापां सधिषि सीदापां त्वा सद
ने सादयाम्यपां त्वा सधस्थे सादयाम्यपां त्वा पुरीषे सादयाम्यपां त्वा यो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं.यं. नौषादयाम्युपांशुपात्राया | थसिसादसौयामिमा | यत्रीछंदस्त्रिष्टुप्छंदो जगतीछंदोनुष्टुप्छं
२२ दः पंक्तिः छंदः ॥१॥ यो नौप्रंचदशश्च ॥ यै अंपुरो भुवस्तस्य प्राणो भौवायनो वसंतः प्राणा
यनो गायत्री वासंती गायत्रियै गायत्रंगायत्रादुपांशुरुपांशोस्त्रिवृत्त्रिवृतो रथंतरं
रथंतराद्वसिष्ठऋषिः प्रजापतिगृहीतया त्वया प्राणंगृह्णामि प्रजाभ्यो यं दक्षिणा वि
श्वकर्मा तस्य मनो वैश्वकर्मणं ग्रीष्मो मानसस्त्रिष्टुब्ग्रैष्मी त्रिष्टुभ ऐडमैडादंतर्या २२
मोंतर्यामात्पंचदशः पंचदशाद्बृहद्बृहतो भरद्वाज ऋषिः प्रजापतिगृहीतया त्वया
मनः ॥२॥ गृह्णामि प्रजाभ्यो यं पश्चाद्विश्वव्यचास्तस्य चक्षुर्वैश्वव्यचसं वर्षाणि चा
क्षुषाणि [illegible] जगती वार्षी जगत्या ऋक्सममृक्समाच्छुक्रः शुक्रात्सप्तदशः सप्तदशा
द्वैरूपं वैरूपाद्विश्वामित्र ऋषिः प्रजापतिगृहीतया त्वया चक्षुर्गृह्णामि प्रजा
भ्य इदमुत्तरात्स्वस्तस्य श्रोत्रं सौवं शरच्छ्रौत्र्यनुष्टुप्शारद्यनुष्टुभः स्वा

प्रजाभ्यस्त्वं

रं स्वारान्मंथी मंथिन एकविंशः एकविंशाद्वैराजं वैराजाज्जमदग्निऋषिः प्रजा
पतिगृहीतया ॥३॥ त्वया श्रोत्रं गृह्णामि इमुपरि मतिस्तस्य वाङ्वाती हैमंतो वाच्या
यनः पंक्तिः हैमंती पंक्त्यै निधनवन्निधनवत आग्रयण आग्रयणात्त्रिणवत्रयस्त्रिं
शौ त्रिणवत्रयस्त्रिंशाभ्यां शाक्वररैवते शाक्वररैवताभ्यां विश्वकर्म ऋषिः प्रजापति
गृहीतया त्वया वाचं गृह्णामि प्रजाभ्यः ॥४॥ त्वया मनो जमदग्निऋषिः प्रजापति
गृहीतस्त्रिष्टुप्शाच ॥२॥ प्राचीदिशां वसंत ऋतुनामग्निर्देवता ब्रह्म द्रविणं त्रिवृत्स्तो
मः स उ पंचदशवर्तनिः [illegible] त्र्यविर्वयः कृतमयानां पुरोवातो वातः सानग ऋषिः द
[illegible]दिशां ग्रीष्म ऋतूनामिंद्रो देवता क्षत्रं द्रविणं पंचदशस्तोमः स उ सप्तदशव
र्त्मा [illegible] दित्यवाड्वयस्त्रेतायानां दक्षिणाद्वातो वातः सनातन ऋषिः प्रतीचीदि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०च० शं वर्षा ऋतूनां विश्वेदेवा देवता विट्॥२॥ द्रविणं सप्तदश स्तोमः स उ एकविंशवर्त्त
२४ निज्ञभत्त्रसोवयो द्वापरो ग्यानां पश्चाद्धातोद्गातो हमनऋषिर्दीदीदिशाः शरदृतूनां
मित्रावरुणौ देवता पुष्टं द्रविणमेकविंशः स्तोमः स उ त्रिणववर्त्तनिः सुपर्णवात इय उपरि दोया
नामुत्तरा द्धातोवत्तः प्रसनऋषिरूर्ध्वा दिशा हेमन्तशिशिरावृतूनां बृहस्प मि
तिर्देवता वर्च्चो द्रविणं त्रिणवः स्तोमः स उ त्रयस्त्रिंशवर्त्तनिः पृष्ठवाड्वयोभि
भूरयानां विष्वग्वातोवातः सुपर्ण ऋषिः पितरः पितामहाः परेवरे ते नः पान्तु ते २४
नोवन्तु तस्मिन्ब्रह्मन्नस्मिन्क्षत्रेस्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मन्नस्यां
देवहूत्यां॥२॥ विद्रूपष्ठवाड् योषा विंशति ध्रुवा॥३॥ ध्रुवक्षितिर्ध्रुवयोनिर्ध्रुवा
सि ध्रुवां योनिमासीद साध्या॥ उख्यस्य केतुं प्रथमं पुरस्तादश्विनाध्वर्यू
सादयतामिहत्वा॥ स्वे दक्षे दक्षपितेह सीद देवत्रा पृथिवी बृहती रराणा॥ स्वा

सस्थ्या तनुवा संविशस्व पितेवैधि सूनव आसुशेवाश्विनाध्वर्यू सादयतामिहत्वा॥ कु
लायिनी वत्समलीव यो धारयिन्नो वर्च्चे बकुलं ञ्सवी॥३॥ अपामतिं दुर्मतिं बाध
मानारायस्पोषे यज्ञपतिमा सजन्ती सुवर्द्धेहि यजमानाय पोषमश्विनाध्वर्यू
सादयतामिहत्वा॥ अग्नेः पुरीषमसि देवयानी तां त्वा विश्वे अभिगृणन्तु देवाः।
स्तोमपृष्ठा घृतवतीह सीद प्रजावदस्मे द्रविणायजस्वाश्विनाध्वर्यू सादय
तामिहत्वा॥ दिवोमूर्द्धासि पृथिव्या नाभिर्विष्टम्भनी दिशामधिपत्नी भुवनानां।
॥३॥ ऊर्मिर्द्रप्सो अपामसि विश्वकर्मा त ऋषिरश्विनाध्वर्यू सादयतामिह
त्वा॥ सजूर्ऋतुभिः सजूर्विधाभिः सजूर्वसुभिः सजूरुद्रैः सजूरादित्यैः सजूर्वि
श्वैर्देवैः सजूर्देवैः सजूर्देवैर्वयोनाधैरग्नये त्वा वैश्वानराया श्विनाध्वर्यू सा ×शिवर
दयतामिहत्वा॥ प्राणं मे पाह्यपानं मे पाहि व्यानं मे पाहि चक्षुर्मे उर्व्या विभाहि श्रो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्येद क्षैकु लायिनी रग्नेर्द्दिवः सुजूः माणरषट् ॥ २

सं॰ च त्रंमे श्लोकयापस्पिन्वौषधीर्जिन्वद्विपात्पाहि चतुष्पादव दिवोवृष्टिमेरय ॥ ३ ॥ सवीरं
२५ गच्छत्रानामुर्धासस्सद शश्च ॥ ४ ॥ त्र्यविर्वयस्त्रिष्टुप्छंदो दित्यवाड्वयो विराट्
छंदः पंचाविर्वयो गायत्री छंदः त्रिवत्सोवय उष्णिहाछंदो दित्यौहो त्तुर्यवाड्
यो नुष्टुप्छंदः पष्ठवाड्वयो बृहती छंद उक्षावयः सतो बृहती छंद ऋषभोवयः
ककुप्छंदो धेनुर्वयो जगती छंदो नड्वान्वयः पंक्तिश्छंदो बस्तोवयो विव
लंछंदो वृष्णिर्वयो विशालं छंदः पुरुषोवयस्तंद्रं छंदो व्याघ्रोवयो नाधृ २५
१ ष्टंछंदः सिंहोवयश्छदि [illegible] श्छंदो विष्टंभो वयोधिपतिः श्छंदः क्षत्रं
त्रंवयो मयंदं छंदो विश्वकर्मावयः परमेष्ठी छंदो मूर्धा वयः प्रजापतिश्छं
दः ॥ १ ॥ पुरुषोवयः षड्विंशतिश्च ॥ ५ इंद्राग्नी अव्यथमानामिष्टकां दृं
हतं युवं । पृष्ठेन द्यावापृथिवी अंतरिक्षं च विबाधतां । विश्वकर्मा त्वा सादय

त्वंतरिक्षस्य पृष्ठे व्यचस्वतीं प्रथस्वतीं भास्वतीं सूरिमतीमाया द्यां भास्यापृथि
वीमोर्वंतरिक्षमंतरिक्षं यच्छांतरिक्षं दृंह्यांतरिक्षं मा हिंसीः विश्वस्मै प्राणा
यापानाय व्यानायोदानाय प्रतिष्ठायै चरित्राय वायुस्त्वाभिपातु मह्यास्वस्त्या छ
र्दिषा ॥ १ ॥ शंतमेन तया देवतयांगिरस्वद्ध्रुवा सीद ॥ राज्ञ्यसि प्राची दिग्विराडसि द
क्षिणा दिक्सम्राडसि प्रतीची दिक्स्वराडस्युदीची दिगधिपत्न्यसि बृहती दिगा
युर्मे पाहि प्राणं मे पाह्यपानं मे पाहि व्यानं मे पाहि चक्षुर्मे पाहि श्रोत्रं मे पाहि मनो मे जि
न्व वाचं मे पिन्वात्मानं मे पाहि ज्योतिर्मे यच्छ ॥ २ ॥ छर्दिषा पिन्व षट् च ॥ ६ ॥ मा छंदः
प्रमा छंदः प्रतिमा छंदो स्त्रीविश्छंदः पंक्तिश्छंद उष्णिहा छंदो बृहती छंदो नुष्टुप्
छंदो विराट् छंदो गायत्री छंदस्त्रिष्टुप्छंदो जगती छंदः पृथिवी छंदो न्तरिक्षं छं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं॰ चे॰ दोघौ ऽश्छंदः समा ऽश्छंदो नक्षत्राणि छंदो मन ऽश्छंदो वाक् छंदः कृषि ऽश्छंदो हिरण्यंछं
२६ दो गौ ऽश्छंदो जाछंदो ऽश्व ऽश्छंदः अग्निर्देवता ॥१॥ वातो देवता सूर्यो देवता चंद्र
मा देवता वसवो देवता रुद्रा देवता दित्या देवता विश्वेदेवा देवता मरुतो देवता बृह
स्पतिर्देवतेंद्रो देवता वरुणो देवता मूर्धासि राट् ध्रुवासि धरुणा यंत्र्यसि यमि
त्रीषेत्वोर्जेत्वा कृष्यैत्वा क्षेमाय त्वा यंत्री राट् ध्रुवासि धरुणी धर्त्र्यसि धरित्र्यायु २६
षे त्वा वर्चसे त्वौजसे त्वा बलाय त्वा ॥२॥ देवता मुषेत्वाषड्ढ ॥७॥ आशुः त्रि
वृद्भांतः पंचदशो व्योम सप्तदशः प्रतूर्तिरष्टादशस्तपो नवदशो भिवर्तः सविंशो
धरुण एकविंशो वर्चो द्वाविंशः संभरणस्त्रयोविंशो योनिश्चतुर्विंशो ग
र्भाः पंचविंशा ओजस्त्रिणवः क्रतुरेकत्रिंशः प्रतिष्ठा त्रयस्त्रिंशो ब्रध्नस्य

विष्टपं चतुस्त्रिंशो नाकः षट्त्रिंशो विवर्तोष्टा चत्वारिंशो धर्त्रं चतुष्टोमः ॥ आ
शुः सप्तत्रिंशत ॥४॥ अग्नेर्भागोसि दीक्षाया आधिपत्यं ब्रह्म स्पृतं त्रिवृत्स्तोम
इंद्रस्य भागोसि विष्णो राधिपत्यं क्षत्रं स्पृतं पंचदशस्तोमो नृचक्षसां भा
गोसि धातुराधिपत्यं जनित्रं स्पृतं सप्तदशस्तोमो मित्रस्य भागोसि वरुणस्या ण
धिपत्यं दिवो वृष्टिर्वाताः स्पृता एकविंशस्तोमो दित्यै भागोसि पूष्ण आधिपत्य
मोजस्पृतं त्रिणवस्तोमो वसूनां भागोसि ॥१॥ रुद्राणामाधिपत्यं चतुष्पात्स्पृ
तं चतुर्विंशस्तोम आदित्यानां भागोसि मरुतामाधिपत्यं गर्भाः स्पृताः पं
चविंशस्तोमो देवस्य सवितुर्भागोसि बृहस्पतेराधिपत्यं समीचीर्दिशः स्पृ
ताश्चतुष्टोमस्तोमो यावानां भागोस्ययावानामाधिपत्यं प्रजाः स्पृताश्चतु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्चत्वारिꣳशस्तोमऋभूणांभागोसिविश्वेषांदेवानामाधिपत्यंस्पृतंनित्रिशांतꣳस्पृतं
त्रयस्त्रिꣳशस्तोमःगौंवस्ते नोभागोसिषट्चत्वारिꣳशश्च॥५॥एकयासस्तुवतप्र
जाअधीयंतप्रजापतिरधिपतिरासीत्तिसृभिरस्तुवतब्रह्मासृज्यतब्रह्म
णस्पतिरधिपतिरासीत्संचभिरस्तुवतभूतान्यसृज्यंतभूतानांपतिरधिपति
रासीत्सप्तभिरस्तुवतसप्तऋषयोसृज्यंतधाताधिपतिरासीन्नवभिरस्तु
नारायणभट्ट वतपितरोसृज्यंतादितिरधिपत्न्यासीदेकादशभिरस्तुवतर्तवोसृज्यं
तार्तवोधिपतिरासीत्त्रयोदशभिरस्तुवतमासाअसृज्यंतसंवत्सरोधि २७
पतिः॥१॥आसीत्पंचदशभिरस्तुवतक्षत्रमसृज्यतेंद्रोधिपतिरासीत्स
प्तदशभिरस्तुवतपशवोसृज्यंतबृहस्पतिरधिपतिरासीन्नवदशभि

+ त्रयोविꣳशत्यास्तुवतक्षुद्राःपशवोसृज्यंतपूषाधिपति
रस्तुवतशूद्रार्यावसृज्येतामहोरात्रे अधिपत्नीआस्तामेकविꣳशत्यास्तुवतैक रासी
शफाःपशवोसृज्यंतवरुणोधिपतिरासीत्पंचविꣳशत्यास्तुवतारण्याःपशवो
सृज्यंतवायुरधिपतिरासीत्सप्तविꣳशत्यास्तुवतद्यावापृथिवीवि॥२॥ऐतांवस
वोरुद्राआदित्याअनुव्यायंस्तेषामाधिपत्यमासीन्नवविꣳशत्यास्तुवतवनस्पतयो न+
सृज्यंतसोमोधिपतिरासीदेकत्रिꣳशतास्तुवतप्रजाअसृज्यंतयावानांचाया
वानांचाधिपत्यमासीत्त्रयस्त्रिꣳशतास्तुवतभूतान्यशाम्यन्प्रजापतिःपरमे
ष्ठ्यधिपतिरासीत्॥३॥संवत्सरोधिपतिर्विपंचत्रिꣳशच्च॥२०॥इयमेवसायाप्र
थमाव्यौच्छदंतरस्यांचरतिप्रविष्टा।वधूर्जजानवनवगज्जनित्रीत्रयएनांम
हिमानःसचंते।छंदस्वतीउषसापेपिशानेसमानंयोनिमनुसंचरंती।सूर्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०ब्रा०

पत्नी वि चरतः प्रजानती केतुं कृण्वाने अजरे भूरिरेतसा। ऋतस्य पंथामेति साधु

२० आयुस्त्रयो घर्मासो अनु ज्योतिषागुः। प्रजामेका रक्षत्यूर्जमेका॥२॥ व्रत

मेका रक्षति देवयूनां। चतुष्टोमो अभवद्या तुरीया यज्ञस्य पक्षावृषयो भवंती॥

गायत्रीं त्रिष्टुभं जगतीमनुष्टुभं बृहदर्कं युंजानाः सुवराभरन्निदं पंचमिधी

ताविदधाविदं यन्नासाः स्वसृत्स्पन्नयस्यैव पंच। तासामु यंति प्रयवेण पंच २०

नानारूपाणि क्रतवो वसानाः। त्रिंशत्स्वसार उपयंति निष्कृतं समानं के

तुं प्रतिमुंचमानाः॥३॥ ऋतूंस्तन्वते कवयः प्रजानतीर्मध्ये छंदसः परि

यंति भास्वतीः। ज्योतिष्मती प्रतिमुंचते नभो रात्री देवी सूर्यस्य व्रतानि।

विपश्यंति पशवो जायमाना नानारूपा मातुरस्या उपस्थे। एकाष्टका त

पसा तप्यमाना जजान गर्भं महिमानमिंद्रं। तेन दस्यून्व्यसहंत देवा हंतासुरा

णामभवच्छचीभिः॥ अनानुजामनुजां मामकर्त सत्यं वदंत्यन्विच्छ एतत्। भू

यासं॥३॥ अस्य सुमतौ यथा यूयमन्या वो अन्यामति मा प्रयुक्त। अछन्म

म सुमतौ विश्ववेदा आष्ट प्रतिष्ठामविदद्धि गाधं॥ भूयासमस्य सुमतौ यथा

यूयमन्या वो अन्यामति मा प्रयुक्त। पंच व्युष्टीरनु पंच दोहा गां पंचनाम्नीमृ

तवोऽनु पंच। पंच दिशः पंचदशेन क्लृप्ताः समानमूर्ध्नीरभि लोकमेकं॥५॥

ऋतस्य गर्भः प्रथमा व्यूषुष्यपामेका महिमानं बिभर्ति। सूर्यस्यैका चरति नि

ष्कृतेषु घर्मस्यैका सवितैकां नियच्छति। या प्रथमा व्यौच्छत्सा धेनुरभ

वद्यमे। सा नः पयस्वती धुक्ष्वोत्तरामुत्तरां समां। शुक्रऋषभा नभसा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०१० ज्योतिषागाद्विश्वरूपा शबलीरग्निकेतुः समानमर्थं स्वपस्यमाना बिभ्रती
२९ जरामजर उष आगाः ऋतूनां पत्नी प्रथमेयमागादह्नां नेत्री जनित्री प्रजानां।
एका सती बहुधोषो व्युच्छस्यजीर्णा त्वं जरयसि सर्वमन्यत्॥ उ जें मे काम्र तिमु ॥५।१४
चमा नाभ्यासमेकं पत्न्यिकान्नविंश्शतिश्च॥१४॥ अग्ने जातान्प्रणुदा नः
सपत्नान्प्रत्यजातांजातवेदो नुदस्व॥ अस्मे दीदिहि सुमना अहेडंछर्मन्त्स्यां
शर्मं त्रिवरूथ उद्भित्। सहसा जातान्प्रणुदा नः सपत्नान्प्रत्यजातां जातवेदो २९
नुदस्व। अधि नो ब्रूहि सुमनस्यमानो वयं स्याम प्रणुदा नः सपत्नान्
चतुश्चत्वारिंशः स्तोमो वर्चो द्रविणं षोडशः स्तोम ओजो द्रविणं पृथि
व्याः पुरीषमसि॥२॥ अप्सो नाम। एवश्छंदो वरिवश्छंदः शंभूश्छंदः

परिभूश्छंद आच्छच्छंदो मनश्छंदो व्यचश्छंदः सिंधुश्छंदः समुद्रं छंदः स
लिलं छंदः संयच्छंदो वियच्छंदो बृहच्छंदो रथंतरं छंदो निकायश्छंदो वि
भ्र वधश्छंदो गिरश्छंदो भ्रजश्छंदः संस्तुप् छंदोनुष्टुप् छंदः ककुप् छंदस्त्रिककु
प् छंदः काव्यं छंदो अंकुपं छंदः॥२॥ पदपंक्तिश्छंदो क्षरपंक्तिश्छंदो वि
ष्टारपंक्तिश्छंदः क्षुरो भ्रजश्छंदः प्रच्छच्छंदः पक्षश्छंदः एवश्छंदो वरिवश्छंदो
वयश्छंदो वयस्कृच्छंदो विशालं छंदो विष्पर्धाश्छंदः छदिश्छंदो दूरो
हणं छंदः तंद्रं छंदो अंकांकं छंदः॥३॥ अस्यकुपं छंदस्त्रयस्त्रिंशश्च॥४२॥
अग्निर्वृत्राणि जंघनद्द्रविणस्युर्विपन्यया। समिद्धः शुक्र आहुतः॥ त्वं सो
मासि सत्पतिस्त्वं राजोत वृत्रहा। त्वं भद्रो असि क्रतुः। भद्रा ते अग्ने स्व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं० च०
नीकं सदृङ्घोरस्य सतो विषुणस्य चारुः। न यत्ते शोचिस्तमसा वरन्त न ध्वस्मानस्त
३० न्विरेप आ धुः। भद्रं ते अग्ने सहसिन्ननीकमुपाक आ रोचते सूर्यस्य॥ १॥ रुश
द्दृशे ददृशे नक्तया चिद्रूक्षितं दृश आ रूपे अन्नं। सैनानीकेन सुविदत्रो अ
स्मे यष्टा देवाँ आयजिष्ठः स्वस्ति। अदब्धो गोपा उत नः परस्पा अग्ने द्युमदु
त रेवद्दिदीहि। स्वस्ति नो दिवो अग्ने पृथिव्या विश्वायुर्धेहि यजथाय देव। य ३०
त्सीमहि दिविजात प्रशस्तं तदस्मासु द्रविणं धेहि चित्रं। [illegible] यथा होत
नु र्मैषः॥ २॥ देवता ताय सेभिः स्तनो सहसो य जोसि। एवा नो अग्ने समना
समानानुशन्नग्न उतोशे यक्षि देवान्। अग्निमीळे पुरोहितं यज्ञस्य
म देवमृत्विजं। होतारं रत्नधातमं। वृषा सो द्युमाँ असि वृषा देव वृष

वन्तः। वृषा धर्माणि दधिषे। सांतपना इदं हविर्मरुतस्तज्जुजुष्टन। युष्माकोती रि
शादसः। यो नो मर्तो वसवो दुर्हृणायुस्तिरः सत्यानि मरुतः॥ ३॥ जिघांसात्
द्रुहः पाशं प्रति स मुचीष्ट तपिष्ठेन तपसा हन्तनातं। संवत्सरीणा मरुतः स्वर्का उ
रुक्षयाः सगणा मानुषेषु। ते स्मत्पाशान्प्रमुंचंत्वंहसः सांतपना मदिरा मादि
यिष्णवः। पिप्रीहि देवाँ उशतो यविष्ठ विद्वाँ ऋतूँ ऋतुपते यजेह। ये दैव्या
ऋत्विजस्तेभिरग्ने त्वं होतॄणामस्यायजिष्ठः। अग्ने यदद्य विशो अध्वरस्य
होतः पवक ॥४॥ शोचे वेष्ट्वं हि यज्वा। ऋता यजासि महिना वि यद्भूर्हव्या व
ह यविष्ठ या ते अद्य। अग्निना रयिमश्नवत्पोषमेव दिवेदिवे। यशसं वीरवत्तमं
। गयस्फानो अमीवहा वसुवित्पुष्टिवर्धनः। सुमित्रः सोम नो भव। गृहमेधा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०क्र सुआगतमरुतो मापस्थत मा। प्रस्थावंतो नो अं॑ऽहसः॥ पूर्वीभिर्हि ददाशिम शरद्भिर्म
तो वयं। महोभिः॥५॥ चर्षणीनां॥ प्रबुध्निया ईरते वो महांसि प्रणामानि प्रयज्यव
३२ स्तिरध्वं। सहस्रियं दम्यं भागमेतं गृहमेधीयं मरुतो जुषध्वं॥ उपयमेति युवतिः सुदक्षं
दोषावस्तोर्हविष्मती घृताची। उपस्वैनमरमतिर्वसूयुः॥ इमो अग्ने वीततमानि
हव्या जस्रो वक्षि देवतातिमच्छ॥ प्रतिन ईं सुरभीणि वियंतु॥ क्रीडं वः शर्धो मा
रुतमनर्वाणं रथेशुभं॥६॥ कण्वा अभि प्रगायत॥ असासो न ये मरुतः सं ३२
चो पक्षदृशो न शुभयंत मर्याः॥ ते हर्म्येष्ठाः शिशवो न शुभ्रा वत्सासो न प्रक्री
डिनः पयोधाः॥ प्रैषामज्मेषु विथुरेव रेजते भूमिर्यामेषु यद्ध युंजते शुभे॥

त

ते क्रीडयो धुनयो भ्राजदृष्टयः स्वयं महित्वं पनयंत धूतयः॥ उपह्वरेषु यदचिध्वं य
यिं वय इव मरुतः केन॥७॥ चित्पथा॥ श्चोतंति कोशा उपवो रथेष्वा घृतमुक्ष
ता मधुवर्णमर्चते॥ अग्निमग्निं॑ हवीमभिः सदा हवंत विश्पतिं। हव्यवाहं पु
रुप्रियं॥ तं॑ हि शश्वंत ईडते स्रुचा देवं घृतश्चुता। अग्निं॑ हव्याय वोढवे॥ इं
द्राग्नी रोचना दिवश्च यद्धत्रमिंद्रवो विश्वतस्परी। इंद्रं नरो विश्वकर्मन् हवि
षा वावृधानो विश्वकर्मन्हविषा वर्धनेन॥८॥ सूर्यस्यमनुषो मरुतः पा
वकमहो मीरथे शुभं के नषट्ठ्त्वारिं॑शच्च॥१३॥ अपांत्वेमन्त्यपुरः प्रा
चीध्रुवक्षितिरिश्रुविरिंद्राग्नी मा छंद आ शुस्रिवद ग्नेर्भागोस्य कयय मेवसा
याग्नेजाता नग्निरे त्राणि जंचन त्रयोदश॥ अपांत्वे द्राग्नी सूर्यमेव देवतानाष

मा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं० च० ४ पूरिति शतम्॥ ३६ ॥ हरिः ओम्॥ ॥ रश्मिरसि क्षयाय त्वा क्षयं जिन्व प्रेतिरसि
३२ धर्माय त्वा धर्मं जिन्वान्वितिरसि दिवे त्वा दिवं जिन्व संधिरस्यंतरिक्षाय
त्वांतरिक्षं जिन्व प्रतिधिरसि पृथिव्यै त्वा पृथिवीं जिन्व विष्टंभोसि वृष्ट्यै त्वा
वृष्टिं जिन्व प्रवास्यह्ने त्वाहर्जिन्वानुवासि रात्र्यै त्वा रात्रिं जिन्वोशिगसि॥१॥ व
सुभ्यस्त्वा वसूंजिन्व प्रकेतोसि रुद्रेभ्यस्त्वा रुद्रान्जिन्व सुदीतिरस्यादित्येभ्यस्त्वा ३२
दित्यान्जिन्वौजोसि पितृभ्यस्त्वा पितॄन्जिन्व तंतुरसि प्रजाभ्यस्त्वा प्रजा जि
न्व पृतनाषाडसि पशुभ्यस्त्वा पशून्जिन्व रेवदस्योषधीभ्यस्त्वौषधीर्जिन्वा
भिजिदसि युक्तग्रावेंद्राय त्वेंद्रं जिन्वाधिपतिरसि प्राणाय त्वा॥२॥ त्वा प्राणं
जिन्व यंतास्यपानाय त्वापानं जिन्व संसर्पोसि चक्षुषे त्वा चक्षुर्जिन्व

वयोधा असि श्रोत्राय त्वा श्रोत्रं जिन्व त्रिवृदसि प्रवृदसि संवृदसि विवृदसि सं
रोहोसि नीरोहोसि प्ररोहोस्यनुरोहोसि वसुकोसि वेषश्रिरसि वस्यष्टिरसि
॥३॥ उशिगसि प्राणाय त्रिचत्वारिंशच्च॥१॥ राज्ञ्यसि प्राची दिग्वसवस्ते
देवा अधिपतयोग्निर्हेतीनां प्रतिधर्त्ता त्रिवृत्त्वा स्तोमः पृथिव्यां श्रय
त्वाज्यमुक्थमव्यथयत्स्तभ्नातु रथंतरं साम प्रतिष्ठित्यै विराडसि द
क्षिणा दिग्रुद्रास्ते देवा अधिपतय इंद्रो हेतीनां प्रतिधर्त्ता पंचदशस्त्वा
स्तोमः पृथिव्यां श्रयतु प्रउगमुक्थमव्यथयत्स्तभ्नातु बृहत्साम
प्रतिष्ठित्यै संम्राडसि प्रतीची दिक्॥१॥ आदित्यास्ते देवा अधिपत
यः से हेतीनां प्रतिधर्त्ता सप्तदशस्त्वा स्तोमः पृथिव्यां श्रयतु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं॰च॰ मरुत्वा[illegible]यमुक्थमव्य[illegible]स्तभ्नातुवैरूपꣳसामप्रतिष्ठित्यै स्वराउस्युदीचीदि
३३ ग्विश्वेतेदेवा अ[illegible]वरुणोहेतीनांप्रतिधर्त्तैकविꣳशस्त्वास्तोमःपृ
थिव्याꣳश्रयतु नि[illegible]ष्यमुक्थमव्यथयस्तभ्नातुवैराजꣳसामप्र
तिष्ठित्या अधिपत्न्यसि बृहती दिङ्मरुतस्तेदेवा अधिपतयः ॥२॥ बृहस्पतिर्हे ३३
तीनांप्रतिधर्त्ता त्रिणवत्रयस्त्रिꣳशौत्वास्तोमौपृथिव्याꣳश्रयतांवैश्व
देवाग्निमारुते उक्थे अव्यथयंती स्तभ्नीताꣳशाक्वररैवते सामनी
प्रतिष्ठित्या अंतरिक्षायर्षयस्त्वाप्रथमजादेवेषुदिवोमात्रयावरि
म्णाप्रथंतु विधर्त्ता चायमधिपतिश्च तेत्वा सर्वेसंविदानानाक

स्यपृष्ठे स्वर्गेलोके यजमानंच सादयंतु ॥३॥ प्रतीचीदिग्मरुतस्तेदेवा अधि
पतयश्चत्वारिꣳशत् ॥२॥ अयंपुरोहरिकेशः सूर्यरश्मिस्तस्यरथगृत्सश्चर
थौजाश्चसेनानिग्रामण्यौपुंजिकस्थलाचक्रतुस्थलाचाप्सरसौयातुधाना
हेतीरक्षाꣳसिप्रहेतिरयंदक्षिणाविश्वकर्मातस्यरथस्वनश्चरथेचित्रश्चसे
नानिग्रामण्यौमेनकाचसहजन्याचाप्सरसौदंक्ष्णवःपशवोहेतिःपौरुषेयो
वधःप्रहेतिरयंपश्चाद्विश्वव्यचास्तस्यरथप्रोतश्चासमरथश्चसेनानिग्राम
ण्यौप्रम्लोचंतीच ॥१॥ अनुम्लोचंतीचाप्सरसौसर्पाहेतिर्व्याघ्राःप्रहेति
रयमुत्तरात्संयद्वसुस्तस्यसेनजिच्चसुषेणश्चसेनानिग्रामण्यौविश्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं॰ च॰ ची च घृताची चाप्सरसावापो हेतिर्वातः प्रहेतिरयमुपर्यर्वाग्वसुस्तस्य ताक्ष्यश्चा
रिष्टनेमिश्च सेनानीग्रामण्यावुर्वशी च पूर्वचित्तिश्चाप्सरसौ विद्युद्धेतिरवस्फू
३४ र्जन्प्रहेतिस्तेभ्यो नमस्ते नो मृडयन्तु ते यं ॥ २ ॥ द्विष्मो यश्च नो द्वेष्टि तं वो जम्भे द
धाम्या यो स्त्वा सदने सादयाम्यवतश्छायायां नमः समुद्राय नमः समुद्रस्य
चक्षसे परमेष्ठी त्वा सादयतु दिवः पृष्ठे व्यचस्वतीं प्रथस्वतीं विभूमतीं प्रभूम
तीं परिभूमतीं दिवं यच्छ दिवं दृꣳह दिवं मा हिꣳसीर्विश्वस्मै प्राणायापाना ३४
य व्यानायोदानाय प्रतिष्ठायै चरित्राय सूर्यस्त्वाभिपातु मह्या स्वस्त्या छ
र्दिषा शंतमेन तया देवतयाङ्गिरस्वद्ध्रुवा सीद। प्रोथदश्वो न यवसेऽ
विष्यन्यदा महः संवरणाद्व्यस्थात्। आदस्य वातो अनुवाति शोचिरध

स्मते व्रजनं कृष्णमस्ति ॥ १ ॥ प्रम्लोचन्ती च यꣳ स्वस्त्या च विꣳशतिश्च ॥ २ ॥
अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयम्। अपाꣳरेताꣳसि जिन्वति।
त्वामग्ने पुष्करादध्यथर्वा निरमन्थत। मूर्ध्नो विश्वस्य वाघतः। अयमग्निः
सहस्रिणो वाजस्य शतिनस्पतिः। मूर्धा कवी रयीणां। भुवो यज्ञस्य रजसश्च
श्च नेता यत्रा नियुद्भिः सचसे शिवाभिः। दिवि मूर्धानं दधिषे स्वर्षां जिह्वा
मग्ने चकृषे हव्यवाहं। अबोध्यग्निः समिधा जनानां ॥ १ ॥ प्रति धेनुमिवाय
तीमुषासं। यह्वा इव प्र वयामुज्जिहानाः प्र भानवः सिस्रते नाकमच्छ।
अवोचाम कवये मेध्याय वचो वन्दारु वृषभाय वृष्णे। गविष्ठिरो नमसा स्तो
ममग्नौ दिवीव रुक्ममुरुव्यञ्चमश्रेत्। जनस्य गोपा अजनिष्ट जागृविरग्निः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०४ सुदक्षः सुविताय नव्यसे । घृतप्रतीको बृहता दिविस्पृशा द्युमद्विभाति भरते
भ्यः शुचिः ॥ त्वामग्ने अंगिरसः ॥२॥ गुहा हितमन्वविंदच्छिश्रियाणं वनेवने ।
३५ स जायसे मथ्यमानः सहो महत्वामाहुः सहसस्पुत्रमंगिरः । यज्ञस्य केतुंप्र
थमंपुरोहितमग्निं नरस्त्रिषधस्थे समिंधते । इंद्रेणदेवैः सरथं स बर्हिषि
सीदन्नि होता यजथाय सुक्रतुः । त्वां चित्रश्रवस्तम हवंते विक्षु जं
तवः । शोचिष्केशं पुरुप्रियाग्ने हव्याय वोढवे । सखायः सं वः सम्यंचमि३५
षं ॥३॥ स्तोमं चाग्नये । वर्षिष्ठाय क्षितीनामूर्जो नप्त्रे सहस्वते ॥ संस
मिद्युवसे वृषन्नग्ने विश्वान्यर्य आ । इळस्पदे समिध्यसे स नो वसून्या भ
र ॥ एना वो अग्निं नमसोर्जो नपातमा हुवे । प्रियं चेतिष्ठमरतिं स्वध्वरं

विश्वस्य दूतममृतं । स योजते अरुषा विश्वभोजसा स दुद्रवत्स्वाहुतः । सुब्र
ह्माय सः सुशमी ॥४॥ वसूनां देवं राधो जनानां । उदस्य शोचिरस्थादाजु
ह्वानस्य मीढुषः । उद्धूमासो अरुषासो दिविस्पृशः समग्निमिंधते नरः । अग्ने
वाजस्य गोमत ईशानः सहसो यहो । अस्मे धेहि जातवेदो महि श्रवः । स इधा
नो वसुष्कविरग्निरीळेन्यो गिरा । रेवदस्मभ्यं पुर्वणीक दीदिहि । क्षपो राजन्नुत त्मना
ग्ने वस्तोरुतोषसः । स तिग्मजंभ ॥५॥ रक्षसो दह प्रति । आ ते अग्न इधीमहि द्युमं
तं देवाजरं । यद्ध स्या ते पनीयसी समिद्दीदयति द्यवि । इषं स्तोतृभ्य आ भर । आ ते अग्न
ऋचा हविः शुक्रस्य ज्योतिषस्पते । सुश्चंद्र दस्म विश्पते हव्यवाट् तुभ्यं हूयत इषं
स्तोतृभ्य आ भर ॥ प्रो त्ये सु चंद्र सर्पिषो दर्वी श्रीणीष आसनि । उतो न उत्पुपूर्याः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०५० ऊर्जोनपाच्छवसस्पतइषंस्तोतृभ्य आ भर॥ अग्नेतमद्याश्वंनस्तोमैःक्रतुंन
७६ भद्रंहृदिस्पृशं। ऋध्यामात ओहैः। अधाह्यग्नेक्रतोर्भद्रस्यदक्षस्यसा
धोः। रथीर्ऋतस्यबृहतोबभूथ। आभिष्टेअद्यगीर्भिर्गृणंतोऽग्नेदाशे
म। प्रतेदिवोनस्तनयंतिशुष्माः॥ एभिर्नोअर्कैर्भवानोअर्वाङ्स्वर्णज्योतिः ॥६॥
अग्नेविश्वेभिःसुमनाअनीकैः। अग्निंहोतारंमन्येदास्वंतंवसोःसूनुं ७६
सहसोजातवेदसं। विप्रंनजातवेदसं। यऊर्ध्वयास्वध्वरोदेवोदेवाच्याकृ
पा। घृतस्यविभ्राष्टिमनुशुक्रशोचिषआजुह्वानस्यसर्पिषः॥ अग्नेत्वंनो
अंतमः। उतत्राताशिवोभववरूथ्यः। तंत्वाशोचिष्ठदीदिवः। सुम्नायनूनमी
महेसखिभ्यः। वसुरग्निर्वसुश्रवाः। अच्छानक्षिद्युमत्तमोरयिंदाः॥७॥

जनानामंगिरसइषंस्तुशमीनिगमजंभपुष्यो अर्वाङ्स्तुश्रवाःपंचच॥५॥ इंद्राग्नि
भ्यांत्वासयुजायुजायुजा नजम्याघाराभ्यांतेजसावर्चसोक्थेभिस्तोमेभिश्छं
पु ३ दोभीरय्यैपोषायसजातानांमध्यमस्थेयायमयात्वासयुजायुजायुनजम्यंबाहु
भ्यानितन्निरभ्रयोनीमेघये। तीव्रषयंनीचुपुणीकानामासिप्रजापतिनात्वा
विश्वाभिर्धीभिरुपदधामिपृथिव्युद्धपुरमन्नेनविष्टामनुष्यास्तेगोप्तारोग्नि
६ पं वियत्तोस्यांतामहंप्रपद्येसा॥१॥ मेशर्मचवर्मचास्त्वपिघोरंतरिक्षंब्रह्म
णाविष्टामरुतस्तेगोप्तारोवायुर्वियत्तोस्यांतामहंप्रपद्येसामेशर्मचवर्म
चास्तु घोरपराजितामृतेनविष्टादित्यास्तेगोप्तारःसूर्योवियत्तोस्यांता
महंप्रपद्येसामेशर्मचवर्मचास्तु॥२॥ साषाचत्वारिंशच्च॥५॥ बृह

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०वै सादयतु पृथिव्याः पृष्ठे ज्योतिष्मतीं विश्वस्मै प्राणायापानाय विश्वं ज्यो
७७ तिर्यच्छाग्निस्तेऽधिपतिर्विश्वकर्मा त्वा सादयत्वंतरिक्षस्य पृष्ठे ज्योतिष्मतीं विश्व
स्मै प्राणायापानाय विश्वं ज्योतिर्यच्छ वायुस्तेऽधिपतिः प्रजापतिस्त्वा सादयतु दि
वः पृष्ठे ज्योतिष्मतीं विश्वस्मै प्राणायापानाय विश्वं ज्योतिर्यच्छ परमेष्ठी तेऽधि
पतिः पुरोवातसनिरस्यभ्रसनिरसि विद्युत्सनिः ॥५॥ अस्तनयित्नुसनिरसि
वृष्टिसनिरस्यग्नेर्यान्यसि देवानामग्ने यान्यसि वायोर्यान्यसि देवानां वायो
यान्यस्यंतरिक्षस्य यान्यसि देवानामंतरिक्ष यान्यस्यंतरिक्षमस्यंतरिक्षा
य त्वा सलिलाय त्वा सर्णीकाय त्वा सतीकाय त्वा केताय त्वा प्रचेतसे त्वा वि

वस्वते त्वा दिवस्त्वा ज्योतिष आदित्येभ्यस्त्वर्चे त्वा रुचे त्वा द्युते त्वा भा
से त्वा ज्योतिषे त्वा यशोदां त्वा यशसि तेजोदां त्वा तेजसि पयो
दां त्वा पयसि वर्चोदां त्वा वर्चसि द्रविणोदां त्वा द्रविणे सादया
मि तेनर्षिणा तेन ब्रह्मणा तया देवतया गिरस्वद्ध्रुवा सीद ॥
२॥ विद्युत्सनिर्धु नेन्वैका न्त्रि शञ्च ॥ ६॥ भूयस्कृदसि व
रिवस्कृदसि ... स्यूर्ध्वास्यंतरिक्षसदस्यंतरिक्षे सीदा
प्सुषदसि श्येनसदसि गृध्रसदसि सुपर्णसदसि ना

तै.सं.०च ॰प्सु सदसि पृथिव्यास्त्वा द्रविणे सादयाम्यंतरिक्षस्य त्वा द्रविणे सा
दयामि दिवस्त्वा द्रविणे सादयामि दिशां त्वा द्रविणे सादयामि
द्रविणोदां त्वा द्रविणे सादयामि प्राणं मे पाह्यपानं मे पाहि व्यानं मे ॥१॥
पाह्यायुर्मे पाहि विश्वायुर्मे पाहि सर्वायुर्मे पाह्यग्ने यत्ते परं हृन्नाम ता
वेहि संरभावहै पांचजन्येष्वप्येध्यग्ने यावा अयावा एवा ऊमाः सब्दः
सगरः सुमेकः ॥२॥ व्यानं मे द्वात्रिंशच्च ॥७॥ अग्निना विश्वा
षाट् सूर्येण स्वराट् क्रत्वा शचीपतिर्ऋषभेण त्वष्टा यज्ञेन मघ
वान्दक्षिणया सुवर्गो मन्युना वृत्रहा सौहार्द्येन तनूपा

नगयः पृथिव्यासनोदृग्भिरन्नादो वषट्कारेणर्द्धः साम्ना तनूपा
विराजा ज्योतिष्मान्ब्रह्मणा सोमपा गोभिर्यज्ञं दाधार क्षत्रे
ण मनुष्यानश्वेन च रथेन च वज्र्यृतुभिः प्रभुः संवत्सरेण परिभू
स्तपसानाधृष्टः सूर्यः सन्तनूभिः ॥१॥ अग्निनैकान्न पंचाशच्च ॥८॥
॥ प्रजापतिर्मनसान्धोऽच्छेतो धाता दीक्षायां सविता भृत्यां पूषा सो
मक्रयण्यां वरुण उपनद्धोऽसुरः क्रीयमाणो मित्रः क्रीतः शिपि
विष्ट आसादितो नरंधिषः प्रोह्यमाणोऽधिपतिरागतः प्रजा
पतिः प्रणीयमानोऽग्निराग्नीध्रे बृहस्पतिराग्नीध्रात्प्र

सं०ब०
न इंद्रो ह विष्णो नेभि दितिरासादितो विष्णुरुषाव क्रियमाणो तं

३९ पौत्तोयमोभिषुतोऽपतप्त आधूयमानो वायुः पूयमानो मित्रः क्षीर
श्रीमंथी सक्तुश्रीर्वैश्वदेव उन्नीतो रुद्र आहुतो वायुरावृत्तो न
चक्षाः प्रतिख्यातो भक्ष आगतः पितॄणां नाराशंसः सोसुरात्तः सिंधु
रवभृथमवप्रयन्त्समुद्रावगतः सलिलःप्रप्लुतः स्वर्बृहद्गतः ॥
१॥ रुद्रएकविंशति श्च ॥९॥ कृत्तिका नक्षत्रमग्निर्देवता अग्ने रुच ३९
स्थप्रजापतेर्धातुःसोमस्य चैत्वारुचेत्वाद्युतेत्वाभासे त्वाज्योतिषे
त्वारोहिणी नक्षत्रं प्रजापतिर्देवता मृगशीर्षं नक्षत्रं सोमो देवता

द्रो नक्षत्रं रुद्रो देवता पुनर्वसू नक्षत्रमदितिर्देवता तिष्यो नक्षत्रं
६ बृहस्पतिर्देवता आश्रेषा नक्षत्रं सर्पा देवता मघा नक्षत्रं पितरो देव
ता फल्गुनी नक्षत्रं ॥१॥ अर्यमा देवता फल्गुनी नक्षत्रं भगो देवता
हस्तो नक्षत्रं सविता देवता चित्रा नक्षत्रमिंद्रो देवता स्वाती नक्ष
त्रं वायुर्देवता विशाखे नक्षत्रमिंद्राग्नी देवतानूराधा नक्षत्रं मि
त्रो देवता रोहिणी नक्षत्रमिंद्रो देवता विचृतौ नक्षत्रं पितरो देवता
षाढा नक्षत्रमापो देवताषाढा नक्षत्रं विश्वे देवा देवता श्रोणा न
क्षत्रं विष्णुर्देवता श्रविष्ठा नक्षत्रं वसवो देवः ॥२॥ देवता शतभि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं॰ च॰ ङ्नक्षत्रमिंद्रोदेवताप्रोष्ठपदानक्षत्रमजएकपादेवताप्रोषपदा
४ नक्षत्रमहिर्बुध्नियोदेवतारेवतीनक्षत्रंपूषादेवताश्वयुजौन
क्षत्रमश्विनौदेवतापभरणीनेक्षत्रंयमोदेवतापूर्णापश्चाद्यत्ते
देवाअदधुः॥३॥ फल्गुनीनक्षत्रंवसवस्त्रयस्त्रिंशच्च॥१०॥ मधुश्च
माधवश्चवासंतिकावृतूशुक्रश्चशुचिश्चग्रैष्मावृतूनभश्चन ४
भस्यश्चवार्षिकावृतूइषश्चोर्जश्चशारदावृतूसहश्चसहस्यश्च
राम हैमंतिकावृतूतपश्चतपस्यश्चशैशिरावृतूअग्नेरंतःश्लेषोसिकल्पे
तांद्यावापृथिवीकल्पंतामापओषधीःकल्पंतामग्नयःपृथग्

मज्यैष्ठ्यायसव्रताः॥१॥ येअग्नयःसमनसोंतराद्यावापृथिवीशैशि
रावृतूअभिकल्पमानाइंद्रमिवदेवाअभिसंविशंतुसंब्रह्मप्रचे
ताश्चाग्नेःसोमस्यसूर्यस्योग्राचभीमाचपित्रूणांयमस्येंद्रस्यध्रु
वाचपृथिवीचदेवस्यसवितुर्मरुतांवरुणस्यधत्रीचधरित्रीचमि
त्रावरुणयोर्मित्रस्यधातुःप्राचीचप्रतीचीचवसूनांरुद्राणां॥२॥
आदित्यानांतेतेधिपतयस्तेभ्योनमस्तेनोमृडयंतुतेयंद्विष्मोय
श्चनोद्वेष्टितंवोजंभेदध्यामिसहस्रस्यप्रमाअसिसहस्रस्यप्रति
माअसिसहस्रस्यविमाअसिसहस्रस्योन्माअसिसाहस्रोसि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०च०

४१ सहस्रोाय त्वेमामे अग्नइष्टकाघेनवः संत्वेकाचशतंचसहस्रंचायु
तंच॥३॥नियुतंचप्रयुतंचार्बुदंचन्यर्बुदंचसमुद्रश्चमध्यंचां
वांतश्चपरार्द्धश्चेमामेग्नइष्टकाधेनवः संतु षष्टिः सहस्रमयु
तमक्षीयमाणाः तस्थाःस्पानारघोघतैश्चुतोमघुश्चुतऊर्ज
स्वतीःस्वधाविनीस्तामेअग्नेइष्टकाधेनवःसंतुविराजोनामका ४१
मदुघा अमुत्रामुष्मिंल्लोके॥४॥सर्वेतारुद्राणामयुतंचपंचच
त्वारिंशञ्च॥११॥समिद्दिशामाशया नःसुवर्विन्मधोरतोमाध
वःपात्वस्मान्॥अग्निर्देवोदुष्टरीतुरदाभ्यइदंक्षत्रंरक्षत्नुपा

त्वस्मान्॥रथंतरंसामभिःपात्वस्मान्गायत्रीछंदसांविश्वरूपात्रिव
न्नोविष्ठयास्तोमोअह्नांसमुद्रोवातइदमोजःपिपर्तु॥उग्रादि
शामभिभूतिर्वयोधाःशुचिःशुक्रेअहन्योजसीना॥इंद्राधिपतिः
पिपृतादूतोनोमहि॥१॥क्षत्रंविश्वतोधारयेदंबृहत्सामक्षत्रभृद्वृद्धवृष्णि
यंत्रिष्टुभौजःशुभितमुग्रवीरं।इंद्रस्तोमेनपंचदशेनमध्यमिदंवातेन
सगरेणरक्ष॥प्राचीदिशांसहयशायशस्वतीविश्वेदेवाःप्रावृषाह्ना
सुवर्वती।इदंक्षत्रंदुष्टरमस्त्वोजोनाधृष्टंसहस्रियंसहस्वत्॥वै
रूपसामन्निहतस्छकेमजगत्यैनंविक्ष्वावेशयामः॥विश्वेदेवाःसप्तदशे
नो॥२॥वर्चइदंक्षत्रंसलिलवातमुग्रंधर्त्रीदिशांक्षत्रमिदंदाधारोप

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०च०

स्याशानां मित्र वदस्वोजः॥मित्रावरुणाशरदाह्ना चिकित्नू अस्मै राष्ट्राय म

४२ हि शर्म यच्छतं। वैराजे सामन्निह धि मे मनीषानुष्टुभा संभृतं वीर्यं सहः।

इदं क्षत्रं मित्रवदार्द्रदानु मित्रावरुणा रक्षतमाधिपत्यैः। सम्राड्दिशां

सहसाम्नी सहस्वत्युतुर्हेमंतो विष्टयानः पिपर्तु। अवस्युवाताः॥३॥ ब

म हतीनु शक्वरी रिमं यज्ञमवंतु नो घृताचीः। सुवर्वती सुदुघा नः पय

स्वती दिशां देव्यवतु नो घृताची। त्वं गोपाः पुरएतोत पश्चाद्बृहस्पते ४२

याम्यां युङ्धि वाचं॥ ऊर्ध्वा दिशां रंतिराशौषधीनां संवत्सरेण स

विता नो अह्नां रेवत्सामा तिच्छंदा उ घंदो जा तशत्रुः स्योना नो

।४। अस्तु स्तोम त्रयस्त्रिंशो भुवनस्य पत्नी विवस्वद्वाते अभि

नो गृणाहि। घृतवती सवितराधिपत्यैः पयस्वती रंतिराशा नो अ

स्तु। ध्रुवा दिशां विष्णुपत्न्यघोरास्येशाना सहसो या मनोता। बृहस्प

॥ तिर्मातरिश्वोत वायुः संधुवाना वाता अभि नो गृणंतु। विष्टंभो दि

वो धरुणः पृथिव्या अस्येशाना जगतो विष्णुपत्नी॥ विश्वव्यचा इषयंती

सुभूतिः शिवा नो अस्त्वदितिरुपस्थे॥ वैश्वानरो न ऊत्याप्र षे दिव्य

उ नो घा नुमतिरन्विदनुमते त्वं कया न श्चित्र आ भुवदूती त्को अ

घयुंक्ते॥५॥ महि सत्पदशे ना वस्युगाता अभि नो नु नेश्व तुर्द

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०पै०ख०

४३

शाच॥१२॥रश्मिराशंस्य यंपु रोह रिकेशो ग्निर्मूर्द्धं द्वाग्निभ्यांबृहस्प
तिभूयस्त्व दस्याग्निनाविश्वाषाड्प्रजातिपतिमनसा सृत्तिकामधु
श्वसमिदिशांद्वादश॥ रश्मिरसिप्रतिपेनुव सिसत्नयिन्तुसनि
रस्यादित्यानांसमत्रिंशत्॥ ८॥ ॥२८॥ ॥३॥३७॥हरि
॥ओम्॥ नमस्ते रुद्र मन्यव उतो तइषवे नमः। नमस्ते अस्तु नाम॥
धन्वने बाहुभ्यामुत ते नमः। या तइषुः शिवतमा। शिवंबभूवते ४३
धनुः। शिवा शरव्या या तव तया नो रुद्र मृडय॥ या ते रुद्र शि
वा तनूरघोरापापकाशिनी॥ तया नस्तनुवा शंतमया गिरिशं
ताभिचाकशीहि॥ यामिषुंगिरिशं [illegible] स्ते॥ १॥ बिभर्ष्यस्तवे। शि

वांगिरित्र तांकुरुमाहिंसीः पुरुषंजगत्॥ शिवेनवचसात्वागिरिशा
छावदामसि। यथानः सर्वमिज्जगदयक्ष्मंसुमना असत्॥ अ
ध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक्। अहींश्च सर्वाञ्जंभयं
सर्वाश्च यातुधान्यः। सौ अ यस्ताम्रो अरुण उत बभ्रुः सुमं
गलः। येचेमांरुद्रा अभितोदिक्षु॥२॥श्रिताः सहस्रशोवैषां
हेडईमहे। असौयोवसर्पतिनीलग्रीवो विलोहितः। उतैनंगो
पा अदृश्रन्नदृश्रन्नुदहार्यः। उतैनं विश्वाभूतानि सदृष्टो
मृडयातिनः। प्रमुंच धन्वनस्त्व मुभयोरार्त्नियोर्ज्याम्। याश्चते
हस्त इषवः।३॥परा ता भगवो वप। अवतत्य धनुस्त्वं सहस्राक्ष

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०च० क्षशतेषुधे। निशीर्य शल्यानां मुखा शिवो नः सुमना भव। विज्यं धु
४४ नुः कपर्दिनो विशल्यो बाणवाँ उत॥ अनेशन्नस्येषव आभुर
स्य निषंगथिः। या ते हेतिर्मीढुष्टम हस्ते बभूव ते धनुः। तयास्मा
न्विश्वतस्त्वमयक्ष्मया परिभुज॥ नमस्ते अस्त्वायुधायाना
ततायधृष्णवे। उभाभ्यामुत ते नमो बाहुभ्यां तव धन्वने। परि ते ४४
धन्वनो हेतिरस्मान्वृणक्तु विश्वतः। अथो य इषुधिस्तवारे अस्म
न्निधेहि तं॥ ४॥ हस्ते दि क्षिषव उभाभ्यां द्वाविंशतिश्च॥ १॥
नमो हिरण्यबाहवे सेनान्ये दिशां च पतये नमो नमो वृक्षेभ्यो
हरिकेशेभ्यः पशूनां पतये नमो नमः सस्पिंजराय त्विषीमते प

थीनां पतये नमो नमो बभ्लुशाय विव्याधिनेन्नानां पतये नमो नमो
हरिकेशायोपवीतिने पुष्टानां पतये नमो नमो भवस्य हेत्यै जगतां पत
ये नमो नमो रुद्रायाततायिने क्षेत्राणां पतये नमो नमः सूतायाहंत्या
य वनानां पतये नमो नमः॥ १॥ रोहिताय स्थपतये वृक्षाणां पतये न
मो नमो मंत्रिणे वाणिजाय कक्षाणां पतये नमो भुवंतये वारिवस्कृता नमो
यौषधीनां पतये नमो नम उच्चैर्घोषायाक्रंदयते पत्तीनां पतये नमो
नमः कृत्स्नवीताय धावते सत्वनां पतये नमः॥ २॥ वनानां पतये नमो
न्नत्रिंशन्नमएकां[illegible]शिश्च॥ २॥ नमः सहमानाय निव्याधिन आव्या
रा ध्विनीनां पतये नमो नमः ककुभाय निषंगिणे स्तेनानां पतये नमो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आयच्छद्भ्यो विसृजद्भ्यश्च वो नमो नमोऽस्यद्भ्यो विध्यद्भ्यश्च वो नमो नम

रु० प्र० न मो निषंगिण इषुधिमते तस्कराणां पतये नमो नमो वंचते परिवंचते स्तायूनां

४५ पतये नमो नमो निचेरवे परिचराया रण्या नां पतये नमो नमः सृकावि

भ्यो जिघांसद्भ्यो मुष्णतां पतये नमो नमोऽसिमद्भ्यो नक्तं चरद्भ्यः प्र

कृंतानां पतये नमो नम उष्णीषिणे गिरिचराय कुलुंचानां पतये नमो

नमः ॥१॥ इषुमद्भ्यो धन्वायिभ्यश्च वो नमो नम आतन्वानेभ्यः प्र

तिदधानेभ्यश्च वो नमो नम आसीनेभ्यः शयानेभ्यश्च वो नमो ४५

नमः स्वपद्भ्यो जाग्रद्भ्यश्च वो नमो नमस्तिष्ठद्भ्यो धावद्भ्यश्च वो

नमो नमः सभाभ्यः सभापतिभ्यश्च वो नमो नमो अश्वेभ्योऽश्व

पतिभ्यश्च वो नमः कुलुंचानां पतये नमो नमोऽश्वपतिभ्यस्त्री

णिवा ॥२॥ नम आव्याधिनीभ्यो विविध्यंतीभ्यश्च वो नमो न

म उगणाभ्यस्तृंहतीभ्यश्च वो नमो नमो गृत्सेभ्यो गृत्सपति

भ्यश्च वो नमो नमो व्रातेभ्यो व्रातपतिभ्यश्च वो नमो नमो ग

णेभ्यो गणपतिभ्यश्च वो नमो नमो विरूपेभ्यो विश्वरूपेभ्यश्च

वो नमो नमो महद्भ्यः क्षुल्लकेभ्यश्च वो नमो नमो रथिभ्योऽरथे

भ्यश्च वो नमो नमो रथेभ्यः ॥१॥ रथपतिभ्यश्च वो नमो नमः

सेनाभ्यः सेना[illegible]नीभ्यश्च वो नमो नमः क्षत्तृभ्यः संग्र

हीतृभ्यश्च वो नमो नमस्तक्षभ्यो रथकारेभ्यश्च वो नमो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०५०

४६ नमः कुलालेभ्यः कर्मारेभ्यश्च वो नमो नमः पुंजिष्टेभ्यो निषा
देभ्यश्च वो नमो नम इषुकृद्भ्यो धन्वाकृद्भ्यश्च वो नमो नमो मृ
गयुभ्यः श्वनिभ्यश्च वो नमो नमः श्वभ्यः श्वपतिभ्यश्च वो
नमः॥२॥ रथेभ्यः श्वपतिभ्यश्च द्वे च॥४॥ नमो भवाय च रु
द्राय च नमः शर्वाय च पशुपतये च नमो नीलग्रीवाय च शि
तिकंठाय च नमः कपर्दिने च व्युप्तकेशाय च नमः सहस्राक्षा ४६
य च शतधन्वने च नमो गिरिशाय च शिपिविष्टाय च नमो मी
ढुष्टमाय चेषुमते च नमो ह्रस्वाय च वामनाय च नमो बृहते

च वर्षीयसे च नमो वृद्धाय च संवृध्वने च॥१॥ नमो अग्रियाय च प्र
थमाय च नम आशवे चाजिराय च नमः शीघ्रियाय च शीभ्याय च
नम ऊर्म्याय चावस्वन्याय च नमः स्रोतस्याय च द्वीप्याय च॥२॥ सं
वध्वने च पंच च विंशतिश्च॥५॥ नमो ज्येष्ठाय च कनिष्ठाय च न
मः पूर्वजाय चापरजाय च नमो मध्यमाय चापगल्भाय च नमो ज
घन्याय च बुध्नियाय च नमः सोभ्याय च प्रतिसर्याय च नमो याम्या
य च क्षेम्याय च नम उर्वर्याय च खल्याय च नमः श्लोक्याय चाव
सान्याय च नमो वन्याय च कक्ष्याय च नमः श्रवाय च प्रतिश्रवाय च॥१॥
नम आशुषेणाय चाशुरथाय च नमः शूराय चावभिंदते च नमो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं० चं०

४७ मैवर्मिणेचवरूथिनेचनमोबिल्मिनेचकवचिनेचनमःश्रुतायचश्रु
तसेनायच॥२॥प्रतिश्रवायचपंचविंशतिश्च॥६॥नमोदुंदुभ्या
यचाहनन्यायनमोधृष्णवेचप्रमृशायचनमोदूतायचप्रहिताय
चनमोनिषंगिणेचेषुधिमतेचनमस्तीक्ष्णेषवेचायुधिनेचनमस्वा
युधायचसुधन्वनेचनमःस्रुत्यायचपथ्यायचनमःकाट्यायच
नीप्यायचनमःसूद्यायचसरस्यायचनमोनाद्यायचवैशंताय ४७
च॥१॥नमःकूप्यायचावट्यायचनमोवर्ष्यायचावर्ष्यायच
नमोमेघ्यायचविद्युत्यायचनमईध्रियायचातप्यायचनमो

वात्यायचरेष्मियायचनमोवास्तव्यायचवास्तुपायच॥२॥वैशं
च॥ तायचत्रिंशत्॥७॥नमःसोमायचरुद्रायचनमस्ताम्रायचा
रुणायचनमःशंगायचपशुपतयेचनमउग्रायचभीमायच
नमोअग्रेवधायचदूरेवधायचनमोहंत्रेचहनीयसेचनमोवृ
क्षेभ्योहरिकेशेभ्योनमस्तारायनमःशंभवेचमयोभवेचनमःशं
करायचमयस्करायचनमःशिवायचशिवतरायच॥१॥नम
स्तीर्थ्यायचनमःपार्यायचावार्यायचनमःप्रतरणायचोत्तरणा
यचनमआतार्यायचालाद्यायचनमःशष्प्यायचफेन्यायच
नमःसिकत्यायचप्रवाह्यायच॥२॥शिवतरायचत्रिंशच्च॥८॥नम
कूल्यायच

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं॰च॰ इरिण्याय च प्रपथ्याय च नमः किꣳशिलाय च क्षयणाय च नमः क
४८ पर्दिने च पुलस्तये च नमो गोष्ठ्याय च गृह्याय च नमस्तल्प्या
य च गेह्याय च नमः काट्याय च गह्वरेष्ठाय च नमो ह्र[illegible]
दय्याय च निवेष्प्याय च नमः पाꣳसव्याय च रजस्याय च नमः
शुष्क्याय च हरित्याय च नमो लोप्याय चोलप्याय च॥ १॥ नम
ऊर्व्याय च सूर्म्याय च नमः पर्ण्याय च पर्णशद्याय च नमोपगु
रमाणाय चाभिघ्नते च नम आखिदते च प्रखिदते च नमो
वः किरिकेभ्यो देवानाꣳ हृदयेभ्यो नमो विक्षीणकेभ्यो नमो

विचिन्वत्केभ्यो नम आनिर्हतेभ्यो नम आमीवत्केभ्यः॥ २॥ उ
लप्याय च त्रिꣳशच्च॥ ९॥ द्रापे अन्धसस्पते दरिद्र नीललोहि
त। एषां पुरुषाणामेषां पशूनां मा भेर्मारो मो एषां किं चनाममत्
॥ या ते रुद्र शिवा तनूः शिवा विश्वाह भेषजी। शिवा रुद्रस्य
भेषजी तया नो मृड जीवसे॥ इमाꣳ रुद्राय तवसे कपर्दिने क्षय
द्वीराय प्रभरामहे मतिं। यथा नः शमसद्द्विपदे चतुष्पदे विश्वं
पुष्टं ग्रामे अस्मिन्ननातुरं॥ १॥ अनातुरं मृड नो रुद्रोत नो मयस्क
धि क्षयद्वीराय नमसा विधेम ते। यच्छं च योश्च मनुरायजे पिता
तदश्याम तव रुद्र प्रणीतौ। मा नो महान्तमुत मा नो अर्भकं मा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स॰च॰ नउक्षंतमुमानउक्षितं॥ मानोवधीःपतरंमोतमारंतेप्रियामानस्त
४९ नुवोरुद्ररीरिषः। मानस्तोकेतनयेमानआयुषिमानोगोषुमानो
अश्वेषुरीरिषः। वीरान्मानोरुद्रभामितोवधीर्हविष्मंतोनमसावि
धेमते। आरात्तेगोघ्नउतपूरुषघ्नेक्षयद्वीरायसुम्नमस्मेतेअ
स्तु। रक्षाचनोअधिचदेवब्रूह्यधाचनःशर्मयछद्विबर्हाः। ४९
स्तुहि॥ श्रुतंगर्तसदंयुवानंमृगंनभीममुपहत्नुमुग्रं। मृडा
जरित्रेरुद्रस्तवानोअन्यंतेअस्मन्निवपंतुसेनाः। परिणोरुद्रस्य
हेतिर्वृणक्तुपरित्वेषस्यदुर्मतिरघायोः। अवस्थिरामघवद्भ्य
स्तनुष्वमीढ्वस्तोकायतनयायमृडय। मीढुष्टमशिवतमशि

वोनःसुमनाभव। परमेवृक्षआयुधंनिधायकृत्तिंवसानआच
रपिनाकंबिभ्रदागहि। विकिरिदविलोहितनमस्तेअस्तुभगवः।
यास्तेसहस्रंहेतयोन्यमस्मन्निवपंतुताः। सहस्राणिसहस्रधाबा
हुवोस्तवहेतयः। तासामीशानोभगवःपराचीनामुखाकृधि॥ ५॥
अस्मिंस्तनुवस्तुहिपिनाकमेकान्नत्रिंशच॥ १०॥ सहस्राणि
सहस्रशोयेरुद्राअधिभूम्यां। तेषांसहस्रयोजनेवधन्वानित
न्मसि। अस्मिन्महत्यर्णवेंतरिक्षेभवाअधि। नीलग्रीवाःशि
तिकंठाःशर्वाअधःक्षमाचराः। नीलग्रीवाःशितिकंठादिवं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०च०
५० रुद्रा उपश्रिताः। येवृक्षेषु सस्पिंजरा नीलग्रीवा विलोहिताः। ये भू
तानामधिपतयो विशिखासः कपर्द्दिनः। ये अन्नेषु विविध्यंपात्रे
षुपिबतो जनानन्। ये पथांपथिरक्षय ऐलबृदा यव्युधः। ये ती
१ र्थानि प्रचरंति सृकावंतो निषंगिणः। य एतावंतश्च भूयाꣳस ५०
श्च दिशो रुद्रा वितस्थिरे। तेषाꣳ सहस्रयोजने ऽव धन्वानि त
न्मसि। नमो रुद्रेभ्यो ये पृथिव्यां। येंतरिक्षे ये दिवि येषामन्नंवा
तो वर्षमिषवस्तेभ्यो दश प्राचीर्द्दश दक्षिणा दशप्रतीचीर्द्द
शोदीचीर्दशोर्ध्वास्तेभ्यो नमस्ते नो मृडयंतु ते यं द्विष्मो यश्च नो

द्वेष्टि तं वो जंभे दधामि॥२॥ तीर्थानि यश्च षट् च॥२१॥ नमस्ते नमो
हिरण्यबाहवे नमः सहमानाय नम आव्याधिनीभ्यो नमो भवा
य च नमो ज्येष्ठाय च नमो दुंदुभ्याय च नमः सोमाय च नम इरिण्या
य च द्रापे सहस्राणि यो कादश॥ नमस्ते नमो भवाय च द्रापे सप्त
विꣳशतिः॥२७॥ ५ ॥ छ ॥ हरिः ओम्॥ अश्मन्नूर्जं प
र्वते शिश्रियाणां वाते पर्जन्ये वरुणस्य शुष्मे। अद्भ्य ओषधी
भ्यो वनस्पतिभ्योधिसंभृतां तां न इषमूर्जं धत्त मरुतः सꣳ
रराणाः। अश्मꣳस्ते क्षुदमं ते शुगृच्छतु यं द्विष्मः। समुद्रस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वावाकया ग्नेपरिव्ययामसि ॥ पावको अस्मभ्यं शिवोभव। हिमस्यत्वा
 जरायुणाग्नेपरिव्ययामसि। पावको अस्मभ्यं शिवोभव॥ उप॥१॥
उपज्मन्नुपवेतसेवतरंनदीषु॥ अग्नेपित्तमपामसि॥ मंडूकि ताभिरागहि
सेमन्नोयज्ञं॥ पावकवर्णं शिवंकृधि॥ पावकआचितयं त्याकृपा। क्षामन्नु
रुचउषसो नभानुना। तूर्वन्न यामन्नेतशस्य नूरणआयोघृणे। तेने
तृषाणो अजरः। अग्नेपावकरोचिषा मंद्रयादेवजिह्वया। आदेवा
न्॥२॥वक्षियक्षिचा। सनःपावकदीदिवोग्नेदेवां इहावह। उपय
ज्ञं हविश्चनः। अपामिदंन्ययनं समुद्रस्यनिवेशनं। अन्यंते
अस्मत्तपंतुहेतयःपावको अस्मभ्यं शिवोभव। नमस्ते हरसे शो

६

चिषेनमस्ते अस्त्वर्चिषे। अन्यंते अस्मत्तपंतुहेतयः पावको अस्मभ्यं
शिवोभव॥ नृषदेवट्॥३॥ अप्सुषदेव [illegible] नेसदेवट् बर्हिषदेवट् स्व
र्विदेवट्। येदेवादेवानांयज्ञियायज्ञियानां संवत्सरीणमुपभा
गमासते। अहुतादोहविषोयज्ञे अस्मिन्स्वयंजुहुध्वंमधुनोघृतस्य।
२ येदेवादेवेष्वधिदेवत्वमायन्ये ब्रह्मणःपुरएतारो अस्य। येभ्योनऋते
पवतेधामकिंचननतेदिवो नपृथिव्या अधिस्नुषु। प्राणदाः॥४॥
अपानदाव्यानदाश्चक्षुर्दोवर्चोदावरिवोदाः। अन्यंते अस्मत्तपं
तुहेतयःपावको अस्मभ्यं शिवोभव। अग्निस्तिग्मेनशोचिषा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०च यंसधिष्ठंन्यग्निरं। अग्निर्नोवंसतेरयिं।सेनानीकिनसुविदत्रो अ
५२ स्मेयष्टादेवांआजिषस्वस्ति। अदब्धोगोपा उतनःपरस्पा अग्ने
द्युमदुतरेवद्दिदीहि॥५॥ उपदेवान्वदुष्माणदाःश्वतुतारिद्रश
द्धा॥१॥ इयेमा विश्वाभुवनानिजुह्वदृषिर्होतानिषसादापितानः
।सआशिषाद्रविणमिच्छमानःपरमच्छदोवरआविवेश। विश्व ५२
कर्मामनसायद्विहायाधाताविधातापरमोतसंदृक्। तेषामिष्टा
निसमिषामदंतियत्रसप्तऋषीन्परएकमाहुः। योनःपिताजनि
तायोविधातायोनःसतोअभ्यासज्जजान॥१॥ योदेवानांना

मधाएकएवतंसंप्रश्नंभुवनायंत्यन्या। तआयजंतद्रविणंस
मस्माऋषयःपूर्वेजरितारोनभूना। असूर्तासूर्तोरजसोविमाने
येभूतानिसमकृण्वन्निमानि। नतंविदाथयइदंजजानान्यद्युष्मा
कमंतरंबभूवाति॥ नीहारेणप्रावृताजल्प्याचासुतृपउक्थशा
सश्चरंति।परोदिवापरएना॥२॥ पृथिव्यापरोदेवेभिरसुरैर्गुहायत्।
कंस्विद्गर्भंप्रथमंदध्रआपोयत्रदेवाःसमगच्छंतविश्वे। तमिद्ग
र्भंप्रथमंदध्रआपोयत्रदेवाःसमगच्छंतविश्वे। अजस्यनाभा
वध्येकमर्पितंयस्मिन्निदंविश्वंभुवनमधिश्रितं। विश्वकर्माह्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं॰ च॰ जनिष्ट देव आदिद्धं पूर्वो अभवद्धितीयः। तयें ती पिता जनितौषधी
५२ नां॥३॥ अपां गर्भं व्यदधात्पुरुत्रा चक्षुषः पिता मनसा हि धीरो घृत
न मेने अजनन्नेनमाने। यदेदंता अददृंहंतपूर्व आदिद्यावापृथि
वी अप्रथेतां। विश्वतश्चक्षुरुत विश्वतो मुखो विश्वतो हस्तउत
विश्वतस्पात्। सं बाहुभ्यां नमति सं पतत्रैर्द्यावापृथिवी जनयंदे
व एकः॥ किंस्विदासीदधिष्ठानमारंभणं कतमत्स्वित्किमासीत्॥ ५२
यदी भूमिं जनयन्॥४॥ विश्वकर्मा वि द्यामौर्णोन्महिना विश्व
चक्षाः॥ किंस्विद्वनं क उस वृक्ष आस यतो द्यावापृथिवी निष्टत

क्षुः। मनीषिणो मनसा पृछतेदु तद्यदध्यतिष्ठद्भुवनानि धारयन्॥
या ते धामानि परमाणि यावमा या मध्यमा विश्वकर्मन्नुतेमा।
शिक्षा सखिभ्यो हविषि स्वधावः स्वयं यजस्व तन्वं जुषाणः।
वाचस्पतिं विश्वकर्माणमूतये॥५॥ मनोयुजं वाजे अद्या हुवेम।
स नो नेदिष्ठा हवनानि जोषते विश्वशंभूरवसे साधुकर्मा। वि
श्वकर्मन्हविषा वावृधानः स्वयं यजस्व तन्वं जुषाणः। मुह्यं
त्वन्ये अभितः सपत्ना इहास्माकं मघवा सूरिरस्तु। विश्वक
र्मन्हविषा वर्द्धनेन त्रातारमिंद्रमकृणोरवध्यं। तस्मै विशः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं॰ब॰ समनमंतम्पूर्वीरयमुग्नोविहव्योयथात्वसोसमुद्रायवयुनाय
५५ सिंधूनांपतयेनमः।नदीनांꣳसर्वासांपित्रेजुहुताविश्वकर्म
णेविश्वाहामर्त्यꣳहविः॥६॥प्रजानेनौषधीनांब्रह्मिंजनयं
तयेनमोनवच॥१॥उदेनमुन्नरांनयाग्नेघृतेनाहुत।राय
स्पोषेणसꣳसृजप्रजयाचधनेनच।इंद्रेमंप्रतरांकृधिसजो॰८४
तानामसद्वशी॥समेनंविचैसाख्नजदेवेभ्योभागधाअस
त्।यस्यकुर्मोहविर्गृहेतमग्नेवर्धयात्वं॥तस्मैदेवाअधिब्र
वन्नयंचब्रह्मणस्पतिः।उदुत्याविश्वेदेवाः॥१॥अग्नेभरंतुचित्तिभिः

सनोभवशिवतमःसुप्रतीकोविभावसुः।पंचदिशोदेवीर्यज्ञमवंतु
देवीरपामतिंदुर्मतिंबाधमानाः।रायस्पोषेयज्ञपतिमाभजंतीः।रायस्पोषेअधि स्वोपे
यज्ञोअस्थात्समिद्धेअग्नावधिमामहानः।उक्थपत्रईड्योगृभीतस्त ष्टाभि
प्तंघर्मंपरिगृह्यायजंत॥ऽ॥।ऊर्जायद्यज्ञमशमंतदेवादैव्य
यत्रेजोष्टे।देवश्री:श्रीमणाःशतपयाः॥२॥परिगृह्यदेवाय
ज्ञमायन्।सूर्यरश्मिर्हरिकेशःपुरस्तात्सविताज्योतिरुदयाꣳ
अजस्रं।तस्यपूषाप्रसवेयातिदेवःसंपश्यन्विश्वाभुवनानि
गोपाः।देवादेवेभ्योअध्वर्यंतोअस्थुर्वीतꣳशमित्रेशमिताय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०व० जघ्यै।तुरीयोयस्तोयत्रहव्यमेतिततःपावकाआशिषोनोजुषंतां
१५ ।विमानएषदिवोमध्यआस्तआपप्रिवान्रोदसीअंतरिक्षं।सवि
श्वाचीरभि॥३॥चष्टेघृताचीरंतरापूर्वमपरंचकेतुं।उक्षासमु
द्रोअरुणःसुपर्णःपूर्वस्ययोनिंपितुराविवेश।मध्येदिवोनिहितः
पृश्निरश्माविचक्रमेरजसःपात्यंतौ।इंद्रंविश्वाअवीवृधन्समु १५
द्रव्यचसंगिरः।रथीतमंरथीनांवाजानांसत्पतिंपतिं॥सुम्नाह सुम्न
यज्ञोदेवाँआचवक्षद्यक्षदग्निर्देवोदेवाँआचवक्षत्।धनंज
यमाप्रसवेनोग्राभेणोदगभीत्।अथासपत्नांइंद्रोमेनिग्राभे त॥वा

णाधराँअकः।उद्ग्राभंचनिग्राभंचब्रह्मदेवाअवीवृधन्॥अथास
पत्नानिंद्राग्नीमेविषूचीनान्व्यस्यतां॥४॥विश्वेदेवाःशातपर्वअभि वाअ
वाजस्यषड्विंशतिश्च॥३॥आशुःशिशानोवृषभोनयुध्मोघना ध्मो
घनःक्षोभणश्चर्षणीनां।संक्रंदनोनिमिषएकवीरःशतंसेना
अजयत्साकमिंद्रः।संक्रंदनेनानिमिषेणजिष्णुनायुत्कारेणदुश्च्य
वनेनधृष्णुना।तदिंद्रेणजयततत्सहध्वंयुधोनरइषुहस्तेनव
ष्णा।सइषुहस्तैःसनिषंगिभिर्वशीसंस्रष्टासयुधइंद्रोगणेन।
संसृष्टजित्सोमपाबाहुशर्ध्यूर्ध्वधन्वाप्रतिहिताभिरस्ता।ब

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं० व०

९६

हस्पते परिदीया ॥१॥ रथेन रक्षोहामित्राꣳ अपबाधमानः । प्रभंजं सेनाः प्र
मृणो युधा जयंनस्माकमेध्यविता रथानां । गोत्रभिदं गोविदं वज्रबा
हुं जयंतमज्म प्रमृणंतमोजसा । इमꣳ स[illegible]ता अनुवीरयध्वमिंद्रꣳ स
जाता अनुवीरयध्वमिंद्रꣳ सखायोनुसꣳरयध्वं । बलविज्ञायस्थवि
रः प्रवीरः सहस्वान्वाजी सहमान उग्रः । अभिवीरो अभिसत्वा सहो
जाजैत्रमिंद्र रथमातिष्ठ गोवित् । अभिगोत्राणि सहसा गाहमानोदा
यः ॥२॥ वीरः शतमन्युरिंद्रः । दुश्च्यवनः पृतनाषाडयुध्योस्मा[illegible] से
ना अवतु प्रयुत्सु । इंद्र आसां नेता बृहस्पतिर्दक्षिणा यज्ञः पुरएतु सो
मः ॥ देवसेनानामभिभंजतीनां जयंतीनां मरुतो यंत्वग्रे । इंद्रस्य वृ

ष्णो वरुणस्य राज्ञ आदित्यानां मरुताꣳ शर्ध उग्रं । महामनसां भुवनच्य
वानां घोषो देवानां जयतामुदस्थात् । अस्माकमिंद्रः समृतेषु ध्वजे
ष्वस्माकं या इषवस्ता जयंतु ॥३॥ अस्माकं वीरा उत्तरे भवंत्वस्मानु
देवा अवता हवेषु । उद्धर्षय मघवन्नायुधान्युत्सत्वनां मामकानां
महाꣳसि । उद्वृत्रहन्वाजिनां वाजिनान्युद्रथानां जयतामेतु घोषः ।
उप प्रेत जयता नरः स्थिरा वः संतु बाहवः । इंद्रो वः शर्म यच्छत्वनाधृ
ष्या यथासथ । अवसृष्टा परापत शरव्ये ब्रह्मसꣳशिता । गच्छामि
त्रान्प्र ॥४॥ विशमैषां कंचनोच्छिषः । मर्माणि ते वर्म[illegible]भिच्छादयामि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं॰च॰ सोमस्त्वा राजा मर्त्ते नाभिवस्तां। उरोर्वरी यो वरिवस्ते अस्तु जयंतं
५७ त्वामनुमदंतु देवाः। यत्र बाणाः संपतंति कुमारा विशिखा इव।
इंद्रो नस्तत्र वृत्रहा विश्वाहा शर्म यछतु॥५॥ दीयादायोऽजयं त्वामि
त्रान्प्रचत्वारिंशश्च॥७॥ प्राचीमनु प्रदिशं प्रेहि विद्वानग्नेरग्ने पुरो
अग्निर्भवेह। विश्वा आशा दीद्यानो वि भाह्यूर्जं नो धेहि द्विपदे चतु ५७
ष्पदे। क्रमध्वमग्निना नाकमुख्यं हस्तेषु बिभ्रतः। दिवः पृष्ठं स्व
र्गत्वा मिश्रा देवेभिराध्वं। पृथिव्या अहमुदंतरिक्षमारुहमंतरिक्षा
द्दिवमारुहं। दिवो नाकस्य पृष्ठात्स्वर्ज्योतिरगां॥ ॥ अहं। सुवर्यंतो

नापेक्षंत आद्यां रोहंति रोदसी। यज्ञं ये विश्वतोधारं सुविद्वांसो वि
तेनिरे। अग्ने प्रेहि प्रथमो देवयतां चक्षुर्देवानामुत मर्त्यानां। इयक्ष
माणा भृगुभिः सजोषाः सुवर्यंतु यजमानाः स्वस्ति। नक्तोषासा समन
सा विरूपे धापयेते शिशुमेकं समीची। द्यावाक्षामा रुक्मो अंतर्वि
भाति देवा अग्निं धारयन्द्रविणोदाः। अग्ने सहस्राक्ष॥२॥ शतमू
र्धन्छतं ते प्राणाः सहस्रमपानाः। त्वं साहस्रस्य राय ईशिषे तस्मै ते
विधेम वाजाय स्वाहा। सुपर्णोसि गरुत्मान्पृथिव्यां सीद पृष्ठे पृ
थिव्याः सीद भासांतरिक्षमापृण ज्योतिषा दिवमुत्तभान तेज

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०च० सादिशाउदृंहा। आ सुक्षा नः सुप्रतीकपुरस्तादग्नेस्वांयोनिमासी
५८ दसाध्या। अस्मिन्सधस्थे अध्युत्तरस्मिन्विश्वेदेवाः॥३॥ यजमान
श्चसीदत। प्रेद्धो अग्ने दीदिहि पुरो नोऽजस्रया सूर्म्या यविष्ठ। त्वां
शश्वंत उपयंति वाजाः॥ विधेम ते परमे जन्मन्नग्ने विधेम स्तोमै
रवरे सधस्थे। यस्माद्योने रुदारिथा यजे तं प्रत्वे हवींषि जुहु ५८
रेसमिद्धे। ताः सवितुर्वरेण्यस्य चित्रमाहं वृणे सुमतिं विश्वजन्यां।
यामस्य कण्वो अदुहत्प्रपीनां सहस्रधारां॥४॥ पयसा महीं गां।
। सप्त ते अग्ने समिधः सप्त जिह्वाः सप्त ऋषयः सप्त धाम प्रियाणि।
धैः

सप्त होत्राः सप्तधा त्वा यजंति सप्त योनीरापृणस्वा घृतेना। ईदृङ् चा
न्यादृङ् चैतादृङ् च प्रतिदृङ् च मितश्च संमितश्च सभराः। शुक्रज्योति
श्च चित्रज्योतिश्च सत्यज्योतिश्च ज्योतिष्मांश्च सत्यश्चर्तपाश्चा
त्यंहाः॥५॥ ऋतजिच्च सत्यजिच्च सेनजिच्च सुषेणश्चांत्यमित्र
श्च दूरे अमित्रश्च गणः। ऋतश्च सत्यश्च ध्रुवश्च धरुणश्च धर्त्ता
च विधर्त्ता च विधारयः। ईदृक्षास एतादृक्षास ऊ षुणः सदृक्षासः प्रति
सदृक्षास एतन। मितासश्च संमितासश्च नो ऊतये सभरसो मरुतो यज्ञ
े अस्मिन्निंद्रं दैवीर्विशो मरुतोऽनुवर्त्मानो भवंतु॥६॥ अ गाः सह
+ यथेंद्रं दैवीर्विशो मरुतोऽनुवर्त्मान एवमिमं यजमानं दैवीश्च विशो मा +
नुषीश्चानुवर्त्मानो ४१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं॰ च॰ त्वाक्षदेवाः सहस्रधारास्यंहा अनुवर्त्मानः षोडशश्च ॥ १ ॥ जीमूतस्येव भ
वति प्रतीकं यद्वर्मी याति समदामुपस्थे। अनाविद्धया तन्वा जय त्वं स त्वा
५९ वर्मणो महिमा पिपर्तु। धन्वना गा धन्वनाजिं जयेम धन्वना तीव्राः समदो
जयेम। धनुः शत्रोरपकामं कृणोति धन्वना सर्वाः प्रदिशो जयेम। वक्ष्यं
ती वेदा गनीगंति कर्णं प्रियं सखायं परिषस्वजाना। योषेव शिंक्ते वि
६५ च ततधिधन्वन् ॥ १ ॥ ज्या इयं समने पारयंती। ते आचरंती समनेव
योषा मातेव पुत्रं बिभृतामुपस्थे। अप शत्रून्विध्यतां संविदाने आ
र्त्नी इमे विष्फुरंती अमित्रान्। बह्वीनां पिता बहुरस्य पुत्रश्चिश्चा कृ
णोति समनावगत्य। इषुधिः संकाः पृतनाश्च सर्वाः पृष्ठे निनद्धो जय

ति प्रसूतः। रथे तिष्ठन्नयति वाजिनः पुरो यत्र यत्र कामयते सुषारथिः। अ
भीशूनां महिमानं ॥ २ ॥ पनायत मनः पश्चादनु यच्छंति रश्मयः। तीव्रान्घो
षान्कृण्वते वृषपाणयोऽश्वा रथेभिः सह वाजयंतः। अवक्रामंतः प्रप
दैरमित्रान्क्षिणंति शत्रूंरनपव्ययंतः। रथवाहनं हविरस्य नाम य
त्रायुधं निहितमस्य वर्म। तत्रा रथमुपरग्मं सदेम विश्वाहा वयं
सुमनस्यमानाः। स्वादुषंसदः पितरो वयोधाः कृच्छ्रेश्रितः शक्तीवं
तो गभीराः। चित्रसेना इषुबला अमृध्राः सतो वीरा उरवो व्रातसाहाः। २
ब्राह्मणासः पितरः सोम्यासः शिवे नो द्यावापृथिवी अनेहसा। पूषा
नः पातु दुरितादृतावृधो रक्षा माकिर्नो अघशंस ईशत ॥ सुपर्णं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०च० वस्तेम गो अस्यादंतो गोभिः सन्नद्धा पतति प्रसूता। यत्रा नरः सं च वि च द्र
६० वंति तत्रास्मभ्यमिषवः शर्म यंसन्। ऋजीते परि वृंग्धि नोश्मा भवतु
नस्तन्वः। सोमो अधि ब्रवीतु नोदितिः॥४॥ शर्म यच्छतु। आ जंघंति
सान्वेषां जघनां उप जिघ्नते। अश्वाजनि प्रचेतसो श्वान्सम
त्सु चोदय। अहिरिव भोगैः पर्येति बाहुं ज्याया हेतिं परिबाधमानः।
हस्तघ्नो विश्वा वयुनानि विद्वान्पुमान्पुमांसं परि पातु विश्वतः। ६०
वनस्पते वीड्वंगो हि भूया अस्मत्सखा प्रतरणः सुवीरः। गोभिः सन्न
द्धो असि वीडयस्वास्थाता ते जयतु जेत्वानि। दिवः पृथिव्याः परि
५॥ ओज उद्भृतं वनस्पतिभ्यः पर्याभृतं सहः। अपामोज्मानं परि

गोभिरावृतमिंद्रस्य वज्रं हविषा रथं यज। इंद्रस्य वज्रो मरुतामनीकं मित्रस्य
गर्भो वरुणस्य नाभिः। सेमां नो हव्यदातिं जुषाणो देव रथ प्रति हव्या गृभाय।
उप श्वासय पृथिवीमुत द्यां पुरुत्रा ते मनुतां विष्ठितं जगत्। स दुंदुभे सजूरिं
द्रेण देवैर्दूराद्॥६॥ दवीयो अप सेध शत्रून्। आ क्रंदय बलमोजो न आ
धा निष्टनिहि दुरिता बाधमानः॥ अप प्रोथ दुंदुभे दुच्छुना इत इंद्रस्य मु
ष्टिरसि वीडयस्व। आमूरज प्रत्यावर्तयेमाः केतुमद्दुंदुभिर्वावदीति। स
मश्वपर्णाश्चरंति नो नरोस्माकमिंद्र रथिनो जयंतु॥७॥ यन्त्र महिमानं
ब्राह्मणासो दितिः पृथिव्याः परि हूरादेक चत्वारिंशत्॥८॥ यदक्रंदः
प्रथमं जायमान उद्यन्समुद्रादुत वा पुरीषात्। श्येनस्य पक्षा हरिणस्य बा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं॰च॰

६१ हू उपस्तुत्यं महि जातं ते अर्वन्। यमेन दत्तं त्रित एनमायुनगिंद्र एणं प्रथ
मो अध्यतिष्ठत्। गंधर्वो अस्य रशनामगृभ्णात् सूरादश्वं वसवो निर
तष्ट। असि यमो अस्यादित्यो अर्वन्नसि त्रितो गुह्येन व्रतेन।। असि सो
मेन समया विपृक्तः॥१॥ आहुस्ते त्रीणि दिवि बंधनानि त्रीणि त आ
हुर्दिवि बंधनानि त्रीण्यप्सु त्रीण्यंतः समुद्रे। उतेव मे वरुणश्छंत्स्यर्वन्य ६१
त्रा त आहुः परमं जनित्रं। इमा ते वाजिन्नवमार्जनानीमा शफानां
सनितुर्निधाना। अत्रा ते भद्रा रशना अपश्यमृतस्य या अभिरक्षंति
गोपाः। आत्मानं ते मनसारादजानामवो दिवा॥२॥ पतयंतं पतंगं। शि

रो अपश्यं पथिभिः सुगेभिररेणुभिर्जेहमानं पतत्रि। अत्रा ते रूपमुत्तमम
पश्यं जिगीषमाणमिष आ पदे गोः। यदा ते मर्तो अनु भोगमानळादिद्ग्र
सिष्ठ ओषधीरजीगः। अनु त्वा रथो अनु मर्यो अर्वन्ननु गावो नु भगः क
नीनां। अनु व्रातासस्तव सख्यमीयुरनु देवा ममिरे वीर्यं॥३॥ ते। हिरण्य २५
शृंगो अयो अस्य पादा मनोजवा अवर इंद्र आसीत्। देवा इदस्य हविर
द्यमायन्यो अर्वंतं प्रथमो अध्यतिष्ठत्। ईर्मांतासः सिलिकमध्यमा
सः सं शूरणासो दिव्यासो अत्याः। हंसा इव श्रेणिशो यतंते यदा
क्षिषुर्दिव्यमज्ममश्वाः। तव शरीरं पतयिष्ण्वर्वंतव चित्तं वात इव ध्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स०च० जीमान्। तव शृंगाणि विष्ठिता पुरुत्रा रण्येषु जर्भुराणा चरंति। उप॥ ४॥

६२ प्राग्ध्य सनं वाज्यर्वादे वद्रीचा मनसा दीध्यानः। अजः पुरो नीयते ना
भिरस्यानु पश्चात्कवयो यंति रेभाः। उप प्रागात्परमं यत्सधस्थमर्वा
ंऽअच्छा पितरं मातरं च। अद्या देवां जुष्टतमो हि गम्या अथा शास्ते
दाशुषे वार्याणि॥५॥ विप्रक्तो दिवा वीर्यमुपैकान्न चत्वारिंशाश्व॥ ६२
७॥ मा नो मित्रो वरुणो अर्यमायुरिंद्र ऋभुक्षा मरुतः परिख्यन्। य
द्वाजिनो देवजातस्य सप्तेः प्रवक्ष्यामो विदथे वीर्याणि। यन्निर्णिजो
रेक्णसा प्रावृतस्य रातिं गृभीतां मुखतो नयंति। सुप्राङजो मेम्यद्विश्व
रूप इंद्रापूष्णोः प्रियमप्येति पाथः। एष छागः पुरो अश्वेन वाजिना पू

ष्णो भागो नीयते विश्वदेव्यः। अभिप्रियं यत्पुरोडाशमर्वता त्वष्टेत्॥ १॥
एनं सौश्रवसाय जिन्वति। यद्धविष्यमृतुशो देवयानं त्रिर्मानुषाः पर्य
श्वं नयंति। अत्रा पूष्णः प्रथमो भाग एति यज्ञं देवेभ्यः प्रतिवेदयन्न
अ जः। होताध्वर्युरावया अग्निमिंधो ग्रावग्राभ उत शंस्ता सुविप्रः। ते
न यज्ञेन स्वरंकृतेन स्विष्टेन वक्षणा आ पृणध्वं। यूपव्रस्का उत ये यू
पवाहाश्चषालं ये अश्वयूपाय तक्षति। ये चार्वते पचनं संभरं
त्युतो॥२॥ तेषामभिगूर्तिर्न इन्वतु। उप प्रागात्सुमन्मेधायि मन्म
देवानामाशा उप वीतपृष्ठः। अन्वेनं विप्रा ऋषयो मदंति देवानां पु
ष्टे चकृमा सुबंधुं। यद्वाजिनो दाम संदानमर्वतो या शीर्षण्या रशना

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०चं०

६३

र्जस्य। यद्वाघास्य प्रभृतमास्ये तृणं सर्वा ताते अपि देवेष्वस्तु॥
यदश्वस्य क्रविषः॥३॥ मक्षिकाश यद्वा स्वरौ स्वधितौ रिप्त
मस्ति॥ यद्धस्तयोः शमितुर्यन्नखेषु सर्वा ताते अपि देवेष्वस्तु॥
यदूवध्यमुदरस्यापवाति य आमस्य क्रविषो गंधो अस्ति॥
सुकृता तच्छमितारः कृण्वंतूत मेधं शृतपाकं पचंतु। यत्ते गा ६३
त्रादग्निना पच्यमानादभि शूलं निहतस्यावधावति॥
मा तद्भूम्यामाश्रिषन्मा तृणेषु देवेभ्यस्तदुशद्भ्यो रातमस्तु।
॥४॥ इडुतो क्रविषः श्रिषत्सपच॥५॥ ये वाजिनं परिपश्यं

ति पक्वं य ईमाहुः सुरभिर्निर्हरेति॥ ये चार्वतो मांसभिक्षामुपास
त उतो तेषामभिगूर्तिर्न इन्वतु। यन्नीक्षणं मांस्पचन्या उखा
या या पात्राणि यूष्ण आसेचनानि॥ ऊष्मण्यापिधाना चरूणा
मंकाः सूनाः परिभूषंत्यश्वं। निक्रमणं निषदनं विवर्तनं यच्च पड्बीश
मर्वतः। यच्च पपौ यच्च घासिं॥१॥ जघास सर्वा ताते अपि देवेष्वस्तु
। मा त्वाग्निर्ध्वनयिद्धूमगंधिर्मोखा भ्राजंत्यभि विक्त जघ्रिः। इष्टं वी
तमभिगूर्तं वषट्कृतं तं देवासः प्रतिगृभ्णंत्यश्वं॥ यदश्वाय वा
स उपस्तृणंत्यधीवासं या हिरण्यान्यस्मै। संदानमर्वंतं पड्बीशं
प्रिया देवेष्वा यामयंति। यत्ते सादे महसा शूकृतस्य पार्ष्णिया वा कशया॥२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वा तुतोद। स्रुचेव ता हविषो अध्वरेषु सर्वा ता ते ब्रह्मणा सूदयामि॥
५८ चतुस्त्रिंशद्वाजिनो देवबन्धोर्वंक्रीरश्वस्य स्वधितिः समेति। अच्छि
द्रा गात्रा वयुना कृणोत परुष्परुरनुघुष्या विशस्त। एकस्त्वष्टुरश्वस्या
विशस्ता द्वा यन्तारा भवतस्तथ ऋतुः॥ या ते गात्राणामृतुथा कृणोमि ताता
पिंडानां प्र जुहोम्यग्नौ॥ मा त्वा तपत्॥३॥ प्रिय आत्मापियन्तं मा स्वधिति
स्तन्व आ तिष्ठिपत्ते। मा ते गृध्नुरविशस्तातिहाय छिद्रा गात्राण्यसि
ना मिथू कः। न वा उ एतन्म्रियसे न रिष्यसि देवाँ इदेषि पथिभिः सुगे
भिः। हरी ते युंजा पृषती अभूतामुपास्थाद्वाजी धुरि रासभस्य। सुग
अं

व्यंनो वाजी स्वश्व्यं पुंसः पुत्राँ उत विश्वापुषं रयिं। अना
गास्त्वं नो अदितिः कृणोतु क्षत्रं नो अश्वो वनतां हविष्मान्॥
॥४॥ घासिं कृशायातपद्वयिं नवच॥९॥ अश्मन्यदूमो देनमा
भूशिशानः प्राचीं जीमुतस्य यदक्रंदो मा नो मित्रो पेवाजिनं न
व॥ अश्मन्मनो पुजं प्राचीमनु शर्म यच्छंतु तेषाम मिग्हतिः
षट्चत्वारिंशात्॥४६॥६॥ ॥ ॥
हरिः ॐ म्॥ श्री रुद्रार्पणमस्तु॥ अग्नाविष्णू सजोषसेमा वर्धंतु वां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं॰च॰ गिरः। घृमे वाजेभिरागतं। वाजश्च मे प्रसवश्च मे प्रयतिश्च मे प्रसितिश्च
मे धीतिश्च मे क्रतुश्च मे स्वरश्च मे श्लोकश्च मे श्रावश्च मे श्रुतिश्च मे
६५ ज्योतिश्च मे सुवश्च मे प्राणश्च मे ऽपानः॥१॥ च मे व्यानश्च मे ऽसुश्च मे चित्तं
च म आधीतं च मे वाक् च मे मनश्च मे चक्षुश्च मे श्रोत्रं च मे दक्षश्च मे ब
लं च म ओजश्च मे सहश्च म आयुश्च मे जरा च म आत्मा च मे तनूश्च
मे शर्म च मे वर्म च मे ऽङ्गानि च मे ऽस्थानि च मे परूꣳषि च मे शरीराणि च
दे॰त्रा मे॥२॥ अपानस्तनूश्च मे ऽसौ च॥१॥ ज्यैष्ठ्यं च म आधिपत्यं च मे मन्यु ६५
श्च मे भामश्च मे ऽमश्च मे जेमा च मे महिमा च मे वरिमा च मे प्रथिमा च
मे वर्ष्मा च मे द्राघुया च मे वृद्धं च मे वृद्धिश्च मे सत्यं च मे श्रद्धा च
श्च मे म

वा के
नीराः श्च मे॥२॥ विभुश्च मे सुराश्च तुर्दश च॥४॥ अश्मा च मे मृत्ति
का च मे गिरयश्च मे पर्वताश्च मे सिताश्च मे वनस्पतयश्च मे हि
रण्यं च मे यश्च मे सीसं च मे त्रपुश्च मे श्यामं च मे लोहं च मे ऽग्निश्च
म आपश्च मे वीरुधश्च म ओषधयश्च मे कृष्टपच्यं च मे ऽकृष्टपच्यं
मे च ग्राम्याश्च मे पशव आरण्याश्च यज्ञेन कल्पन्तां वित्तं च मे वि
त्तिश्च मे भूतं च मे भूतिश्च मे वसु च मे वसतिश्च मे कर्म च मे शक्ति
श्च मेऽर्थश्च म एमश्च म इतिश्च मे गतिश्च मे॥१॥ कृष्टपच्यं चाष्टा
चत्वारिꣳशच्च॥५॥ अग्निश्च म इन्द्रश्च मे सोमश्च म इन्द्रश्च मे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०च०
६६

सविता च म इन्द्रश्च मे सरस्वती च म इन्द्रश्च मे पूषा च म इन्द्रश्च मे बृहस्प
तिश्च म इन्द्रश्च मे मित्रश्च म इन्द्रश्च मे वरुणश्च म इन्द्रश्च मे त्वष्टा च ॥ १ ॥
म इन्द्रश्च मे धाता च म इन्द्रश्च मे विष्णुश्च म इन्द्रश्च मे श्विनौ च म इन्द्रश्च
मे मरुतश्च म इन्द्रश्च मे विश्वे च मे देवा इन्द्रश्च मे पृथिवी च म इन्द्रश्च मे
न्तरिक्षं च म इन्द्रश्च मे द्यौश्च म इन्द्रश्च मे दिशश्च म इन्द्रश्च मे मूर्धा
च म इन्द्रश्च मे प्रजापतिश्च म इन्द्रश्च मे ॥ २ ॥ त्रिंशच्च यो श्च म ६६
एकविंꣳशतिश्च ॥ ६ ॥ अꣳशुश्च मे रश्मिश्च मे दाभ्यश्च मे धि
पतिश्च म उपाꣳशुश्च मे न्तर्यामश्च म ऐन्द्रवायवश्च मे मैत्रावरुण

श्च म आश्विनश्च मे प्रतिप्रस्थानश्च मे शुक्रश्च मे मंथी च म आ
ग्रयणश्च मे वैश्वदेवश्च मे ध्रुवश्च मे वैश्वानरश्च म ऋतुग्रहाश्च
॥ १ ॥ मे तिग्राह्याश्च म ऐन्द्राग्नश्च मे वैश्वदेवश्च मे मरुत्वतीयाश्च म
मआदित्यश्च मे माहेन्द्रश्च मे सावित्रश्च मे सारस्वतश्च मे पौष्णश्च मे पात्नीव
तश्च मे हारियोजनश्च मे ॥ २ ॥ त्रैतु ग्राहाश्च चतुस्त्रिꣳशश्च ॥
७ ॥ इध्मश्च मे बर्हिश्च मे वेदिश्च मे धिष्णियाश्च मे स्रुचश्च मे च
मसाश्च मे ग्रावाणश्च मे स्वरवश्च म उपरवाश्च मे धिषवणे च
मे द्रोणकलशश्च मे वायव्यानि च मे पूतभृच्च म आधवनि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०५०

६७ यश्चम आग्नीध्रंच मे हविर्धानंच मे गृहाश्च मे सदश्च मे पुरोडा
शाश्च मे पचताश्च मे वभृतश्च मे स्वगाकारश्च मे ॥१॥ गृहाश्च
षोडश च ॥८॥ अग्निश्च मे घर्मश्च मे र्कश्च मे सूर्यश्च मे प्राणश्च
मेश्वमेधश्च मे पृथिवी च मेदितिश्च मे दितिश्च मे द्यौश्च मे शक्व
रीरंगुलयो दिशश्च मे यज्ञेन कल्पंतामृक्च मे साम च मे स्तोम
च मे यजुश्च मे दीक्षा च मे तपश्च म ऋतुश्च मे व्रतं च मे होरात्रयो ६७
र्वृष्ट्या बृहद्रथंतरे च मे यज्ञेन कल्पेतां ॥१॥ दीक्षाष्टादश च ॥
९॥ गर्भाश्च मे वत्साश्च मे त्र्यविश्च मे त्र्यवीच मे दित्यवाट् च मे दि

त्यौहि च मे पंचाविश्च मे पंचावी च मे त्रिवत्सश्च मे त्रिवत्सा च मे तुर्यवाट्
मे तुर्यौही च मे पष्ठवाट् मे पष्ठौहि च म उक्षा च मे वशा च मे ऋषभश्च ॥१॥
मे वेहच्च मे नड्वा च मे धेनुश्च म आयुर्यज्ञेन कल्पतां प्राणो यज्ञेन क
ल्पतामपानो यज्ञेन कल्पतां व्यानो यज्ञेन कल्पतां चक्षुर्यज्ञे
न कल्प॰ल्पतां श्रोत्रं यज्ञेन कल्पतां मनो यज्ञेन कल्पतां वाग्य
ज्ञेन कल्पतामात्मा यज्ञेन कल्पतां यज्ञो यज्ञेन कल्पतां ॥२॥ ऋ
षभश्चत्वारिंशच्च ॥१०॥ एका च मे तिस्रश्च मे पंच च मे सप्त च मे
नव च म एकादश च मे त्रयोदश च मे पंचदश च मे सप्तदश च मे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं॰च॰

६८ नवदशश्च मे एकविꣳशतिश्च मे त्रयोविꣳशतिश्च मे पंचविꣳशतिश्च
मे सप्तविꣳशतिश्च मे नवविꣳशतिश्च म एकत्रिꣳशच्च मे त्रयस्त्रिꣳ
शच्च ॥१॥ मे चतस्रश्च मेष्टौ च मे द्वादश च मे षोडश च मे विꣳशतिश्च
मे चतुर्विꣳशतिश्च मेष्टाविꣳशतिश्च मे द्वात्रिꣳशच्च मे षट्त्रिꣳशच्च ६८
मे चत्वारिꣳशच्च मे चतुश्चत्वारिꣳशच्च मेष्टाचत्वारिꣳशच्च मे वाज
श्च प्रसवश्चापिजश्च क्रतुश्च स्वश्च मूर्द्धा च व्यश्नियश्चांत्याय
नश्चांत्यश्च भौवनश्च भुवनश्चाधिपतिश्च ॥२॥ त्रयस्त्रिꣳशच्च
व्यश्नियएकादश च ॥११॥ वाजो नः सप्तप्रदिशश्चतस्रो वा प

रावतः। वाजो नो विश्वैर्देवैर्द्धनसाताविहावतु। विश्वे अद्य मरुतो विश्वऊती
विश्वे भवंत्वग्नयः समिद्धाः। विश्वे नो देवा अवसागमंतु विश्वमस्तु
द्रविणं वाजो अस्मे। वाजस्य प्रसवं देवा रथैर्याता हिरण्ययैः। अ
ग्निरिंद्रो बृहस्पतिर्मरुतः सोमपीतये। वाजे वाजेवत वाजिनो नो
धनेषु ॥१॥ विप्रा अमृता ऋतज्ञाः। अस्य मध्वः पिबत मादयध्वं
तृप्ता यात पथिभिर्देवयानैः। वाजः पुरस्तादुत मध्यतो नो वाजो
देवाꣳ ऋतुभिः कल्पयाति॥ वाजस्य प्रसवो ननमीति विश्वा आशा
वाजपतिर्भवेयं। पयः पृथिव्यां पय ओषधीषु पयो दिव्यंत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०च०

६९

रिक्षेपयोधां।पयस्वतीः प्रदिशः संतुमह्यं।संम्मास्र जामिपयसाप्य
तेनसंमास्र जाम्याप्रः॥२॥ओषधीभिः।सोहंवाजं सनेयमग्ने।
नक्तोषासासमनसाविरूपेधापयेतेशिशुमेकं समीची।द्यावा
क्षामारुक्मो अंतर्विभातिदेवाअग्निंरयंद्रविणोदाः।समुद्रोसिन
भस्वानार्द्रदानुःशंभूर्मयोभूरभिमावाहिस्वाहामारुतोसिमरुतां
गणःशंभूर्मयोभूरभिमावाहिस्वाहावस्युरसिदुवस्वान्छंभूर्मयो ६९
भूरभिमावाहिस्वाहा॥३॥घनेषुपोदुवस्वान्छंभूर्मयोभूरभिमाद्
चे॥१२॥अग्नियुनज्मिशवसाघृतेनदिव्यं सुपर्णंवयसावृहंतं।
तेनपतंवयमब्रध्नस्यविष्टपं सुवोरुहाणाअधिनाकउत्तमेद्

तेवृपंपतं

मौतेपक्षावजरौपतत्रिणौयाभ्यां रक्षां स्यपहं स्यग्ने।ताभ्यांपतेमसु
सुकृतामुलोकंयत्रऋषयःप्रथमजायेपुराणाः।चिदसिसमुद्रयोनिरिं
दुर्दक्षःश्येनऋतावा।हिरण्यपक्षःशकुनोभुरण्युर्महान्त्सधस्थेध्रुवः।
॥१॥आनिषत्तः।नमस्तेअस्तुमामाहिंसीर्विश्वस्यमूर्धन्नधितिष्ठ
सिश्रितः।समुद्रेतेहृदयमंतरायुर्द्यावापृथिवीभुवनेष्वर्पिते।उद्नोद्
दत्तोदधिंभिंतदिवःपर्जन्यादंतरिक्षात्पृथिव्यास्ततोनोवृष्यावत।दिवो तौ
मूर्द्धासिपृथिव्यानाभिरुर्गपामोषधीनां।विश्वायुःशर्मसप्रथानम
स्पथेयेनर्षयस्तपसासत्रं॥२॥आसतेंधानाअग्निंसुवराभरंतः।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०च०
६०

तस्मिन्नहं निदधे नाके अग्निमेतं यमाहुर्मनवस्तीर्णबर्हिषं। तं पत्नीभि
रनुगछेम देवाः पुत्रैर्भ्रातृभिरुत वा हिरण्यैः। नाकं गृह्णानाः सुकृतस्य
लोके तृतीये पृष्ठे अधिरोचने दिवः। आवाचो मध्यमरुहद्भुरण्युरय
मग्निः सत्पतिश्चेकितानः। पृष्ठे पृथिव्या निहितो दविद्युतदधस्पदं
कृणुतां॥३॥ ये पृतन्यवः। अयमग्निर्वीरतमो वयोधाः सहस्रियो दी ६०
प्यतामप्रयुछन्। विभ्राजमानः सरिरस्य मध्य उप प्रयात दिव्यानि धा
म। संप्रच्यवध्वमनु संप्रयाताग्ने पथो देवयानान् कृणुध्वं। अस्मिन्स न
धस्थे अध्युत्तरस्मिन्विश्वेदेवा यजमानश्च सीदत। येना सहस्रं
वहसि येनाग्ने सर्ववेदसं। तेनेमं यज्ञं नो वह देवयानो यः॥४॥ उत्त

मः। उद्बुध्यस्वाग्ने प्रति जागृहि त्वमिष्टापूर्ते संसृजेथामयं च। पुनः कृ
ण्वंस्त्वा पितरं युवानमन्वातांसीत्त्वयि तन्तुमेतं। अयं ते योनिर्ऋत्वि
यो यतो जातो अरोचथाः। तं जानन्नग्न आरोहाथा नो वर्धया रयिं।
॥५॥ ध्रुवः सत्रं कृणुते यः सहस्रत्रिंशच्च॥१३॥ ममाग्ने वर्चो विहवेष्व
स्तु वयं त्वेन्धानास्तनुवं पुषेम। मह्यं नमन्तां प्रदिशश्चतस्रः त्वया
ध्यक्षेण पृतना जयेम। मम देवा विहवे सन्तु सर्व इन्द्रावन्तो मरुतो विष्णुर
ग्निः। ममान्तरिक्षमुरुगोपमस्तु मह्यं वातः पवतां कामे अस्मिन्॥
मयि देवा द्रविणमायजन्तां मय्याशीरस्तु मयि देवहूतिः। दैव्या होतारा वनि
षंता॥१॥ पूर्वेरिष्टाः स्याम तनुवा सुवीराः॥ मह्यं यजन्तु मम यानि हव्याकूतिः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं॰ प॰

सस्यामन सोमेः अस्तु ॥ एनो मा निगां कतमच्चनाहं विश्वे देवासो अधिवोचता
७१ मे ॥ देवीः षडुर्वीरुरुणः कृणोत विश्वे देवास इह वीरयध्वं । माहास्महि
प्रजया मा तनूभिर्मा रधाम द्विषते सोम राजन् ॥ अग्निर्मन्युं प्रति
॥ २ ॥ नुदन्पुरस्तादद्ब्धो गोपाः परिपाहि नस्त्वं । प्रत्यंचो यंतु निगु
तः पुनस्तेमैषां चित्तं प्रबुधां विनेशत् । धाता धातृणां भुवनस्य यस्प
तिर्देवं सवितारमभिमातिषाहं । इमं यज्ञमश्विनोभा बृहस्पति
र्देवाः पांतु यजमानं न्यर्थात् । उरुव्यचा नो महिषः शर्म यंसदस्मि ७१
न्हवे पुरुहूतः पुरुक्षुः । स नः प्रजायै हर्यश्व मृडयेंद्र मा ॥ ३ ॥ नो रिरि

सं॰ व॰

वृत्रघ्नः स्तोमा उपमामुपागुः ॥ यो दाशुषः सुकृतो हवमुपगंता ॥ १ ॥
७२ स नो मुंचत्वंहसः । यः संग्रामं नयति सं वशी युधे यः पुष्टानि संसृ
जति त्रयाणि ॥ स्तौमीन्द्रं नाथितो जोहवीमि स नो मुंचत्वंहसः
। मन्वे वां मित्रावरुणा तस्य वित्तं सत्यौजसा दृंहणा यं नुदेथे । या
राजानं सरथं याथ उग्रा तौ नो मुंचतमागसः । यो वां रथ ऋजुर
श्मिः सत्यधर्मा मिथुश्चरंतमुपयाति दूषयन् । स्तौमि ॥ २ ॥ मित्रावरु ७२
णा नाथितो जोहवीमि तौ नो मुंचतमागसः । वायोः सवितुर्विदथा
नि मन्महे यावात्मन्वद्बिभृतो यौ च रक्षतः । यौ विश्वस्य परिभू बभूव

२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०च० षामापरादः॥ येन: सपत्ना अपते भवंतिंद्राग्निभ्यामवबाधामहे तां
७२ न्॥ वसवो रुद्रा आदित्या उपरिस्पृशं मोग्रं चेत्तारमधिराजमक्रन्॥ अर्वांच
मिंद्रममुतो हवामहे यो गोजिद्धनजिदश्वजिद्यः॥ इमं नो यज्ञं विहवे जु
षस्वास्य कुर्मो हरिवो मेदिनं त्वा॥ ७॥ वनिषंत पुरस्तान्मा त्रिच॥ त्वारिंद्र
त्र॥ १८॥ अग्नेर्मन्वे प्रथमस्य प्रचेतसो यं पांचजन्यं बहवः समिंधते॥
विश्वस्यां विशि प्रविविशिवांसमीमहे स नो मुंचत्वंहसः॥ यस्येदं प्रा ७२
मि णनिमिषद्यदेजति यस्य जातं जनमानं च केवलं॥ स्तौम्यग्निं नाथितो जो
हवीमि स नो मुंचत्वंहसः॥ इंद्रस्य मन्वे प्रथमस्य प्रचेतसो यं पांचज
न्यं बहवः समिंधते॥ यासजानं सरस्पं यो धश्व्यानानो मुंचतमा

पयो:।

तु स्तौ नो मुंचतमागस॥ उप श्रेष्ठा न आशिषो देवयोः धर्मे अस्थिरन्।
स्तौमि वायुं सवितारं नाथितो जोहवीमि तौ नो मुंचतमागसः॥ र
थीतमौ रथीनामह्व ऊतये शुभं गमिष्ठौ सुयमेभिरश्वैः॥ ३॥ यौ देवौ २
देवेष्वधि निशितमौज स्तौ नो मुंचतमागसः॥ यद्यातं वहतुं सू
र्या या स्त्रिचक्रेण संसदमिच्छमानौ। स्तौमि देवावश्विनौ नाथि
तो जोहवीमि तौ नो मुंचतमागसः॥ मरुतां मन्वे अधि नो ब्रुवंतु प्रेमा
वाचं विश्वामवंतु विश्वे। आशून् हुवे सुयमानूतये ते नो मुंचंत्वेनसः
॥ तिग्ममायुधं वीडितं सहस्वद्दिव्यं शर्धः॥ ५॥ पृतनासु जिष्णु॥ सो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं॰ च मिद्वान्सन्तो नाथितो जोहवीमि ते नो मुंचंत्वेनसः। देवानामन्वेअ
७३ श्विना श्रुवंतु प्रेमा या चं विश्वाम वंतु विश्वे। आश्रू कुवरू यमा ह
तयेतेनो मुंचंत्वेनसः। यदिदं माभि शोचति पौरुषेयण दैव्येन।
स्तोमि विश्वान्देवान्नाथितो जोहवीमि ते नो मुंचंत्वेनसः। अनु
नोद्यानुमतिरनु॥५॥ इदनुमते त्वं वैश्वानरो नऊत्यापृष्टो दिवि
अ यैश्रयेनाममितेभिरोजोभिर्ये प्रतिष्ठे अभवतां वसूनां। स्तोमि
द्यावापृथिवी नाथितो जोहवीमि ते नो मुंचतमंहसः। उर्वीरो
दसी वरिवः कृणोतं क्षेत्रस्यपत्नी अधिनो ब्रूयातां स्तोमि द्या

वापृथिवी नाथितो जोहवीमि ते नो मुंचतमंहसः। यत्ते वयं पु
रुषत्रा यविष्ठा विद्वांसश्चकृमा कच्चनागः॥६॥ आगः। कृधीस्व
स्माँ अदितेरनागान्व्येनांसि शिश्रथो विष्वगग्ने। यथा ह तद्व
सवो गौर्यं चित्पदि षितामसुंचता यजत्राः। एवा त्वमस्मस्मुंचा
व्यंहः प्रातार्यग्ने प्रतरां न आयुः॥७॥ गंतादूषयुस्तोमिययोः
शट्ठो नुमतिरनुमं चनच तुस्त्रिंशच्च॥१५॥ अग्ने मन्वे यस्ये
दमिंद्रस्यू यः संग्रामं सनो मुंचत्वंहसः। मन्वे वां तां मंदेवा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०च० नां यदिदं मातेनोमुंचंत्वेनसः॥ अनुउर्वीयत्तेनोमुंचतमंहसः॥
७७ अग्नाविष्णू ज्यैष्ठं श्रैचोक्ष्णी ममाचाग्निश्चाः सुश्चिपश्चा
ग्निश्चगर्भाश्चैकाचवाजो नोग्नियुनज्मि ममाग्नेम्ने मेन्वेपं
षदश॥ १५॥ अग्नाविष्णू अग्निश्चवाजोनो अव्धोगोपाएका
चत्वारिंशत्॥ ३९॥ हरिः ओम्॥ इति तैत्तिरीय शाखा
यां चतुर्थाष्टकसमाप्तः॥ इतिनारायणभट अभयंकर ७८
लिख्यते॥ श्रीरा जान। नार्पणमस्तु॥ शुभं भवतु॥ ॥ छ

अथपंचमाष्टकेप्रारंभः॥ छ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पं॰सं॰

॥१॥ श्रीगणेशाय नमः ॥ ॐ स्तुषेनराद्दिवोअस्यप्रसंताश्विना
हुवेजरमाणोअर्कैः ॥ यासद्यउस्राव्युषिज्मोअंतान्युयूषतः
पर्युरूवरांसि ॥ तायज्ञमाशुचिभिःश्चक्रमाणारथस्यभा
नुंरुरुचूरजोभिः ॥ पुरूवरांस्यमितामिमानापोधन्वान्य
तियाथोअज्रान् ॥ ताहत्यद्वर्तिर्यदरध्रमुग्रेत्थाधियऊ
हथुःशश्वदश्वैः ॥ मनोजवेभिरिषिरैःशयध्यैपरिव्यथि
र्दाशुषोमर्त्यस्य ॥ तानव्यसोजरमाणस्यमन्मोपभूष
तोयुयुजानसप्ती ॥ शुभंपृक्षमिषमूर्जंवहंताहोतायक्ष ॥१॥

त्प्रत्नोअध्रुग्युवाना ॥ तावल्गूदस्रापुरुशाकतमाप्रत्नान
व्यसावचसाविवासे ॥ याशंसंतेस्तुवतेशंभविष्ठाबभू
वतुर्गृणतेचित्रराती ॥१॥ ताभुज्युंविभिरद्भ्यःसमुद्रात्तु
ग्रस्यसूनुमूहथूरजोभिः ॥ अरेणुभिर्योजनेभिर्भुजंतापत
त्रिभिरर्णसोनिरुपस्थात् ॥ विजयुषारथ्यायातमद्रिं
श्रुतंहवंवृषणावध्रिमत्याः ॥ दशस्यंताशयवेपिप्यथु
र्गामितिच्यवानासुमतिंभूरण्यू ॥ यद्रोदसीप्रदिवोअस्ति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पं० सं०

॥२॥ भूमा हि क्षो देवानामुत मर्त्यत्रा ॥ तदादित्या वसवो रुद्रियासोर
क्षोयुजेतपुरघं दधात ॥ यदीं राजानामृतुथा विदधद्रजसो मि
त्रो वरुणश्चिकेतत् ॥ गंभीराय रक्षसे हेतिमस्य द्रोघाय चि
द्वचस आनवाय ॥ अंतैरैश्चक्रे स्तनयाय वर्त्तिर्द्युमता यातं
नृवता रथेन ॥ सनुत्येन त्यजसा मर्त्यस्य वनुष्यतामपिशी
र्षा ववृक्तं ॥ आ परमाभिरुत मध्यमाभिर्नियुद्भिर्यातमव
माभिरर्वाक् ॥ दृळ्हस्य चिद्गोमतो वि व्रजस्य दुरो वर्तं गृ
णते चित्रराती ॥ २ ॥ क्व१ त्या वल्गू पुरुहूताद्य दूतो न स्तो ॥२॥

मो विदन्नमस्वान् ॥ आ यो अर्वाङ् नासत्या ववर्त्त प्रेष्ठा ह्यस
थो अस्य मन्मन् ॥ अरं मे गंतं हवनायास्मै गृणाना यथा पि
बाथो अंधः ॥ परि ह त्यद्वर्तिर्याथो रिषो न यत्परो नांतर
स्तुतुर्यात् ॥ अकारि वामंधसो वरीमन्नस्तारि बर्हिः सु
प्रायणतमं ॥ उत्तानहस्तो युवयुर्ववंदा वां नक्षंतो अद्र
य आंजन् ॥ ऊर्ध्वो वामग्निरध्वरेष्वस्थात्प्र रातिरेति जू
र्णिनी घृताची ॥ प्र होता गूर्तमना उराणो युक्त यो ना
सत्या हवीमन् ॥ अधि श्रिये दुहिता सूर्यस्य रथं तस्थौ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पं०स०

॥३॥

पुरुभुजाञ्चातोति॥प्रमायाभिर्मायिनाभूतमत्रनरानृतूजनि
मन्यज्ञियानां॥३॥युवंश्रीभिर्दर्श्शताभिराभिः शुभेपुष्टिमू
हथुःसूर्यायाः॥प्रवांवयोवपुषेनुपप्तंनक्षद्वाणीसुष्टुता
धिष्ण्यावां॥आवांवयोश्वासोवहिष्ठाअभिप्रयोनासत्या
वहंतु॥प्रवांरथोमनोजवाअसर्जिइषःपृक्षइषिधोअनु
पूर्वीः॥पुरुहिवांपुरुभुजादेष्णंधेनुन्नइषंपिन्वतमसक्रां॥
स्तुतश्ववांमाध्वीसुष्टुतिश्चरसाश्वयेवामनुरातिमग्म
न्॥उतमऋज्रेपुरयस्यरघ्वीसुमी ळ्हेशतंपेरुकेच ॥३॥

पक्वा॥शांडोदाद्धिरणिनःस्मद्दिष्टीदशवध्वासोअभिषाचऋ
ष्वान्॥संवांशतानासत्यासहस्राश्वानांपुरुपंथागिरेदा
त्॥भरद्वाजायवीरनूगिरेदाद्धतारक्षांसिपुरुदंससास्युः॥
आवांसुम्नेवरिमन्सूरिभिष्यां॥४॥उदुश्रियउषसोरोचमा
ना अस्थुरपान्नोर्मयोरुशंतः॥कृणोतिविश्वासुपथासुगा
न्यभूदुवस्वीदक्षिणामघोनी॥भद्राददृक्षउर्वियाविभा
स्युत्तेशोचिर्भानवोद्यामपप्तन्॥आविर्वक्षःकृणुषेशुंभ
मानोषोदेविरोचमानामहोभिः॥वहंतिसीमरुणासोरुशंतो
गावःसुभगामुर्वियाप्रथानां॥अपेजतेशूरोअस्तेवशत्रून्बा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पं० सं०

॥ध॥ धृतेनमो अङ्गिरो नवोऽह्ना॥ सुगोततेसुपथापर्वतेष्ववातेअप
स्तरसिस्वभानो॥ सानआवहपृथुयामन्नृष्वेरयिंदिवोदु
हितरिषयध्यै॥ सावहयोक्षभिरवातोषोवरंवहसिजोष
मनु॥ त्वंदिवोदुहितर्याहदेवीपूर्वहूतौमंहनादर्शताभूः॥
उत्तेवयश्चिद्वसतेरपप्तन्नरश्चयेपितुभाजोव्युष्टौ॥ अ
मासतेवहसिभूरिवाममुषोदेविदाशुषेमर्त्याय॥५॥ ए
षास्यानोदुहितादिवोजाःक्षितीरुच्छंतीमानुषीरजीगः॥
याभानुनारुशतारांम्यास्वज्ञायितिरस्तमसश्चिदक्तू ॥ध॥

न्॥ वितद्ययुररुणयुग्भिरश्वैश्चित्रंभांत्युषसश्चंद्ररथाः॥
अग्रंयज्ञस्यबृहतोनयंतीर्वितावाधंतेतमऊर्म्यायाः॥ श्रवो
वाजमिषमूर्जंवहंतीर्निदाशुषउषसोमर्त्याय॥ मघोनीर्वी
रवत्पत्यमानअवोधातविधतेरत्नमद्य॥ इदाहिवोविध
तेरत्नमस्तीदावीरायदाशुषउषासः॥ इदाविप्रायजरते
यदुक्थानिष्ममावतेवह[stain]पुराचित्॥ इदाहितउषोअद्रि था
सानोगोत्रागवामंगिरसोगृणंति॥ व्यर्केणबिभिदुर्ब्र
ह्मणाचसत्यानृणामभवद्देवहूतिः॥ उच्छादिवोदुहितःप्र
त्नवन्नोभरद्वाजवद्विधतेमघोनि॥ सुवीरंरयिंगृणतेरि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पं० सं०

॥५॥ री ह्युरुगायमधि धेहि श्रवो नः॥६॥ वपुर्नु तच्चिकितुषे चिदस्तु
समानं धेनु पत्यमाने॥ मर्तेष्वन्यद्दोहसे पीपाय सकृच्छुक्रं दुदुहे नाम
पृश्निरूधः॥ ये अग्नयो न शोशुचन्निधाना द्विर्यत्त्रिर्मरुतो वा
वृधंत॥ अरेणवो हिरण्ययास एषां साकं नृम्णैः पौंस्येभिश्च
भूवन्॥ रुद्रस्य ये मीळ्हुषः संति पुत्रा यांश्चो नु दाधृविर्भ
रध्यै॥ विदे हि माता महो मही षा सेत्पृश्निः सुभ्वे गर्भमाधा
त्॥ न य ईषंते जनुषोया न्वं१तः संतो वद्यानि पुनानाः॥ निर्य
द्दुह्रे शुचयो नु जोषमनु श्रिया तन्वमुक्षमाणाः॥ मक्षू न ॥५॥

येषु दोहसे चिदया आ नाम धृष्णु मारुतं दधानाः॥ न ये स्तौ
ना अयासो मह्ना नू चित्सुदानुरव यासदुग्रान्॥५॥
त इदुग्राः शवसा धृष्णुषेणा उभे युजंत रोदसी सुमेके॥ अ
ध स्मैषु रोदसी स्वशोचिरामवत्सु तस्थौ न रोकः॥
अनेनो वो मरुतो यामो अस्त्वनश्वश्चिद्यमजत्यरथीः॥ अन श्व
वसो अनभीशू रजस्तूर्वि रोदसी पथ्या याति साधन्॥
नास्य वर्ता न तरुता न्वस्ति मरुतो यमवथ वाजसातौ।
तोके वा गोषु तनये यमप्सु स व्रजं दर्ता पार्ये अध द्योः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पं०सं०

॥६॥ प्रचित्रमर्कं गृणते तुराय मारुताय स्वतवसे भरध्वं॥ येसहां
सिसहसासहंते रेजंत अग्ने पृथिवी मुखेभ्यः॥ त्विषीमंतो अ
ध्वरस्येव दिद्युत्तृषुच्यवसो जुह्वोरू नाग्नेः॥ अर्चत्रयो धुन
योनवीरा भ्राजज्जन्मानो मरुतो अधृष्टाः॥ तं वृधंतं मारु
तं भ्राजदृष्टिं रुद्रस्य सूनुं हवसा विवासे॥ दिवः शर्द्धाय शु
चयो मनीषा गिरयो नाप उग्रा अस्पृध्रन्॥८॥ विश्वेषां
वः सतां ज्येष्ठतमा गीर्भिर्मित्रावरुणा वावृधध्यै॥ संयार ॥६॥
श्मेव यमतुर्यमिष्ठा द्वा जनां असमा बाहुभिः स्वैः॥ इयं म

द्वां प्रस्तृणीते मनीषोप प्रिया नमसा बर्हिरछ॥ यंतं नो मित्रावरुणा
वधृष्टं छर्दिर्यद्वां वरूथ्यं सुदानू॥ आ यातं मित्रावरुणा सुशस्त्यु
प प्रिया नमसा हूयमाना॥ संयावप्नस्थो अपसेव जनांछ्रुधीय
तश्चिद्यतथो महित्वा॥ अश्वा न या वाजिना पूतबंधू ऋता यद्ग
र्भमदितिर्भरध्यै॥ प्र या महि महांता जायमाना घोरा मर्ताय रिप
मं वे निदीधः॥ विश्वे यद्वां मंहना मंदमानाः क्षत्रं देवासो अदधुः सजो
षाः॥ परि यद्भूथो रोदसी चिदुर्वी संति स्पशो अदब्धासो अमू
राः॥१॥ ता हि क्षत्रं धारयेथे अनु द्यून् दृंहेथे सानुमुपमादिव द्योः॥
दृळ्हो नक्षत्र उत विश्वदेवो भूमिमातां द्यां धासिनायोः॥ ता वि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं.पं.
॥१७॥

ग्नेधैय्येजठरेंपृणाध्याआयत्सींसबंधवःपृणंति॥नमृष्यंतेयुवतयो
वाताविय्यत्पयोविश्वजिन्वाभरंते॥ताजिह्वयासदमेदंसुमेधाआ
यद्वांसत्योअरतिर्ऋतेभूत्॥तद्वांमहित्वंघृतान्नावस्तुयुवंदा
शुषेविचयिष्टमंहः॥प्रयद्वांमित्रावरुणास्पूर्धन्प्रियाधाम
युवधितामिनंति॥नयेदेवासओहसानमर्त्ताअयज्ञसाचो
अप्योनपुत्राः॥वियद्वाचंकीस्तासोभरंतेशंसंतिकेचिं
निविदोमनाः॥आद्वांब्रवामसत्यान्युक्थानकिर्देवे ॥१७॥
भिर्यतथोमहित्वा॥अवोरित्थावांछर्दिषोअ

भिष्टौयुवोर्मित्रावरुणावस्कृधोयु॥अनुयद्गावस्फुरानृजिप्यं
धृष्णुंयद्रणेवृषणंयुनजन्॥१०॥श्रुष्टीवांयज्ञउद्यतःसजो
षामनुष्वद्वृक्तबर्हिषोयजध्यै॥आयइंद्रावरुणाविषेअद्यम
हेसुम्नायमहआववर्तत्॥ताहिश्रेष्ठादेवताताऽतुजाशूराणां
शविष्ठाताहिभूतं॥मघोनांमंहिष्ठातुविशुष्मऋतेनवृत्रतुरासर्व
सेना॥तागृणीहिनमस्येभिःशूषैःसुम्नेभिरिंद्रावरुणाचका
ना॥वज्रेणान्यःशवसाहंतिवृत्रंसिषक्त्यन्योवृजनेषुविप्रः॥ग्ना
श्चयन्नरश्चवावृधंतविश्वेदेवासोनरांस्वगूर्ताः॥प्रैभ्यइंद्रा
वरुणामहित्वाद्यौश्चपृथिवीभूतमुर्वी॥सइत्सुदानुःस्ववांऋ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पं०सं०

॥८॥

तावेंद्रायोवांवरुणदाशतित्मन्॥इषासद्विषस्तरेद्दास्वान्वंस
द्रयिंरयिवतश्चजनान्॥१६॥यंयुवंदाश्वध्वरायदेवारयिंधत्थो
वसुमंतंपुरुक्षुं॥अस्मेसइंद्रावरुणावपिष्यात्प्रयोभनक्तिव
नुषामशस्तीः॥उतनःसुत्रात्रोदेवगोपाःसूरिभ्यइंद्रावरुणा
रयिष्यात्॥येषांशुष्मःपृतनासुसाह्वान्नग्निष्टवेदमआजा
तवेदाः॥प्रसद्योद्युम्नातिरतेततुरिः॥नूनइंद्रावरुणागृणा
नापृङ्क्तंरयिंसौश्रवसायदेवा॥इत्थागृणंतोमहिनस्यशर्धो
पोननावादुरितातरेम॥प्रसंम्राजेबृहतेमन्मनुप्रियमर्च
रम॥ देवायवरुणायसप्रथः॥अयंयउर्वीमहिनामहिव्रतःक्र ॥८॥

त्वाविभात्यजरोनशोचिषा॥इंद्रावरुणासुतपाविमंसुतंसोमंपि
बतंमद्यंधृतव्रता॥युवोरथोअध्वरंदेववीतयेप्रतिस्वसरमुप
यातिपीतये॥इंद्रावरुणामधुमत्तमस्यवृष्णःसोमस्यवृषणा
वृषेथां॥इदंवामंधःपरिषिक्तमस्मेआसद्यास्मिन्बर्हिषिमा
दयेथां॥१७॥संवांकर्मणासमिषाहिनोमींद्राविष्णूअपस
स्पारेअस्य॥जुषेथांयज्ञंद्रविणंचधत्तमरिष्टैर्नःपथिभिः
पारयंता॥याविश्वासांजनितारामतीनामिंद्राविष्णूकलशा
सोमधाना॥प्रवांगिरःशस्यमानाअवंतुप्रस्तोमासोगीयमा
नासोअर्कैः॥इंद्राविष्णूमदपतीमदानामासोमंयातंद्रविणो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पं० सं०

॥१॥ दधाना॥ सं वां मंजंत्वक्तुभिर्मतीनां सं स्तोमासः शस्यमानास उक्थैः।
आ वाम श्वासो अभिमातिषाह इंद्राविष्णू सधमादो वहंतु॥ जु
षेथां विश्वा हवना मतीनामुप ब्रह्माणि [illegible] शृणुतं गिरो मे॥ इं
द्राविष्णू तत्पनयाय्यं वां सो मस्य मद उरु चक्रमाथे॥ अकृणुत
मंतरिक्षं वरीयोप्रथतं जीवसे नो रजांसि॥ इंद्राविष्णू हविषा
वावृधानाग्राद्वाना नमसा रातहव्या॥ घृतासुती द्रविणं धत्त
मस्मे समुद्रस्थः कलशः सोमधानः॥ इंद्राविष्णू पिबतं मध्वो
अस्य सोमस्य दस्रा जठरं पृणेथां॥ आ वामंधांसि मदिरा
ण्यग्मंनुप ब्रह्मा[illegible]णि शृणुतं हवं मे॥ उभा जिग्यथुर्न परा ज ॥१॥

येथे न पराजिग्ये कतरश्चनैनोः॥ इंद्रश्च विष्णो यदपस्पृधेथां
त्रेधा सहस्रं वि तदैरयेथां॥ २३॥ घृतवती भुवनानामभिश्रियोर्वी
पृथ्वी म[illegible]दुघे सुपेशसा॥ द्यावापृथिवी वरुणस्य धर्मणा विष्क
३ भिते अजरे भूरिरेतसा॥ असश्चंती भूरि[illegible]धारे पयस्वती घृ
तं दुहाते सुकृते शुचिव्रते॥ राजंती अस्य भुवनस्य रोदसी अस्मे
च रेतः सिंतं यन्मनुर्हितं॥ यो वाम् ऋजवे क्रमणाय रोदसी [illegible]
मर्तो ददाश धिषणे [illegible] स साधति॥ प्र प्रजाभिर्जायते धर्मणस्प
रि युवोः सिक्ता विषुरूपाणि सव्रता॥ घृतेन द्यावापृथिवी
अभीवृते घृतश्रिया घृतपृचा घृतावृधा॥ उर्वी पृथ्वी होत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पं०सं०

॥१०॥ वूर्येपुरोहितेतेइद्विप्राईळतेसुम्नमिष्टये॥मधुनोद्यावापृथि
वीमिमिक्षतांमधुश्चुतामधुदुघेमधुव्रते॥दधानेयज्ञंद्रविणं
चदेवतामहिश्रवोवाजमस्मेसुवीर्यं॥ऊर्जन्नोद्यौश्चपृथि
वीचपिन्वतांपितामाताविश्वविदासुदंससा॥संरराणेरोद
सीविश्वशंभुवासनिंवाजंरयिमस्मेसमिन्वतां॥१४॥उदुष्य
देवःसविताहिरण्ययाबाहूअयंस्तसवनायसुक्रतुः॥घृते
नपाणीअभिप्रुष्णुतेमखोयुवासुदक्षोरजसोविधर्मणि॥
देवस्यवयंसवितुःसवीमनिश्रेष्ठेस्यामवसुनश्चदावने॥ १०
योविश्वस्यद्विपदोयश्चतुष्पदोनिवेशनेप्रसवेचासिभूमनः॥

अदब्धेभिःसवितःपायुभिष्ट्वंशिवेभिरद्यपरिपाहिनोगयं॥हि
रण्यजिह्वःसुवितायनव्यसेरक्षामाकिर्नोअघशंसईशत॥
उदुष्यदेवःसवितादमूनाहिरण्यपाणिःप्रतिदोषमस्थात्॥अ
योहनुर्यजतोमंद्रजिह्वआदाशुषेसुवतिभूरिवामं॥उदूअ
यांउपवक्तेवबाहूहिरण्ययासवितासुप्रतीका॥दिवोरोहां
स्यरुहत्पृथिव्याअरीरमत्पतयत्कच्चिदभ्वं॥वाममद्यसवि
तर्वाममुश्वोदिवेदिवेवाममस्मभ्यंसावीः॥वामस्यहिक्ष
यस्यदेवभूरेरयाधियावामभाजःस्याम॥१५॥इंद्रासोमा
महितद्वांमहित्वंयुवंमहानिप्रथमानिचक्रथुः॥युवंसूर्यंवि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पं०स०

विदथुर्युवंसूर्युवंस्व१विश्वानतमांस्यहतंनिदश्च॥इंद्रासोमावा
॥२२॥ सयथउषासमुत्सूर्यंनयथोज्योतिषासह॥उपद्यांस्कंभथुःस्कं
भनेनाप्रथतंपृथिवींमातरंवि॥इंद्रासोमावहिमपःपरिष्ठां
हथोवृत्रमनुवांद्यौरमन्यत॥प्रार्णांस्यैरयतंनदीनामासमुद्रा
णिपप्रथुःपुरूणि॥इंद्रासोमापक्वमामास्वंतर्निगवामिद्दधथु
र्वक्षणासु॥जगृभथुरनपिनद्धमासुरुशच्चित्रासुजगतीष्वं
धुं तः॥इंद्रासोमायुवमंगतरुत्रमपत्यसाचंश्रुत्यंरराथे॥यु जग
वंशुष्मंनर्यंचर्षणिभ्यःसंविव्यथुःपृतनाषाहमुग्रा॥२६॥यो
अद्रिभित्प्रथमजाऋतावाबृहस्पतिरांगिरसोहविष्मान्॥द्वि ॥२२॥

बर्हज्माप्राघर्मसत्पितानआरोदसीवृषभोरोरवीति॥जनायचि
द्यईवतउलोकंबृहस्पतिर्देवहूतौचकार॥घ्नन्वृत्राणिविपु
रोदर्दरीतिजयंछत्रूँरमित्रान्पृत्सुसाहन्॥बृहस्पतिःसम
जयद्वसूनिमहोव्रजान्गोमतोदेवएषः॥अपःसिषासन्स्व१
रप्रतीतोबृहस्पतिर्हंत्यमित्रमर्कैः॥२७॥सोमारुद्राधार
येथामसुर्यं१प्रवामिष्टयोरमश्नुवंतु॥दमेदमेसप्तरत्ना
त्रं दधानाशंनोभूतंद्विपदेचतुष्पदे॥सोमारुद्राविवृहतंवि
षूचीममीवायानोगयमाविवेश॥आरेबाधेथांनिर्ऋतिंपरा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पं० सं०

॥१२॥ चेरस्मे भद्रा सौश्रवसानि संतु ॥ सोमारुद्रा युवमेतान्यस्मे विश्वा
तनूषु भेषजानि धत्तं ॥ अवस्यतं मुंचतं यन्नो अस्ति तनूषु बद्धं कृ च२
तमेनो अस्मत् ॥ तिग्मायुधौ तिग्महेती सुशेवौ सोमारुद्राविह
सुमृळतं नः ॥ प्र नो मुंचतं वरुणस्य पाशाद्गोपायतं नः सुमनस्यमाना
॥१८॥ जीमूतस्येव भवति प्रतीकं यद्वर्मी याति समदामुपस्थे ।
अनाविद्धया तन्वा जय त्वं स त्वा वर्मणो महिमा पिपर्तु ॥ धन्व
ना गा धन्वनाजिं जयेम धन्वना तीव्राः समदो जयेम ॥ धनुः श
त्रोरपकामं कृणोति धन्वना सर्वाः प्रदिशो जयेम ॥ वक्ष्यंतीवे
दा गनीगंति कर्णं प्रियं सखायं परिषस्वजाना ॥ योषेव शिं १२

क्ते वितताधि धन्वंज्या इयं समने पारयंती ॥ ते आचरंती समनेव यो
षा मातेव पुत्रं बिभृतामुपस्थे ॥ अप शत्रून्विध्यतां संविदाने
आर्त्नी इमे विष्फुरंती अमित्रान् ॥ बह्वीनां पिता बहुरस्य पु
त्रश्चिश्चा कृणोति समनावगत्य ॥ इषुधिः संकाः पृतनाश्च
सर्वाः पृष्ठे निनद्धो जयति प्रसूतः ॥ १९ ॥ रथे तिष्ठन्नयति वाजिनः
पुरो यत्रयत्र कामयते सुषारथिः ॥ अभीशूनां महिमानं प
नायत मनः पश्चादनु यच्छंति रश्मयः ॥ तीव्रान्घोषान्कृण्वते वृ
षपाणयोश्वा रथेभिः सह वाजयंतः ॥ अवक्रामंतः प्रपदैरमि
त्रान्क्षिणंति शत्रूंरनपव्ययंतः ॥ रथवाहनं हविरस्य नाम य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पं॰सं॰

॥२३॥ आयुधं निहितमस्य वर्म॥ तत्रा रथमुपशग्मं सदेम विश्वाहाव
यंस्कमनस्यमानाः॥ स्वादुषंसदः पितरो वयोधाः कृच्छ्रेश्रितः
शक्तीवंतो गभीराः॥ चित्रसेना इषुबला अमृध्राः सतोवीरा
उरवो व्रातसाहाः॥ ब्राह्मणासः पितरः सोम्यासः शिवे नो द्या
वा पृथिवी अनेहसा॥ पूषा नः पातु दुरिता दृतावृधो रक्षा
माकिर्नो अघशंस ईशत॥ २०॥ सुपर्णं वस्ते मृगो अस्या दं
तो गोभिः संनद्धा पतति प्रसूता॥ यत्रा नरः सं च वि च द्रवंति
तत्रास्मभ्यमिषवः शर्म यंसन्॥ ऋजीते परि वृङ्धि नोऽश्मा ॥२३॥
भवतु नस्तनूः॥ सोमो अधि ब्रवीतु नोदितिः शर्म यच्छतु॥

आजंघंति सान्वेषां जघनां उप जिघ्नते॥ अश्वाजनि प्रचेतसोश्वान्स
मत्सु चोदय॥ अहिरिव भोगैः पर्येति बाहुं ज्याया हेतिं परिबा
धमानः॥ हस्तघ्नो विश्वा वयुनानि विद्वान्पुमान्पुमांसं परिपा
तु विश्वतः॥ आलाक्ताया रुरुशीर्ष्ण्यथो यस्या अयो मुखं।
इदं पर्जन्यरेतस इष्वै देव्यै बृहन्नमः॥ २१॥ अवसृष्टा परापत शरा
व्ये ब्रह्मसंशिते॥ गच्छामित्रान्प्रपद्यस्व मामीषां कं चनोच्छि
षः॥ यत्र बाणाः संपतंति कुमारा विशिखा इव॥ तत्रा नो ब्रह्म
णस्पतिरदितिः शर्म यच्छतु विश्वाहा शर्म यच्छतु॥ मर्माणि
ते वर्मणा छादयामि सोमस्त्वा राजामृतेनानु वस्तां॥ उरो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पं०सं०

॥२४॥ वरीयो व स(ण)स्तिणस्ते कृणोतु जयंतं त्वानु देवा मदंतु ॥ यो नः स्वो
अरणो यश्च निष्ट्यो जिघांसति ॥ देवास्तं सर्वे धूर्वंतु ब्रह्म वर्म
ममांतरं ॥ २२ ॥ इति मंडलं ॥ अग्निं नरो दीधिति भी भिरऽरण्यो
र्हस्तच्युती जनयंत प्रशस्तं ॥ दूरे दृशं गृहपतिमथर्युं ॥ तमग्नि
मस्ते वसवो न्यृण्वन्सुप्रतिचक्षमवसे कुतश्चित ॥ दक्षाय्यो
यो दम आस नित्यः ॥ प्रेद्धो अग्ने दीदिहि पुरो नोऽजस्रया सूर्म्या
यविष्ठ ॥ त्वां शश्वंत उप यंति वाजाः ॥ प्र ते अग्नयो ग्निः सुवी
रासः शोशुचंत द्युमंतः ॥ यत्रा नरः समासते सुजाताः ॥ दा नो अग्ने
धिया रयिं सुवीरं स्वपत्यं सहस्य प्रशस्तं ॥ न यं यावा तरति २८
प्योवरं निः

॥२३॥ यातुमावान् ॥ उप यमेति युवतिः सुदक्षं दोषा वस्तोर्हविष्मती घृ
ताची ॥ उप स्वैनमरमतिर्वसूयुः ॥ विश्वा अग्ने प दहारातीर्ये
भिस्तपोभिरदहो जरूथं ॥ प्र निस्वरं चातयस्वामीवां ॥ आ
यस्ते अग्न इधते अनीकं वसिष्ठ शुक्र दीदिवः पावक ॥ उतो न
एभिः स्तवथैरिह स्याः ॥ वि ये ते अग्ने भेजिरे अनीकं मर्ता नरः पि
त्र्यासः पुरुत्रा ॥ उतो न एभिः सुमना इह स्याः ॥ इमे नरो वृत्रह
त्येषु शूरा विश्वा अदेवीरभि संतु मायाः ॥ ये मे धियं पनयंत
प्रशस्तां ॥ २४ ॥ मा शूने अग्ने नि षदाम नृणां माशेषसो वीरता
परि त्वा ॥ प्रजावतीषु दुर्यासु दुर्य ॥ यमश्वी नित्यमुपयाति यज्ञं

पं०सं० प्रजावंतं स्वपत्यं क्षयं नः ॥ स्वजन्मना शेषसा वावृधानं ॥ पाहि नो
॥२५॥ अग्ने रक्षसो अजुष्टात्पाहि धूर्तेरररुषो अघायोः ॥ त्वया युजा पृ
तनायूँरभि ष्यां ॥ सेदग्निरग्नीँरत्यस्त्वन्यान्यत्र वाजी तनयो
वीळुपाणिः ॥ सहस्रपाथा अक्षरा समेति ॥ सेदग्निर्यो वनु
ष्यतो निपाति समेद्धारमंहस उरुष्यात् ॥ सुजातासः परिचरं
ति वीराः ॥ २५ ॥ अयं सो अग्निराहुतः पुरुत्रा यमीशानः समि
दिंधे हविष्मान् ॥ परि यमेत्यध्वरेषु होता ॥ त्वे अग्न आहवनानि
भूरीशानास आजुहुयाम नित्या ॥ उभा कृण्वंतो वहतू मिये १५
धे ॥ इमो अग्ने वीततमानि हव्याजस्रो वक्षि देवतातिमच्छ ॥ प्र

ति न ईं सुरभीणि व्यंतु ॥ मा नो अग्ने वीरते परादा दुर्वाससेमतये
मा नो अस्यै ॥ मा नः क्षुधे मा रक्षस ऋतावो मा नो दमे मा वन आ
जुहूर्थाः ॥ नू मे ब्रह्माण्यग्न उच्छशाधि त्वं मघवद्भ्यः देव
सुषूदः ॥ रातौ स्यामोभयास आ ते यूयं पात स्वस्तिभिः सदा
नः ॥ २६ ॥ त्वमग्ने सुहवो रण्वसंदृक्सुदीती सूनो सहसो दि
दीहि ॥ मा त्वे सचा तनये नित्य आ धङ्मा वीरो अस्मन्नर्यो विदा
सीत् ॥ मा नो अग्ने दुर्भृतये सचैषु देवेद्धेष्वग्निषु प्र वोचः ॥ मा
ते अस्मान्दुर्मतयो भृमाच्चिद्देवस्य सूनो सहसो नशंत ॥ स मर
्तो अग्ने स्वनीक रेवानमर्त्ये य आजुहोति हव्यं ॥ स देवता

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पं०सं०

॥२६॥ वसुवनिंदधातियंसूरिरर्थपृछमानएति॥महोनोअग्नेसु
वितस्यविद्वान्रयिंसूरिभ्यआवहा तं॥येनवयंसहसा बृहं
वन्मदेमाविक्षितासआयुषासुवीराः॥नूमेब्रह्माण्यग्नउ
देव च्छशाधित्वं मघवद्भ्यःसुषूदः॥रातौस्यामोभयासआ
तेयूयंपातस्वस्तिभिःसदानः॥२५॥ ॥इतिपंचमाष्टकेप्र
थमोध्यायः॥ ॥हरिः ॐ॥जुषस्वनःसमिधमग्नेअद्य
शोचाबृहद्यजतंधूममृण्वन्॥उपस्पृशदिव्यंसानुस्तूपैः
संरश्मिभिःस्ततनःसूर्यस्य॥नराशंसस्यमहिमानमेषा २६

मुपस्तोषामयजतस्ययज्ञैः॥येसुक्रतवःशुचयोधियंधाःस्वदंति
देवाउभयानिहव्या॥ईळेन्यंवोअसुरंसुदक्षमंतर्दूतंरोदसीस
त्यवाचं॥मनुष्वदग्निंमनुनासमिद्धंसमध्वरायसदमिन्महेम
सपर्यवोभरमाणाअभिज्ञुप्रवृंजतेनमसाबर्हिरग्नौ॥आजुह्वा
नाघृतपृष्ठंपृषद्वदध्वर्यवोहविषामर्जयध्वं॥स्वाध्योविदुरो
देवयंतोशिश्रयूरथयुर्देवताता॥पूर्वीशिशुंनमातरारिहाणे
समग्रुवोनसमनेष्वंजन्॥५॥उतयोषणेदिव्येमहीनउषासान
क्तासुदुघेवधेनुः॥बर्हिषदापुरुहूतेमघोनीआयज्ञियेसु
वितायश्रयेतां॥विप्रायज्ञेषुमानुषेषुकारूमन्येवांजातवेदसा
यजध्यै॥ऊर्ध्वंनोअध्वरंकृतंहवेषुतादेवेषुवनथोवार्याणि॥आ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पं॰सं॰

॥१७॥ भारतीभारतीभिः सजोषाइळादेवैर्मनुष्येभिरग्निः ॥ सरस्वती
सारस्वतेभिरर्वाक्तिस्रोदेवीबर्हिरेदंसदंतु ॥ तंनस्तुरीपम
धपोषयित्नुदेवत्वष्टर्विरराणस्यस्व ॥ यतोवीरः कर्मण्यः सु
दक्षोयुक्तग्रावाजायतेदेवकामः ॥ वनस्पतेवसृजोपदेवा
नग्निर्हविःशमितासूदयाति ॥ सेदुहोतासत्यतरोयजा
तियथादेवानांजनिमानिवेद ॥ आयाह्यग्नेसमिधानोअ
र्वाङिंद्रेणदेवैःसरथंतुरेभिः ॥ बर्हिर्नआस्तामदितिःसुपु
त्रास्वाहादेवाअमृतामादयंतां ॥ २ ॥ अग्निंवोदेवमग्नि १७

भिःसजोषायजिष्ठंदूतमध्वरेकृणुध्वं ॥ योमर्त्येषुनिध्रुविर्ऋ
तावातपुर्मूर्द्धाघृतान्नः पावकः ॥ प्रोथदश्वोनयवसेविष्यन्य
दामहः संवरणा[illegible]द्व्यस्थात् ॥ आदस्यवातोअनुवातिशोचि
रधस्मतेव्रजनंकृष्णमस्ति ॥ उद्यस्यतेनवजातस्यवृष्णोग्नेचरं
त्यजरादृधानाः ॥ अच्छाद्यामरुषोधूमएतिसंदूतोअग्नईय
सेहिदेवान् ॥ वियस्यतेपृथिव्यांपाजोअश्रेत्तृषुयदन्नास
मवृक्तजंभैः ॥ सेनेवसृष्टाप्रसितिष्टएतियवंनदस्मजुह्वा
विवेक्षि ॥ तमिद्दोषातमुषसियविष्ठमग्निमत्यंनमर्जयंतन
रः ॥ निशिशानाअतिथिमस्ययोनौदीदायशोचिराहुतस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१८ त्वक्षः॥३॥सुसंदृक्के स्वनीकप्रतीकं वियद्रुक्मोनरोचसउपाके।
दिवोनतेतन्यतुरेतुशुष्मश्चित्रोनसूरः प्रतिचक्षिभानुं॥य
थावःस्वाहाग्नयेदाशेमपरीळाभिर्घृतवद्भिश्चहव्यैः॥तेभि
र्नोअग्नेअमितैर्महोभिः शतंपूर्भिरायसीभिर्निपाहि॥यावा
तेसंतिदाशुषेअधृष्टागिरोवायाभिर्नृवतीरुरुष्याः॥ताभि
र्नःसूनोसहसोनिपाहिस्मत्सूरींजरितॄंजातवेदः॥निर्य
त्पूतेवस्वधितिःशुचिर्गात्स्वयाकृपातन्वा३रोचमानः॥आ
योमात्रोरुशेन्योजनिष्टदेवयज्यायसुक्रतुःपावकः॥ १८

एतानोअग्नेसौभगादिदीह्यपिक्रतुंसुचेतसंवतेम॥विश्वास्तोतृभ्यो
गृणतेचसंतुयूयंपातस्वस्तिभिःस०॥४॥प्रवःशुक्रायभानवेभर
ध्वंहव्यंमतिंचाग्नयेसुपूतं॥योदैव्यानिमानुषाजनूंष्यंतर्विश्वानि
विद्मनाजिगाति॥सगृत्सोअग्निस्तरुणश्चिदस्तुयतोयविष्ठो
अजनिष्टमातुः॥संयोवनायुवतेभस्मनादताशुचिदन्भूरिचिद
न्नासमिदत्तिसद्यः॥अस्यदेवस्यसंसद्यनीकेयंमर्तासःश्येतंज
गृभ्रे॥नियोगृभंपौरुषेयीमुवोचदुरोकमग्निरायवेशुशोच॥
अयंकविरकविषुप्रचेतामर्तेष्वग्निरमृतोनिधायि॥समानोअ
त्रजुहुरःसहस्वःसदात्वेसुमनसःस्याम॥आयोयोनिंदेवकृ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥२९॥ तं सुसादृक्त्वाह्यग्निरमृतो अतारीत्॥ तमोषधीश्चवनिनश्चगर्भं
भूमिश्चविश्वधायसं बिभर्ति॥५॥ईशेह्यग्निरमृतस्य भूरेरी
शे रायः सुवीर्यस्य दातोः॥ मा त्वा वयं सहसावन्नवीरा मा प्सवः
[illegible] : परिषदाम माडुवः॥ पुरिषद्यंह्यरणस्य रेक्णो
नित्यस्य रायः पतयः स्याम॥ नशे षो अग्ने अन्यजातमस्त्यचे
तानस्य मा पथो विदुक्षः॥ नहिग्रभायारणः सुशेवो न्योदर्यो म
मं नसा [illegible] तवाउ॥ अधा चिदोकः पुनरित्स एत्या नो वाज्यभीषाळे
तु नव्यः॥ त्वमग्ने वनुष्यतो निपाहि त्वमु नः सहसावन्नवद्यात्॥ २९
संत्वाध्वस्मन्वदभ्येतु पाथः संरयिः स्पृहयाय्यः सहस्री॥ ए
तानो अग्ने०॥ विश्वास्तोतृभ्यो०॥६॥ प्राग्नये तवसे भरध्वं गिरं दिवो
अरतये पृथिव्याः॥ यो विश्वेषाममृतानामुपस्थे वैश्वानरो वावृ
धे जागृवद्भिः॥ पृष्टो दिवि धाय्यग्निः पृथिव्यां नेता सिंधूनां वृ
षभः स्तियानां॥ स मानुषीरभि विशो विभाति वैश्वानरो वावृधा
नो वरेण॥ त्वद्भिया विश आयन्नसिक्नीरसमना जहती र्भोजनानि।
वैश्वानर पूरवे शोशुचानः पुरो यदग्ने दरयन्नदी [illegible] ॥ तव त्रिधातु दे:॥
पृथिवी उत [illegible] द्यौर्वैश्वानर व्रतमग्ने सचंत॥ त्वं [illegible] भासा रोदसी
आततंथाजस्रेण शोचिषा शोशुचानः॥ त्वामग्ने हरितो वावशाना
गिरः संचंते धुनयो घृताचीः॥ पतिं कृष्टीनां रथ्यं रयीणां वैश्वानरमु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥२०॥ षसां केतुमन्हां॥७॥त्वे असुर्यं१ वसवो न्यृण्वन्क्रतुं हि ते मित्रम
हो जुषंत॥त्वं दस्यूँरोकसो अग्न आज उरु ज्योतिर्जनयन्नार्याय।
सजायमानः परमे व्योमन्वायुर्न पाथः परि पासि सद्यः॥
त्वं भुवना जनयन्नभि क्रन्नपत्याय जातवेदो दशस्यन्॥ताम
ग्ने अस्मे इषमेरयस्व वैश्वानर द्युमतीं जातवेदः॥यया राधः
पिन्वसि विश्ववार पृथु श्रवो दाशुषे मर्त्याय॥तं नो अग्ने म
घवद्भ्यः पुरुक्षुं रयिं नि वाजं श्रुत्यं युवस्व॥वैश्वानर महि नः
शर्म यच्छ रुद्रेभिरग्ने वसुभिः सजोषाः॥८॥प्र सम्राजो अ
सुरस्य प्रशस्तिं पुंसः कृष्टीनामनुमाद्यस्य॥इंद्रस्येव प्र तवसस २०

स्कृतानि वंदे दारुं वंदमानो विवक्मि॥कविं केतुं धासिं भानुमद्रेर्हि
न्वंति शं राज्यं रोदस्योः॥पुरंदरस्य गीर्भिरा विवासेग्ने व्रतानि पू
र्व्या महानि॥न्यक्रतून्ग्रथिनो मृध्रवाचः पणीँरश्रद्धाँ अवृधाँ अ २
यज्ञान्॥प्रप्र तान्दस्यूँरग्निर्विवाय पूर्वश्चकारापराँ अयज्यू
न्॥यो अपाचीने तमसि मदंतीः प्राचीश्चकार नृतमः शचीभिः।
तमीशानं वस्वो अग्निं गृणीषेनानतं दमयंतं पृतन्यून्॥यो दे
ह्यो३ अनमयद्वधस्नैर्यो अर्यपत्नीरुषसश्चकार॥स निरुध्या
नहुषो यह्वो अग्निर्विशश्चक्रे बलिहृतः सहोभिः॥यस्य श
र्मन्नुप विश्वे जनास एवैस्तस्थुः सुमतिं भिक्षमाणाः॥वैश्वान

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥२१॥ रो वरमा रोदस्योराग्निः ससाद पित्रोरुपस्थं ॥ आ देवो ददे बुध्न्या उ वसू
नि वैश्वानर उदिता सूर्यस्य ॥ आ समुद्रादवरादा परस्मादाग्निर्द
दे दिवऽआ पृथिव्याः ॥ ७ ॥ प्र वो देवं चित्सहसानमग्निमश्वन्न
वाजिनं हिषे नमोभिः ॥ भवा नो दूतो अध्वरस्य विद्वांत्मना देवे
षु विविदे मितद्रुः ॥ आ याह्यग्ने पथ्या उ अनु स्वा मंद्रो देवानां स
ख्यं जुषाणः ॥ आ सानु शुष्मैर्नदयन्पृथिव्या जंभेभिर्विश्वमु
शधग्वनानि ॥ प्राचीनो यज्ञः सुधितं हि बर्हिः प्रीणीते अग्निरी
ळितो न होता ॥ आ मातरा विश्ववारे हुवानो यतो यविष्ठ जज्ञि
षे सुशेवः ॥ सद्यो अध्वरे रथिरं जनंत मानुषासो विचेतसो य एऽ ॥२१॥

षो । विशामधायि विश्पतिर्दुरोणेऽग्निर्मंद्रो मधुवचा ऋतावा ॥ असादि
वृतो वह्निराजगन्वानग्निर्ब्रह्मा नृषदने विधर्ता ॥ द्यौश्च यं पृथिवी
वावृधाते आ यं होता यजति विश्ववारं ॥ एते द्युम्नेभिर्विश्वमातिरं
त मंत्रं ये वारं नर्या अतक्षन् ॥ प्र ये विशस्तिरंत श्रोषमाणा आ ये
मे अस्य दीधयन्नृतस्य ॥ नू त्वामग्न ईमहे वसिष्ठा ईशानं सूनो स
हसो वसूनां ॥ इषं स्तोतृभ्यो मघवद्भ्य आनड्यूयं पात० ॥ १० ॥ इं
धे राजा समर्येन [illegible] मोभिर्यस्य प्रतीकमाहुतं घृतेन ॥ नरो
हव्येभिरीळते सबाध आग्निरग्र उषसामशोचि ॥ अयमु
ष्य सुमहां अवेदि होता मंद्रो मनुषो यह्वो अग्निः ॥ वि भाऽअकः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥२३॥ ससृज्ञानःपृथिव्यांकृष्णपविरोषधीभिर्ववक्षे॥ कयानोअग्नेविव
सःसुवृक्तिंकामुस्वधामृणवःशस्यमानः॥ कदाभवेमपतयःसु
दत्ररायोवंतारोदुष्टरस्यसाधोः॥ प्रप्रायमग्निर्भरतस्यशृण्वे
वियत्सूर्योनरोचतेबृहद्भाः॥ अभियःपूरुंपृतनासुतस्थौद्यु
तानोदैव्योअतिथिःशुशोच॥ असन्नित्वेआहवनानिभू
रि [illegible] भुवोविश्वेभिःसुमनाअनीकैः॥ स्तुतश्चिदग्नेशृ
ण्विषेगृणानःस्वयंवर्धस्वतन्वंसुजात॥ इदंवचःशतसाःसंसह
स्रमुदग्नयेजनिषीष्टद्विबर्हाः॥ शंयत्स्तोतृभ्यआपयेभवाति २२

द्युमदमीवचातनंरक्षोहा॥ नूत्वामग्न०॥ इषंस्तोतृभ्यो०॥११॥ अ
बोधिजारउषसामुपस्थाद्धोतामंद्रःकवितमःपावकः॥ दधा
तिकेतुमुभयस्यजंतोर्हव्यादेवेषुद्रविणंसुकृत्सु॥ सस्रुक्रतुर्यो
विदुरःपणीनांपुनानोअर्कंपुरुभोजसंनः॥ होतामंद्रोविशां
दमूनास्तिरस्तमोददृशेराम्याणां॥ अमूरःकविरदिति
र्विवस्वान्सुसंसन्मित्रोअतिथिःशिवोनः॥ चित्रभा
नुरुषसांभात्यग्रेऽपांगर्भःप्रस्वा [illegible] आविवेश॥ ईळेन्योवोम
नुषोयुगेषुसमनगाअशुचज्जातवेदाः॥ सुसंदृशाभानुना
योविभातिप्रतिगावःसमिधानंबुधंत॥ अग्नेयाहिदूत्यं१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥२३॥ मा रिषण्याद्देवाँ अच्छा ब्रह्मकृता गणेन॥ सरस्वतीं मरुतो अश्वि
नापोयक्षि देवान्रत्नधेयाय विश्वान्॥ त्वामग्ने समिधानो
वसिष्ठो जरूथं हन्यक्षि राये पुरंधिं॥ पुरुणीथा जातवेदो
जरस्व यूयं०॥ २२॥ उषो न जारः पृथु पाजो अश्रेद्दविद्युतद्दी
द्यच्छोशुचानः॥ वृषा हरिः शुचिरा भाति भासा धियो हिन्वा
नऽउशतीरजीगः॥ स्वर्णवस्तोरुषसामरोचि यज्ञं तन्वाना
उशिजो न मन्म॥ अग्निर्जन्मानि देवऽआ वि विद्वान्द्रवद्दू
तो देवयावा वनिष्ठः॥ अच्छा गिरो मतयो देवयंतीरग्निं २३

यंति द्रविणं भिक्षमाणाः॥ सुसंदृशं सुप्रतीकं स्वंचं हव्यवा
हमरतिं मानुषाणां॥ इंद्रं नो अग्ने वसुभिः सजोषा रुद्रं रु
द्रेभिरा वहा बृहंतं॥ आदित्येभिरदितिं विश्वजन्यां बृह
स्पतिमृक्वभिर्विश्ववारं॥ मंद्रं होतारमुशिजो यविष्ठम
ग्निं विश ईळते अध्वरेषु॥ स हि क्षपावां अभवद्रयी
दूतो णामतंद्रो यजथाय देवान्॥ २३॥ महां अस्यध्वरस्य प्रके
तो न ऋते त्वदमृता मादयंते॥ आ विश्वेभिः सरथं याहि
देवैर्न्यग्ने होता प्रथमः सदेह॥ त्वामीळते अजिरं दूत्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥२४॥ यह विष्मंतःस्सद मिन्मानुषासः॥ यस्य देवैरासदो बर्हिरग्ने आ
हान्यस्मैसुदिनाभवंति॥ त्रिश्चिदक्तोःप्रचिकितुर्वसूनि
त्वेअंतर्दाशुषेमर्त्याय॥ मनुष्वदग्नइहयक्षिदेवान्भवा
नोदूतोअभिशस्तिपावा॥ अग्निरीशेबृहतोअध्वरस्या
ग्निर्विश्वस्यहविषःकृतस्य॥ क्रतुंह्यस्यवसवोजुषंता
थादेवादधिरेहव्यवाहं॥ आग्नेवहहविरद्यायदेवानिं
द्रज्येष्ठासइहमादयंतां॥ इमंयज्ञंदिविदेवेषुधेहियूयं
पा०॥१४॥ अगन्ममहानमसायविष्ठंयोदीदायसमिद्धः ॥२४॥

स्वेदुरोणे॥ चित्रभानुंरोदसीअंतरुर्वीस्वाहुतंविश्वतःप्रत्यंचं॥
समन्हाविश्वादुरितानिसाह्वानग्निष्टवेदमआजातवेदाः॥ स
नोरक्षिषद्दुरितादवद्यादस्मान्गृणतउतनोमघोनः॥ त्वंव
रुणउतमित्रोअग्नेत्वांवर्द्धंतिमतिभिर्वसिष्ठाः॥ त्वेवसुसु
षणनानिसंतुयूयं॥१५॥ प्राग्नयेविश्वशुचेधियंधेसुरघ्नेम
न्मधीतिंभरध्वं॥ भरेहविर्नबर्हिषिप्रीणानोवैश्वानरायय
तयेमतीनां॥ त्वमग्नेशोचिषाशोशुचानआरोदसीअपृणा
जायमानः॥ त्वंदेवांअभिशस्तेरमुंचोवैश्वानरजातवेदोमहि
त्वा॥ जातोयदग्नेभुवनाव्यख्यःपशून्नगोपाइर्यःपरिज्मा॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२५ वैश्वानरब्रह्मणेविंदगातुंयूयं०॥१६॥समिधाजातवेदसेदेवा
यदेवहूतिभिः॥हविर्भिःशुक्रशोचिषेनमस्विनोवयंदा
शेमाग्नये॥वयंतेअग्नेसमिधाविधेमवयंदाशेमसुष्टु
तीयजत्र॥वयंघृतेनाध्वरस्यहोतर्वयंदेवहविषाभद्रशो
चे॥आनोदेवेभिरुपदेवहूतिमग्नेयाहिवषट्कृतिंजु
षाणः॥तुभ्यंदेवायदाशतःस्यामयूयं०॥१७॥उपसद्या
यमीळ्हुषआस्येजुहुताहविः॥योनोनेदिष्ठमाप्यं॥यः
पंचचर्षणीरभिनिषसाददमेदमे॥कविर्गृहपतिर्युवा॥ २५

सनोवेदोअमात्यमग्नीरक्षतुविश्वतः॥उतास्मान्पात्वंहसः॥न
वन्नुस्तोममग्नयेदिवःश्येनायजीजनं॥वस्वःकुविद्वनाति
नः॥स्पार्हायस्यश्रियोदृशेरयिर्वीरवतोयथा॥अग्रेय
ज्ञस्यशोचतः॥१८॥सइमांवेतुवषट्कृतिमग्निर्जुषतनोगिरः॥
यजिष्ठोहव्यवाहनः॥नित्वानक्ष्यविश्पतेद्युमंतंदेवधीमहि॥सु
वीरमग्नआहुत॥क्षपउस्रश्चदीदिहिस्वग्नयस्त्वयावयं॥
सुवीरस्त्वमस्मयुः॥उपत्वासातयेनरोविप्रासोयंतिधीतिभिः॥
उपाक्षरासहस्रिणी॥अग्नीरक्षांसिसेधतिशुक्रशोचिरम
र्त्यः॥शुचिःपावकईड्यः॥१९॥सनोराधांस्याभरेशानःसहसो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥२६॥ यहो॥ भगश्च दातु वार्यं॥ त्वमग्ने वीरवद्यशो देवश्च सविता भगः॥
दितिश्च दाति वार्यं॥ अग्ने रक्षा णो अंहसः प्रति ष्म देव रीषतः॥ त
पिष्ठैरजरो दह॥ अधा मही न आयस्यनाधृष्टो नृपीतये॥ पूर्भवा
शतभुजिः॥ त्वं नः पाह्यंहसो दोषावस्तरघायतः॥ दिवा नक्त
मदाभ्य॥२०॥ एना वो अग्निं नमसोर्जो नपातमाहुवे॥ प्रियं चे
तिष्ठमरतिं स्व [illegible]
[illegible] ध्वरं विश्वस्य दूतममृतं॥ स योजते अरुषा वि
श्वभोजसा स दुद्रवत्स्वाहुतः॥ सु [illegible] ब्रह्मा यज्ञः सुशमी वसूनां
देवं राधो जनानां॥ उदस्य शोचिरस्थादाजुह्वानस्य मी ॥२६॥

ढुषः॥ उद्धूमासो अरुषासो दिविस्पृशः समग्निमिंधते नरः॥ तं त्वा
दूतं कृण्महे यशस्तमं देवां आ वीतये वह॥ विश्वा सूनो सहसो म
र्तभोजना रास्व तद्यत्त्वेमहे॥ त्वमग्ने गृहपतिस्त्वं होता नो अध्वरे॥
त्वं पोता विश्ववार प्रचेता यक्षि वेषि च वार्यं॥ कृधि रत्नं यजमाना
य सुक्रतो त्वं हि रत्नधा असि॥ आ न ऋते शिशीहि विश्वमृत्वि
जं सुशंसो यश्च दक्षते॥२१॥ त्वे अग्ने स्वाहुत प्रियासः संतु
सूरयः॥ यंतारो ये मघवानो जनानामूर्वां दयंत गोनां॥ येषा
मिळा घृतहस्ता दुरोण आं अपि प्राता निषीदति॥ तांस्त्राय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥२७॥ स्वसद्मस्यद्रुहो निदो यच्छा नः शर्म दीर्घश्रुत ॥ स मंद्रया च जिह्वया
वह्निरासा विदुष्टरः ॥ अग्ने रयिं मघवद्भ्यो न ऽआ वह हव्यदातिं च
सूदय ॥ ये राधांसि ददत्यश्व्या मघा कामेन श्रवसो महः ॥ तां अं
हसः पिपृहि पर्तृभिष्ट्वं शतं पूर्भिर्यवि ष्ठ्य ॥ देवो वो द्रविणो
दाः पूर्णां विवष्ट्यासिचं ॥ उद्वा सिंचध्वमुप वा पृणध्वमादि
द्वो देव ऽओहते ॥ तं होतारमध्वरस्य प्रचेतसं वह्निं देवा अकृ
ण्वत ॥ दधाति रत्नं विधते सुवीर्यमग्निर्जनाय दाशुषे ॥२२॥
अग्ने भव सुषमिधा समिद्ध उत बर्हिरुर्विया वि स्तृणीतां ॥ उत ॥२७॥

द्वार उशती र्वि श्रयंतामुत देवां उशत आ वहेह ॥ अग्ने वीहि हविषा य
क्षि देवान्स्वध्वरा कृणुहि जातवेदः ॥ स्वध्वरा करति जातवेदा यक्ष
द्देवां अमृतान्पिप्रयच्च ॥ वंस्व विश्वा वार्याणि प्रचेतः सत्या भवंत्वा
शिषो नो अद्य ॥ त्वामु ते दधिरे हव्यवाहं देवासो अग्न ऊर्ज ऽआ
नपातं ॥ ते ते देवाय दाशतः स्याम महो नो रत्ना विदधद्दूयानः ॥२३॥
त्वेद्द यत्पितर श्चिन्न इंद्र विश्वा वामा जरितारो असन्वन् ॥ त्वे गावः
सुदुघास्त्वे ह्यश्वास्त्वं वसु देवयते वनिष्ठः ॥ राजेव हि जनिभिः क्षेष्ये
वाव द्युभिरभि विदुष्कविः सन् ॥ पिशा गिरो मघवन्गोभिरश्वैः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥२८॥ स्त्वायतः शिशीहि राये अस्मान् ॥ इमा उ त्वा पस्पृधानासो अत्र मंद्रा गि
रो देवयंती रुप स्थुः ॥ अर्वाची ते पथ्या राय एतु स्याम ते सुमता विं
द्र शर्मन् ॥ धेनुं न त्वा सूयवसे दुदुक्षन्नुप ब्रह्माणि ससृजे वसिष्ठः ।
त्वामिन्मे गोपतिं विश्व आहा न इंद्रः सुमतिं गंत्वछ ॥ अर्णांसि
चित्पप्रथाना सुदास इंद्रो गाधान्यकृणोत्सुपारा ॥ शर्धंतं शि
म्युमुचथस्य नव्यः शापं सिंधूनामकृणोदशस्तीः ॥२॥ पुरो
ळा इत्तुर्वशो यक्षुरासीद्राये मत्स्यासो निशिता अपीव ॥ श्रु
ष्टिं चक्रुर्भृगवो द्रुह्यवश्च सखा सखायमतरद्विषूचोः ॥ आ पक्था २८

सखा

सो भलानसो भनंतालिनासो विषाणिनः शिवासः ॥ आ यो नयत्सधु
मा आर्यस्य गव्या तृत्सुभ्यो अजगन्युधा नॄन् ॥ दुराध्यो३ अदितिं स्रे
वयंतो ऽचेतसो वि जगृभ्रे परुष्णीं ॥ मन्हा विव्यक्पृथिवीं पत्यमा
नः पशुष्कविरशयच्चायमानः ॥ ईयुरर्थं न न्यर्थं परुष्णीमा
शुश्चनेदभि पित्वं जगाम ॥ सुदास इंद्रः सुतुकाँ अमित्रान
रंधयन्मानुषे वध्रिवाचः ॥ ईयुर्गावो न यवसादगोपा यथाकृ
तमभि मित्रं चितासः ॥ पृश्निगावः पृश्निनिप्रेषितासः श्रुष्टिं
चक्रुर्नियुतो रंतयश्च ॥२५॥ एकं च यो विंशतिं च श्रवस्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥२९॥ वैकर्णयोर्जनान्राजान्यस्तः॥ दस्मो न सद्मन्नि शिशाति बर्हिः
शूरः सर्गमकृणोदिंद्र एषां॥ अध श्रुतं कवषं वृद्धमप्स्वनु द्रुह्युं
नि वृणग्वज्रबाहुः॥ वृणाना अत्र सख्याय सख्यं त्वायंतो
अमदंननु त्वा॥ वि सद्यो विश्वा दृंहितान्येषामिंद्रः पुरः सहसा
सप्त दर्दः॥ व्यानवस्य तृत्सवे गयं भाक् जेष्म पूरुं विदथे मृ
ध्रवाचं॥ नि गव्यवोऽनवो द्रुह्यवश्च षष्टिः शता सुषुपुः षट्
सहस्रा॥ षष्टिर्वीरासो अधि षड्दुवोयु विश्वेदिंद्रस्य वी
र्या कृतानि॥ इंद्रेणैते तृत्सवो वेविषाणा आपो न सृष्टा अध २९

वंत नीचीः॥ दुर्मित्रासः प्रकलविन्मिमाना जहुर्विश्वानि भोजना सुदा
से॥ २५॥ अर्द्धं वीरस्य शृतपामनिंद्रं परा शर्द्धंतं नुनुदे अभि क्षां॥ इं
द्रो मन्युं मन्युम्यो मिमाय भेजे पथो वर्तनिं पत्यमानः॥ आध्रेण चित्त
द्वेकं चकार सिंह्यं चित्पेत्वेना जघान॥ अव स्रक्तीर्वेश्या वृश्चदिंद्रः
प्रायच्छद्विश्वा भोजना सुदासे॥ शश्वंतो हि शत्रवो रारधुष्टे भेद
स्य चिच्छर्द्धतो विंद रंधिं॥ मर्ताँ एनः स्तुवतो यः कृणोति तिग्मं तस्मिं
नि जहि वज्रमिंद्र॥ आवदिंद्रं यमुना तृत्सवश्च प्रात्र भेदं सर्वता
ता मुषायत्॥ अजासश्च शिग्रवो यक्षवश्च बलिं शीर्षाणि जभ्रुर
श्व्यानि॥ न त इंद्र सुमतयो न रायः संचक्षे पूर्वा उषसो न नूत्नाः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

३० देवकं चिन्मान्यमानंजघंथावत्मनाबृहतः शंबरंभेत्॥२७॥प्रयेगृ
हादममदुस्त्वायापराशरः शतयातुर्वसिष्ठः॥नतेभोजस्यसख्यं
मृषंताधासूरिभ्यः सुदिनाव्युछान्॥द्वेनप्तुर्देववतः शतेगो
र्द्वारथावधूमंतासुदासः॥अर्हन्नग्नेपैजवनस्यदानंहोतेवस
द्मपर्येमिरेभन्॥चत्वारोमापैजवनस्यदानाः स्मद्दिष्टयः कृशनि न५
नोनिरेके॥ऋज्रासोमापृथिविष्ठाः सुदासस्तोकंतोकायश्र
वसेवहंति॥यस्यश्रवोरोदसीअंतरुर्वीशीर्ष्णेशीर्ष्णेविबभा
जाविभक्ता॥सप्तेदिंद्रंनस्रवतोगृणंतिनियुध्यामधिमशि ३०

शादभीके॥इमंनरोमरुतः सश्चतानुदिवोदासन्नपितरंसुदासः॥अ
न२ विष्टनापैजवनस्यकेतंदूणाशंक्षत्रमजरंदुवोयु॥२८॥यस्तिग्मशृंगो
वृषभोनभीमएकः कृष्टीश्च्यावयतिप्रविश्वाः॥यः शश्वतोअदा
शुषोगयस्यप्रयंतासिसुष्वितरायवेदः॥त्वंहत्यदिंद्रकुत्समावः
य शुश्रूषमाणस्तन्वासमर्ये॥दासंयच्छुष्णंकुयवन्यस्माअरंधयः
आर्जुनेयायशिक्षन्॥त्वंधृष्णोधृषतावीतहव्यंप्रावोविश्वाभिरू
तिभिः सुदासं॥प्रपौरुकुत्सिंत्रसदस्युमावः क्षेत्रसातावृत्रहत्ये
षुपूरुं॥त्वंनृभिर्नृमणोदेववीतौभूरीणिवृत्राहर्यश्वहंसि॥त्वं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥३१॥ निदस्युंचुमुरिंधुनिंचास्वापयोदभीतयेसुहंतु॥तववच्योतानिवज्रह
स्तनानिनवयत्पुरोनवतिंचसद्यः॥निवेशनेशततमाविवेषीरहंच
वृत्रंनमुचिमुताहन्॥२९॥सनातातइंद्रभोजनानिरातहव्यायदाशु
षेसुदासे॥वृष्णेतेहरीवृषणायुनज्मिव्यंतुब्रह्माणिपुरुशाकवा
जं॥मातेअस्यांसहसावन्परिष्टावघायभूमहरिवःपरादै॥त्राय
स्वनोवृकेभिर्वरूथैस्तवप्रियासःसूरिषुस्याम॥प्रियासइत्ते
मघवन्नभिष्टौनरोमदेमशरणेसखायः॥नितुर्वशंनियाद्वं
शिशीह्यतिथिग्वायशंस्यंकरिष्यन्॥सद्यश्चिन्नुतेमघवन्न ३१

भिष्टौनरःशंसंत्युक्थशासउक्था॥येतेहवेभिर्विपणींरदाशन्न
स्मान्वृणीष्वयुज्यायतस्मै॥एतेस्तोमानरांनृतमतुभ्यमस्मद्र्यंचो
ददतोमघानि॥तेषामिंद्रवृत्रहत्येशिवोभूःसखाचशूरोविता
चनृणां॥नूइंद्रशूरस्तवमानऊतीब्रह्मजूतस्तन्वावावृधस्व॥
उपनोवाजान्मिमीह्युपस्तीन्यूयं०॥३०॥इतिपंचमाष्टकेद्वि
तीयोध्यायः॥ ॥हरिःॐ उग्रोजज्ञेवीर्यायस्वधावांचक्रि
रपोनर्योयत्करिष्यन्॥जग्मिर्युवानृषदनमवोभिस्त्रातान
इंद्रएनसोमहश्चित्॥हंतावृत्रमिंद्रःशूशुवानःप्रावीन्नुवीरोज

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥३२॥ रितारमूती॥ कर्तासुदासे अहवाउलोकं दातावसुमुहुरादाशुषेभू
त्॥ युध्मो अनर्वाखजकृत्समद्वा शूरः सत्राषाड्जनुषेमषाळ्हः॥
व्यासइंद्रः पृतनास्वोजा अधाविश्वंशत्रूयंतंजघान॥ उभेचिदिं
द्ररोदसी महित्वापप्राथतविषीभिस्तुविष्मः॥ निवज्रमिंद्रोह
रिवान्मिमिक्षन्त्समंधसामदेषुवाउवोच॥ वृषाजजानवृषणंर
णायतमुचिन्नारीनर्यंससूव॥ प्रयःसेनानीरधनृभ्यो अस्ती
नःसत्वागवेषणःसधृष्णुः॥५॥ नूचित्सभ्रेषतेजनोनरेषन्म
नोयोअस्यघोरमाविवासात्॥ यज्ञैर्यइंद्रेदधतेदुवांसिक्ष ३२

यत्सरायऋतपाऋतेजाः॥ यदिंद्रपूर्वो अपरायशिक्षन्नयज्ज्यायां
न्कनीयसोदेष्णं॥ अमृतइत्पर्यासीतदूरमाचित्रचित्र्यंभरारयिं
नः॥ यस्तइंद्रप्रियोजनोददाशदसन्निरेके अद्रिवःसखाते॥ व
यंते अस्यांसुमतौचनिष्ठाःस्यामवरूथे अघ्नतोनृपीतौ॥ एषस्तो
मो अचिक्रदद्वृषातउतस्तामुर्मघवन्नक्रपिष्ट॥ रायस्कामोज
रितारंतआगंत्वमंगशक्रवस्वआशकोनः॥ सनइंद्रत्वयता
याइषेधास्त्मनाचयेमघवानोजुनंति॥ वस्वीषुतेजरित्रे अस्तु
शक्तिर्यूयं०॥२॥ असाविदेवंगोऋजीकमंधोन्यस्मिन्निंद्रो
जनुषेमुवोच॥ बोधामसित्वाहर्यश्वयज्ञैः बोधानस्तोममंधसो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥३३॥ मदेषु॥प्रयंतियज्ञंविपयंतिबर्हिःसोममादोविदथेदुध्रवाचः॥न्यु
भ्रियंतेयशसोगृभादादूर उपब्दोवृषणोनृषाचः॥त्वमिंद्रस्र
वितवाअपस्कःपरिष्ठिताअहिनाशूरपूर्वीः॥त्वद्वावक्रेरथ्यो
नधेनारेजंतेविश्वाकृत्रिमाणिभीषा॥भीमोविवेषायुधेभि
रेषामपांसिविश्वानर्याणिविद्वान्॥इंद्रःपुरोजर्हृषाणोवि
दूधोद्धिवज्रहस्तोमहिनाजघान॥नयातवइंद्रजूजुवुर्नो
नवंदनाशविष्ठवेद्याभिः॥सशर्धदर्योविषुणस्यजंतोर्माशि
श्नदेवाअपिगुर्ऋतंनः॥३॥अभिक्रत्वेंद्रभूरधज्मनतेविव्य ३३

ङ्महिमानंरजांसि॥स्वेनाहिवृत्रंशवसाजघंथनशत्रुरंतंविविद
द्युधाते॥देवाश्चित्तेअसुर्यायपूर्वेनुक्षत्रायममिरेसहांसि॥इंद्रं
द्रोमघानिदयतेविषह्येंद्रंवाजस्यजोहुवंतसातौ॥कोरिश्चिद्धि
त्वामवसेजुहावेशानमिंद्रंसौभगस्यभूरेः॥अवोबभूथशतमू
तेअस्मेअभिक्षत्तुस्त्वावतोवरूता॥सखायस्तइंद्रविश्वह
स्यामनमोवृधासोमहिनातरुत्र॥वन्वंतुस्मातेवसासमीके
ऽभीतिमर्योवनुषांशवांसि॥सनइंद्रत्वय०॥वस्वीषुते०॥४॥
पिबासोममिंद्रमंदतुत्वायंतेसुषावहर्यश्वाद्रिः॥सोतुर्बाहुभ्यां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

३४ सुयतोनार्वा॥ यस्तेमदोयुज्यश्चारुरस्तियेनवृत्राणिहर्यश्वहंसि॥
सत्वामिंद्रप्रभूवसोममत्तु॥ बोधासुमेमघवन्वाचमेमांयांतेवसि
ष्ठोअर्चतिप्रशस्तिं॥ इमाब्रह्मसधमादेजुषस्व॥ श्रुधीहवं
विपिपानस्याद्रेर्बोधाविप्रस्यार्चतोमनीषां॥ कृष्वादुवांस्य
तमासचेमा॥ नतेगिरोअपिमृष्येतुरस्यनसुष्टुतिमसुर्यस्य
विद्वान्॥ सदातेनामस्वयशोविवक्मि॥ ५॥ भूरिहितेसव
नामानुषेषुभूरिमनीषीहवतेत्वामित्॥ मारेअस्मन्मघव
ञ्ज्योक्कः॥ तुभ्येदिमासवनाशूरविश्वातुभ्यंब्रह्माणिव ३४

र्धनाकृणोमि॥ त्वंनृभिर्हव्योविश्वधासि॥ नूचिन्नुतेमन्यमा
नस्यदस्मोदश्नुवंतिमहिमानमुग्र॥ नवीर्यमिंद्रतेनराधः॥
येचपूर्वऋषयोयेचनूत्नाइंद्रब्रह्माणिजनयंतविप्राः॥ अस्मे
तेसंतुसख्याशिवानियूयंपा०॥ द्वा॥ उदुब्रह्माण्यैरतश्रवस्येंद्रं
समर्येमहयावसिष्ठ॥ आयोविश्वानिशवसाततानोपश्रोता
मईवतोवचांसि॥ अयामिघोषइंद्रदेवजामिरिरज्यंतयच्छुरु
धोविवाचि॥ नहिस्वमायुश्चिकितेजनेषुतानीदंहांस्यतिपर्ष्य
स्मान्॥ युजेरथंगवेषणंहरिभ्यामुपब्रह्माणिजुजुषाणमस्थुः॥
विबाधिष्टस्यरोदसीमहित्वेंद्रोवृत्राण्यप्रतीजघन्वान्॥ आ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

३५ पश्चित्पिप्युस्तर्यो३ न गावो नक्षंन्तं जरितारस्त इंद्र॥ याहि वायु
र्न नियुतो नो अच्छा त्वं हि धीभिर्दयसे वि वाजान्॥ ते त्वा मदा
इंद्र मादयंतु शुष्मिणं तुविराधसं जरित्रे॥ एको देवत्रा दय
से हि मर्तानस्मिंछूर सवने मादयस्व॥ एवेदिंद्रं वृषणं वज्रबा
हुं वसिष्ठासो अभ्यर्चंत्यर्कैः॥ स स्तुतो वीरवद्धातु गोम नः
द्यूयं पात०॥७॥ यो निष्ट इंद्र सदने अकारि तमान्नृभिः पु
रुहूत प्रयाहि॥ असो यथा नो विता वृधे च ददो वसूनि म
मदश्च सोमैः॥ गृभीतं ते मन इंद्र द्विबर्हाः सुतः सोमस्त
नुपाणोदर्यं श्वयाहि॥ सुः परिषिक्ता मधूनि॥ विसृष्टधे ३५

ना मरते सुवृक्तिरियमिंद्रं जोहुवती मनीषा॥ आ नो दिव आ पृथिव्या ऋ
जीषिन्निदं बर्हिः सोमपेयाय याहि॥ वहंतु त्वा हरयो मद्र्यंचमांगूषम
च्छा तवसं मदाय॥ आ नो विश्वाभिरूतिभिः सजोषा ब्रह्म जुषाणो हर्य
श्व याहि॥ वरीवृजत्स्थविरेभिः सुशिप्रास्मे दधद्वृषणं शुष्ममिंद्र॥ एष
स्तोमो मह उग्राय वाहे धुरी३व वात्यो न वाजयन्नधायि॥ इंद्र त्वायमर्क ईट्टे
वसूनां दिवीव द्यामधि नः श्रोमतं धाः॥ एवा न इंद्र वार्यस्य पूर्धि प्र ते
महीं सुमतिं वेविदाम॥ इषं पिन्व मघवद्भ्यः सुवीरां यूयं०॥८॥ आ
ते मह इंद्रोत्युग्र समन्यवो यत्समरंत सेनाः॥ पताति दिद्युन्नर्यस्य बाह्वो
र्मा ते मनो विष्वद्र्य१ग्वि चारीत्॥ नि दुर्ग इंद्र श्नथिह्यमित्राँ अभि ये

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नो मर्त्यासो अमंति ॥ आरे तं शंसं कृणुहि निनित्सोरा नो भर संभरणं वसूनां ॥ श
३६ तं ते शिप्रिन्नूतयः सुदासे सहस्रं शंसा उत रातिरस्तु ॥ जहि वधर्वनुषो मर्त्य
स्यास्मे द्युम्नमधि रत्नं च धेहि ॥ त्वावतो हींद्र क्रत्वे अस्मि त्वावतो वितुः शू
र रातौ ॥ विश्वेदहानि तविषीव उग्रँ ओकः कृणुष्व हरिवो न मर्धीः ॥
कुत्सा एते हर्यश्वाय शूषमिंद्रे सहो देवजूतमियानाः ॥ सत्रा कृधि
सुहना शूर वृत्रा वयं तरुत्राः सनुयाम वाजं ॥ एवान्न इंद्र० ॥ इषं पि
न्व मघ० ॥ ९ ॥ न सोम इंद्रमसुतो ममाद नाब्रह्माणो मघवानं सुता
सः ॥ तस्मा उक्थं जनये यज्जुजोषन्नृवन्नवीयः शृणवद्यथा नः ॥
उक्थउक्थे सोम इंद्रं ममाद नीथेनीथे मघवानं सुतासः ॥ य ३६

दीं सबाधः पितरं न पुत्राः समानदक्षा अवसे हवंते ॥ चकार ता कृणवन्नू
नमन्या यानि ब्रुवंति वेधसः सुतेषु ॥ जनीरिव पतिरेकः समानो नि
मामृजे पुर इंद्रः सु सर्वाः ॥ एवा तमाहुरुत शृण्व इंद्र एको विभक्ता
तरणिर्मघानां ॥ मिथस्तुर ऊतयो यस्य पूर्वीरस्मे भद्राणि स
श्चत प्रियाणि ॥ एवा वसिष्ठ इंद्रमूतये नॄन्कृष्टीनां वृषभं सुते गृ
णाति ॥ सहस्रिण उप नो माहि वाजान्यूयं० ॥ १० ॥ इंद्रं नरो नेमधि
ता हवंते यत्पार्या युनजते धियस्ताः ॥ शूरो नृषाता शवसश्चका
न आ गोमति व्रजे भजा त्वं नः ॥ य इंद्र शुष्मो मघवन्ते अस्ति शि
क्षा सखिभ्यः पुरुहूत नृभ्यः ॥ त्वं हि दृळ्हा मघवन्विचेता अ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पाह्यधिपरिवृतंनराधः॥इंद्रोराजाजगतश्चर्षणीनामधिक्षमिविषुरू
३७ पंयदस्ति॥ततोददातिदाशुषेवसूनिचोदद्राधउपस्तुतश्चिदर्वाक्॥
नूचिन्नइंद्रोमघवासहूतीदानोवाजंनियमतेनऊती॥अनूनाय
स्यदक्षिणापीपायवामंनृभ्योअभिवीतासखिभ्यः॥नूइंद्रराये
वरिवस्कृधीनआतेमनोववृत्याममघाय॥गोमदश्वावद्रथव
द्व्यंतोयूयं॥२१॥ब्रह्माणइंद्रोपयाहिविद्वानर्वाचस्तेहरयःसंतु
युक्ताः॥विश्वेचिद्धित्वाविहवंतमर्ताअस्माकमिच्छृणुहिविश्व
मिन्व॥हवंतइंद्रमहिमाव्यानड्ब्रह्मयत्पासिशवसिन्नृषीणां॥
आयद्वज्रंदधिषेहस्तउग्रघोरःसन्क्रत्वाजनिष्ठाअषाळ्हः॥ ३७

तवप्रणीतींद्रजोहुवानान्संयन्नृन्नरोदसीनिनेथ॥महेक्षत्रायशवसे
हिजज्ञेतूतुजिंचित्तूतुजिरशिश्नत्॥एभिर्नइंद्राहभिर्दशस्यदुर्मि
त्रासोहिक्षितयःपवंते॥प्रतियच्चष्टेअनृतमनेनाअवद्वितावरु
णोमायीनःसात्॥वोचेमेदिंद्रंमघवानमेनंमहोरायोराधसो
यद्दन्नः॥योअर्चतोब्रह्मकृतिमविष्ठायूयं०॥२२॥अयंसोमइं
द्रतुभ्यंसुन्वआतुप्रयाहिहरिवस्तदोकाः॥पिबात्व१स्यसुषु
तस्यचारोर्ददोमघानिमघवन्नियानः॥ब्रह्मन्वीरब्रह्मकृतिंजु
षाणोर्वाचीनोहरिभिर्याहितूयं॥अस्मिन्नूषुसवनेमादयस्वोप
ब्रह्माणिशृणवइमानः॥कातेअस्त्यरंकृतिःसूक्तैःकदानूनंतेम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥३८॥ घवंदाशेम॥ विश्वामतीराततनेत्वायाधामइंद्रशृणवोहवेमा॥
उतोघातेपुरुष्याइदासन्येषांपूर्वेषामशृणोर्ऋषीणां॥ अधाहंत्वा
मघवंजोहवीमित्वन्नइंद्रासिप्रमतिःपितेव॥ वोचेमेदिंद्रं॰॥ योअ
देव र्चतो॰॥२३॥ आनोयाहिशवसायाहिशुष्मिन्भवावृधइंद्ररायोअ
स्य॥ महेनृम्णायनृपतेसुवज्रमहिक्षत्रायपौंस्यायशूर॥ हवंत
उत्वाहव्यंविवाचितनूषुशूराःसूर्यस्यसातौ॥ त्वंविश्वेषुसेन्यो
जनेषुत्वंवृत्राणिरंधयासुहंतु॥ अहायदिंद्रसुदिनाव्युछां
दधोयत्केतुमुपमंसमत्सु॥ न्य१ग्निःसीददसुरोनहोताहुवा
नोअत्रसुभगायदेवान्॥ वयंतेतइंद्रयेचदेवस्तवंतशूरदद ३८

तोमघानि॥ यछासूरिभ्यउपमंवरूथंस्वाभुवोजरणामश्नवंत॥
वोचेमेदिंद्रंमघ॰॥ योअर्च॰॥२४॥ प्रवइंद्रायमादनंहर्यश्वा
यगायत॥ सखायःसोमपाव्ने॥ शंसेदुक्थंसुदानवउतद्युक्षं
यथानरः॥ चकृमासत्यराधसे॥ त्वंनइंद्रवाजयुस्त्वंगव्युःशत
क्रतो॥ त्वंहिरण्ययुर्वसो॥ वयमिंद्रत्वायवोभिप्रणो
नुमोवृषन्॥ विद्धीत्वस्यनोवसो॥ मानोनिदेचवक्तवेर्यो
रंधीरराव्णे॥ त्वेऽअपिक्रतुर्मम॥ त्वंवर्मासिसप्रथःपुरो
योधश्चवृत्रहन्॥ त्वयाप्रतिब्रुवेयुजा॥२५॥ महांउतासियस्य
तेनुस्वधावरीसहः॥ मम्नातेइंद्ररोदसी॥ तंत्वामरुत्वतीपरि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

युवद्वाणी सयावरी ॥ नक्षमाणासहद्युभिः ॥ ऊर्ध्वासस्त्वान्विंदवोभुवं
३९ दस्ममुपद्यवि ॥ संतेनमंतकृष्टयः ॥ प्रवोमहेमहिवृधेभरध्वंप्रचेतसे
प्रसुमतिंकृणुध्वं ॥ विशःपूर्वीःप्रचराचर्षणिप्राः ॥ उरुव्यचसेमहि
ब्रह्म नेसुवृक्तिमिंद्रायजनयंतविप्राः ॥ तस्यव्रतानिनमिनंति [illegible]राः ॥ इं धी
द्रंवाणीरनुत्तमन्युमेवसत्राराजानंदधिरेसहध्यै ॥ हर्यश्वायबर्हया
समापीन् ॥ १६ ॥ मोषुत्वावाघतश्चनारेअस्मन्निरीरमन् ॥ आ
रात्ताच्चित्सधमादंनआगहीहवासन्नुपश्रुधि ॥ इमेहितेब्रह्मकृ
तःसुतेसचामधौनमक्षआसते ॥ इंद्रेकामंजरितारोवसूयवो ३९

रथेनपादमादधुः ॥ रायस्कामोवज्रहस्तंसुदक्षिणंपुत्रोनपितरंहुवे ॥ इमइं
द्रायसुन्विरेसोमासोदध्याशिरः ॥ तांआमदायवज्रहस्तपीतयेहरिभ्यांया
ह्योकआ ॥ श्रवच्छ्रुत्कर्णईयतेवसूनांनूचिन्नोमर्धिषद्गिरः ॥ सद्यश्चिद्यःस
हस्राणिशतादददन्नकिर्दित्संतमामिनत् ॥ १७ ॥ सवीरोअप्रतिष्कुतइंद्रे
णाशूशुवेनृभिः ॥ यस्तेगभीरासवनानिवृत्रहन्त्सुनोत्याचधावति ॥ भ
वावरूथंमघवन्मघोनांयत्समजासिशर्धतः ॥ वित्वाहतस्यवेदनंभजेम
ह्यादूणाशोभरागयं ॥ सुनोतासोमपाव्नेसोममिंद्रायवज्रिणे ॥ पचताप
क्तीरवसेकृणुध्वमित्पृणन्नित्पृणतेमयः ॥ मास्रेधतसोमिनोदक्षता
महेकृणुध्वंरायआतुजे ॥ तरणिरिज्जयतिक्षेतिपुष्यतिनदेवासःक

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥४०॥ वत्नवे॥ नकिःसुदासोरथंपर्यासनरीरमत्॥ इंद्रोयस्यावितायस्यमरुतो
गमत्सगोमतिव्रजे॥१८॥ गमद्वाजंवाजयन्निंद्रमर्त्योयस्यत्वमविताभुवः।
अस्माकंबोध्यवितारथानामस्माकंशूरनृणां॥ उदिन्न्वस्यरिच्यतेंशोध
नंनजिग्युषः॥ यइंद्रोहरिवान्नदभंतितंरिपोदक्षंदधातिसोमिनि।
मंत्रमखर्वंसुधितंसुपेशसंदधातयज्ञियेष्वा॥ पूर्वीश्चनप्रसितयस्त
रंतितंयइंद्रेकर्मणाभुवत्॥ कस्तमिंद्रत्वावसुमामर्त्योदधर्षति॥
श्रद्धाइत्तेमघवन्पार्येदिविवाजीवाजंसिषासति॥ मघोनस्मवृत्र
हत्येषुचोदय येददतिप्रियावसु॥ तवप्रणीतीहर्यश्वसूरिभिर्विश्वा ॥४०॥
तरेमदुरिता॥१९॥ तवेदिंद्रावमंवसुत्वंपुष्यसिमध्यमं॥ सत्राविश्वस्य

परमस्यराजसिनकिष्ट्वागोषुवृण्वते॥ त्वंविश्वस्यधनदाअसिश्रुतो
यईंभवंत्याजयः॥ तवायंविश्वःपुरुहूतपार्थिवोवस्युर्नामभिक्षते।
यदिंद्रयावतस्त्वमेतावदहमीशीय॥ स्तोतारमिद्दिधिषेयरदावसो
नपापत्वायरासीय॥ शिक्षेयमिन्महयतेदिवेदिवेरायआकुहचिद्वि य॰
दे॥ नहित्वदन्यन्मघवन्नआप्यंवस्योअस्तिपिताचन॥ तरणिरि
त्सिषासतिवाजंपुरंध्यायुजा॥ आवइंद्रंपुरुहूतंनमेगिरानेमिंतष्टे
वसुद्र्वं॥२०॥ नदुष्टुतीमर्त्योविंदतेवसुनस्रेधंतंरयिर्नशत्॥ सुश
क्तिरिन्मघवंतुभ्यंदे यंयत्पार्येदिवि॥ अभित्वाशूरनोनुमोदुग्धा

मावते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इवधेनवः॥ईशानमस्य जगतः स्वर्दृशमीशानमिंद्र तस्थुषः॥नत्वावां
॥४१॥ अन्योदिव्योनपार्थिवोनजातोनजनिष्यते॥अश्वायंतोमघवन्निंद्र
वाजिनोगव्यंतस्त्वाहवामहे॥अभीषतस्तदाभरेंद्र ज्यायःकनीय
सः॥पुरूवसुर्हिमघवन्सनादसिभरेभरेचहव्यः॥पराणुदस्वमघ
वन्नमित्रान्सुवेदानोवसूकृधि॥अस्माकंबोध्यविताममहाध
नेभवावृधःसखीनां॥इंद्रक्रतुंनआभरपितापुत्रेभ्योयथा॥
शिक्षाणोअस्मि न्पुरु हूतयामनिजीवाज्योतिरशीम
हि॥मानोअज्ञातावृजनादुराध्योमाशिवासोअवक्रमुः॥ ॥४१॥
त्वयावयंप्रवतःशश्वतीरपोतिशूरतरामसि॥२१॥श्वित्यंचोमा

दक्षिणतस्कपर्दाधियंजिन्वासोअभिहिप्रमंदुः॥उत्तिष्ठन्वोचेपरि
बर्हिषोनॄन्नमेदूरादवितवेवसिष्ठाः॥दूरादिंद्रमनयंनासुतेनतिरो
वैशंतमतिपांतमुग्रं॥पाशद्युम्नस्यवायतस्यसोमात्सुतादिंद्रोवृणी
तावसिष्ठान्॥एवेन्नुकंसिंधुमेभिस्ततारेवेन्नुकंभेदमेभिर्जघान॥
एवेन्नुकंदाशराज्ञेसुदासंप्रावदिंद्रोब्रह्मणावोवसिष्ठाः॥जुष्टीन
रोब्रह्मणावःपितॄणामक्षमव्ययंनकिलारिषाथ॥यच्छक्करीषु
बृहतारवेणेंद्रेशुष्ममदधातावसिष्ठाः॥उद्द्यामिवेत्तृष्णजोनाथिता
सोदीधयुर्दाशराज्ञेवृतासः॥वसिष्ठस्यस्तुवतइंद्रोअश्रो
दुरुंतृत्सुभ्योअकृणोदुलोकं॥२२॥दंडाइवेद्गोअजनासऽन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥४२॥ आसन्यशिछिन्नाभरता अर्भकासः॥ अभवच्च पुरएता वसिष्ठ आदि
त्तृत्सूनां विशो अप्रथंत॥ त्रयः कृण्वंति भुवनेषु रेतस्तिस्रः प्रजा आ
र्याज्योतिरग्राः॥ त्रयो घर्मास उषसं सचंते सर्वां इत्तां अनु विदुर्वसि
ष्ठाः॥ सूर्यस्येव वक्षथो ज्योतिरेषां समुद्रस्येव महिमा गभीरः॥ वा
तस्येव प्रजवो नान्येन स्तोमो वसिष्ठा अन्वेतवे वः॥ त इन्निण्यं हृदय
स्य प्रकेतैः सहस्रवल्शमभि संचरंति॥ यमेन ततं परिधिं वयंतोप्स
रस उप सेदुर्वसिष्ठाः॥ विद्युतो ज्योतिः परि संजिहानं मित्रावरुणा
यदपश्यतां त्वा॥ तत्ते जन्मोतैकं वसिष्ठागस्त्यो यत्वा विश आ
जभार॥२३॥ उतासि मैत्रावरुणो वसिष्ठोर्वश्या ब्रह्मन्मनसोधि ४२

जातः॥ द्रप्सं स्कन्नं ब्रह्मणा दैव्येन विश्वेदेवाः पुष्करे त्वाददंत॥ स प्रकेत उ
भयस्य प्रविद्वान्सहस्रदान उत वा सदानः॥ यमेन ततं परिधिं वयि
ष्यन्नप्सरसः परि जज्ञे वसिष्ठः॥ सत्रे ह जाताविषिता नमोभिः कुंभे रे
तः सिषिचतुः समानं॥ ततो ह मान उदियाय मध्यात्ततो जातमृषि
माहुर्वसिष्ठं॥ उक्थभृतं सामभृतं बिभर्ति ग्रावाणं बिभ्रत्प्रवदात्य
ग्रे॥ उपैनमाध्वं सुमनस्यमाना आ वो गच्छाति प्रतृदो वसिष्ठः॥२४॥
प्र शुक्रैतु देवी मनीषा अस्मत्सुतष्टो रथो न वाजी॥ विदुः पृथिव्या दि
वो जनित्रं शृण्वंत्यापो अध क्षरंतीः॥ आपश्चिदस्मै पिन्वंत पृथ्वीर्वृत्रे
षु शूरा मंसंत उग्राः॥ आ धूर्ष्वस्मै दधाताश्वानिंद्रो न वज्री हिरण्यबा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥४३॥ ड्डु॥ अभिप्रस्थाताहेवयज्ञंयातेवपत्मंत्मनाहिनोत॥ त्मनासमत्सुहिनो
तयज्ञंदधातकेतुंजनायवीरं॥ उदस्यशुष्माद्भानुर्नार्तबिभर्तिभारंपृथि
वीनभूम॥ ह्वयामिदेवाँअयातुरग्नेसाधन्नृतेनधियंदधामि॥ अभिवो
देवींधियंदधिध्वंप्रवोदेवत्रावाचंकृणुध्वं॥ आचष्टआसांपाथोनदीनां
वरुणउग्रःसहस्रचक्षाः॥२५॥ राजाराष्ट्रानांपेशोनदीनामनुत्तमस्मै
क्षत्रंविश्वायु॥ अविष्टोअस्मान्विश्वासुविक्ष्वद्युंकृणोतशंसंनि
नित्सोः॥ व्येतुदिद्युद्द्विषामशेवायुयोतविष्वग्रपस्तनूनां॥ अवीनोअग्नि
र्हव्यान्नमोभिःप्रेष्ठोअस्माअधायिस्तोमः॥ सजूर्देवेभिरपान्नपा ४३
तंसखायंकृध्वंशिवोनोअस्तु॥ अब्जामुक्थैरहिंगृणीषेबुध्ने

नदीनांरजःसुषीदन्॥ मानोहिर्बुध्न्योरिषेधान्मायज्ञोअस्यस्रिधदृता
नृषु२ योः॥ उतनएषुश्रवोधुःप्ररायेयंतुशर्धंतोअर्यः॥ तपंतिशत्रुंस्वर्णभू
मामहासेनासोअमेभिरेषां॥ आयन्नःपत्नीर्गमंत्यच्छात्वष्टासुपाणिर्दधा
तुवीरान्॥२६॥ प्रतिनस्तोमंत्वष्टाजुषेतस्यादस्मेअरमतिर्वसूयुः॥ ता
नोरासन्रातिषाचोवसून्यारोदसीवरुणानीशृणोतु॥ वरूत्रीभिःश सु
रणोनोअस्तुत्वष्टासुदत्रोविदधातुरायः॥ तंनोरायःपर्वतास्तन्नआप
स्तद्रातिषाचओषधीरुतद्यौः॥ वनस्पतिभिःपृथिवीसजोषाउभेरोद
सीपरिपासतोनः॥ अनुतदुर्वीरोदसीजिहातामनुद्युक्षोवरुणइंद्रस
खा॥ अनुविश्वेमरुतोयेसहासोरायःस्यामधरुणंधियध्यै॥ तन्नइं
द्रोवरुणोमित्रोअग्निरापओषधीर्वनिनोजुषंत॥ शर्मन्त्स्याममम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं॰पं॰

॥५४॥ रुतामुपस्थेयूयं॥२७॥शंनइंद्राग्नीभवतामवोभिः शंनइंद्रावरुणारात
हव्या॥शमिंद्रासोमासुवितायशंयोः शंनइंद्रापूषणावाजसातौ॥शंनो
भगः शमुनः शंसोअस्तु शंनः पुरंधिः शमुसंतुरायः॥शंनः सत्यस्य
सुयमस्यशंसः शंनोअर्यमापुरुजातोअस्तु॥शंनोधाताशमुधर्त्ता
नोअस्तु शंनउरूचीभवतुस्वधाभिः॥शंरोदसीबृहतीशंनोअद्रिः
सुहवानिसंतु॥शंनोअग्निर्ज्योतिरनीकोअस्तु शंनोमित्रावरुणा
वश्विनाशं॥शंनः सुकृतांसुकृतानिसंतुशंनइषिरोअभिवातुवातः।
शंनोद्यावापृथिवीपूर्वहूतौशमंतरिक्षंदृशयेनोअस्तु॥शंनओष ॥५४॥
धीर्वनिनोभवंतुशंनोरजसस्पतिरस्तुजिष्णुः॥२८॥शंनइंद्रोवसुभि
शंनोदेवानां॰

र्देवोअस्तुशमादित्येभिर्वरुणः सुशंसः॥शंनोरुद्रोरुद्रेभिर्जलाषः
शंनस्त्वष्टाग्नाभिरिहशृणोतु॥शंनः सोमोभवतुब्रह्मशंनः शंनोग्रा
वाणः शमुसंतुयज्ञाः॥शंनः स्वरूणांमितयोभवंतुशंनः प्रस्वः श
म्वस्तुवेदिः॥शंनः सूर्यउरुचक्षाउदेतुशंनः श्चतस्रः प्रदिशोभवंतु॥
शंनः पर्वताध्रुवयोभवंतुशंनः सिंधवः शमुसंत्वापः॥शंनोअदिति
र्भवतुव्रतेभिः शंनोभवंतुमरुतः स्वर्काः॥शंनोविष्णुः शमुपूषानो
अस्तुशंनोभवित्रंशम्वस्तुवायुः॥शंनोदेवः सविताप्रायमाणः शं
नोभवंतूषसोविभातीः॥शंनः पर्जन्योभवतुप्रजाभ्यः शंनः क्षेत्र
स्यपतिरस्तुशंभुः॥२९॥शंनोदेवाविश्वदेवाभवंतुशंसरस्वतीस
हधीभिरस्तु॥शमभिषाचः शमुरातिषाचः शंनोदिव्याः पार्थि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥६५॥ वाः शंनो अप्याः ॥ शंनः सत्यस्य पतयो भवंतु शन्नो अर्वंतः शमु संतु गा
वः ॥ शंन ऋभवः सुकृतः सुहस्ताः शंनो भवंतु पितरो हवेषु ॥ शंनो अज
एकपाद्देवो अस्तु शंनो हिर्बुध्न्यः शं समुद्रः ॥ शंनो अपांनपात्पेरुरस्तु
शंनः पृश्निर्भवतु देवगोपा ॥ आदित्या रुद्रा वसवो जुषंतेदं ब्रह्म क्रीय
माणंनवीयः ॥ शृण्वंतु नो दिव्याः पार्थिवासो गोजाता उत ये यज्ञियासः ॥
ये देवानां यज्ञिया यज्ञियानां मनोर्यजत्रा अमृता ऋतज्ञाः ॥ ते नो रासं
तामुरुगायमद्य यूयं पात० ॥ ३० ॥ शंवती: पारयंत्येतं पृच्छति वचो युजा ।
अप्यारं तं यमांके वतुं यः एवेद मिति ब्रवत् ॥ मा साके तुं परिस्नुतं भा
रती ब्रह्म वर्द्धनी ॥ संज्ञाताना मही माता यः एवेद मिति ब्रवत् ॥ इंद्र स्ते ॥६५॥
किं विभुं प्रभुं भानुनेयं सरस्वती ॥ येन सूर्यमारोचयद्येनेमे रोदसी उभे ॥

जुषस्वाग्ने अंगिरः काण्वं मेध्यातिथिं ॥ मा त्वा सोमस्य बर्हिद्दत्सु नस्य म
धुमत्तमः ॥ त्वमग्ने अंगिरस्तम शोचस्व देववीतमः ॥ आ शंतमः शंतमा
भिरभिष्टिभिः शांतिस्वस्तिमकुर्वत ॥ शंनः कनिक्रदद्देवः पर्ज[illegible]न्यो अ
भिवर्षतु ॥ शंनो द्यावापृथिवी शं प्रजाभ्यः शन्न एधि द्विपदे शं चतुष्पदे ।
इति पंचमाष्टके तृतीयोध्यायः ॥ ॥ छ ॥ ॐ प्र ब्रह्मैतु सदनादृतस्य
विरश्मिभिः ससृजे सूर्यो गाः ॥ वि सानुना पृथिवी सस्र उर्वी पृथु प्रती
कमध्येधे अग्निः ॥ इमां वां मित्रावरुणा सुवृक्तिमिषंन कृण्व असुरान
वीयः ॥ इनो वामन्यः पदवीरदब्धो जनं च मित्रो यतति ब्रुवाणः ॥ आ वा
तस्य ध्रजतो रंतइत्या अपीपयंत धेनवो न सूदाः ॥ महो दिवः सदने जा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं॰ पं॰
॥५६॥

यमानो विकृदद्वषभः स स्मिंनू धन्॥ गिरायः एता युनजद्धरीत इंद्र प्रि
याखुरथा शूर धायू॥ म्र्योमन्युं रिरिक्षतो मिनात्यासुक्रतुमर्यमणं व
वृत्यां॥ यद्रुंतं अस्य सरखंवयश्वनमस्विनस्वकृतस्य धामन्॥ विष्टक्षो
वावधेन्नभिस्तवानद्रूदंनमोरुद्रायप्रेष्ठं॥२॥ आयत्साकं यशसोवाव
शानाः सरस्वती सप्तथी सिंधुमाता॥ याः सुष्वयंत सुदुघाः सुधारा अ
भिस्वेनपयसापीप्यानाः॥ उत त्येनोमरुतोमंदसाना धियंतोकं चवाजि
नोवंतु॥ मानः परि ख्यदक्षरा चरंत्यवी वृधन्युज्यं तेरयिन्नः॥ प्रवो
मही मरमतिंकृणुध्वं प्रपूषणं विदथ्यं नवीरं॥ भगं धियो वितारंनो
अस्याः सातौवाजंरातिषाचंपुरंधिं॥ अच्छायंवोमरुतः श्लोक एत्व ॥५६॥
च्छा विष्णुं निषिक्तपामवोभिः॥ उत प्रजायै गृणते वयो धुर्यूयं॥ २॥ आ

वोवाहिष्ठोवहतुस्तवध्यैरथोवाजाऋभुक्षणो अमृक्तः॥ अभि त्रिपृष्ठैः सवने
षु सोमैर्मदे सुशिप्रामहभिः पृणध्वं॥ यूयंहरत्नं मघवत्सु धत्थ स्वर्दृश ऋ
भुक्षणो अमृक्तं॥ संयज्ञेषु स्वधावंतः पिबध्वं विनोराधांसि मतिभिर्दयध्वं॥
उवोचिथ हि मघवं देष्णं महो अर्भस्य वसुनो विभागे॥ उभा ते पूर्णा वसुना
गभस्तीनसूनृता नियमते वसव्या॥ त्वमिंद्रः स्वयशा ऋभुक्षा वाजो न सा
धुरस्तमेष्यृक्वा॥ वयन्नु ते दाश्वांसः स्याम ब्रह्म कृण्वंतो हरिवोवसिष्ठाः॥
सनितासि प्रवतो दाशुषे चिद्याभिर्विवेषो हर्यश्वधीभिः॥ ववन्मानुते
युज्याभिरूती कदानइंद्र राय आदशस्येः॥३॥ वासयसीव वेधसस्त्वं
नः कदा न इंद्र वचसो बुबोधः॥ अस्तं तात्या धिया रयिं सुवीरं पृक्षो
नो अर्वान्युहीत वाजी॥ अभि यं देवी निर्ऋतिश्चिदीशे नक्षंत इंद्रं शरदः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥४७॥ सुदक्षः ॥ उप त्रिबंधुर्जरदष्टिमेत्यस्ववेशं यं कृणवंत मर्त्ताः ॥ आ नो राधांसि
सवितस्तवंध्या आ रायो यंतु पर्वतस्य रातौ ॥ सदा नो दिव्यः पायुः सिषक्तु
यूयं०॥ ४ ॥ उदु ष्य देवः सविता हिरण्ययी ममतिं याम शिश्रेत् ॥ नूनं भ ययाम३
गो हव्यो मानुषेभिर्वि यो रत्ना पुरूवसुर्दधाति ॥ उदु तिष्ठ सवितः श्रुध्य१
स्य हिरण्यपाणे प्रभृता वृतस्य ॥ व्यू१र्वीं पृथ्वीममतिं सृजान आ नृभ्यो
मर्तभोजनं सुवानः ॥ अपि ष्टुतः सविता देवो अस्तु यमा चिद्विश्वे वसवो
गृणंति ॥ स न स्तोमान्नमस्य१श्चनो धाद्विश्वेभिः पातु पायुभिर्नि सूरी
न् ॥ अभि यं देव्यदितिर्गृणाति सवं देवस्य सवितुर्जुषाणा ॥ अभि
सम्राजो वरुणो गृणंत्यभि मित्रासो [illegible] सजोषाः ॥ अभि ये मि ४७
अर्यमा॰

थो वनुषः सपंतेरातिं दिवो रातिषाचः पृथिव्याः ॥ अहिर्बुध्न्य उत नः शृ
णोतु वरूत्र्येकधेनुभिर्नि पातु ॥ अनु तं नो जास्पतिर्मंसीष्ट रत्नं देवस्य
सवितुरियानः ॥ भगमुग्रोवसे जोहवीति भगमनुग्रो अध याति र
त्नं ॥ शं नो भवंतु वाजिनो हवेषु देवताता मितद्रवः स्वर्काः ॥ जंभयंतो
हिं वृकं रक्षांसि सनेम्यस्मद्युयवन्नमीवाः ॥ वाजेवाजेवत वाजिनो
नो धनेषु विप्रा अमृता ऋतज्ञाः ॥ अस्य मध्वः पिबत मादयध्वं तृ
प्ता यात पथिभिर्देवयानैः ॥ ५ ॥ ऊर्ध्वो अग्निः सुमतिं वस्वो अ
श्रेत्प्रतीची जूर्णिर्देवतातिमेति ॥ भेजाते अद्री रथ्येव पंथामृतं होता
न इषितो यजाति ॥ प्र वावृजे सुप्रया बर्हिरेषामा विश्पतीव बीरि
६ ट याते ॥ विशामक्तोरुषसः पूर्वहूतौ वायुः पूषा स्वस्तये नियु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥४८॥ त्वान्॥उमयाअत्रवसवोरंतदेवाउरावंतरिक्षेमर्जयंतशुभ्राः॥अर्वाक्प
थउरुज्रयःकृणुध्वंश्रोतादूतस्यजग्मुषोनोअस्य॥तेहियज्ञेषुयज्ञि
यासऊमाःसधस्थंविश्वेअभिसंतिदेवाः॥तांअध्वरउशतोयक्ष्यग्ने
श्रुष्टीभगंनासत्यापुरंधिं॥आग्नेगिरोदिवआपृथिव्यामित्रंवह
वरुणमिंद्रमग्निं॥आर्यमणमदितिंविष्णुमेषांसरस्वतीमरुतोमा
दयंतां॥ररेहव्यंमतिभिर्यज्ञियानांनक्षत्कामंमर्त्यानामसिन्वन्॥
धातारयिमविदस्यंसदासांसक्षीमहियुज्येभिर्नुदेवैः॥नूरोदसी
अभिष्टुतेवसिष्ठैरृतावानोवरुणोमित्रोअग्निः॥यछंतुचंद्राउ
पमंनोअर्कंयूयंपातव॥६॥ओश्रुष्टिर्विदथ्यासमेतुप्रतिस्तोमंदधी
महितुराणां॥यदद्यदेवःसवितासुवातिस्यामास्यरत्निनोविभा ४८

गे॥मित्रस्तन्नोवरुणोरोदसीचद्युभक्तमिंद्रोअर्यमाददातु॥दिदेष्टुदे
व्यदितीरेक्णोवायुश्चयन्नियुवैतेभगश्च॥सेदुग्रोअस्तुमरुतः
सशुष्मीयंमर्त्यंपृषदश्वाअवाथ॥उतेमग्निःसरस्वतीजुनंतिन
तस्यरायःपर्येतास्ति॥अयंहिनेतावरुणऋतस्यमित्रोराजानोअ
र्यमापोधुः॥सुहवादेव्यदितिरनर्वा[illegible]तेनोअंहोअतिपर्षन्नरिष्टा
न्॥अस्यदेवस्यमीळ्हुषोवयाविष्णोरेषस्यप्र[illegible]भृथेहवि
र्भिः॥विदेहिरुद्रोरुद्रियंमहित्वंयासिष्टंवर्तिरश्विनाविरावत्।
मात्रपूषंनाघृणदूरस्योवरूत्रीयद्रातिषाचश्चरासन्॥मयो
भुवोनोअ[illegible]र्वंतोनिपांतुवृष्टिंपरिज्मावातोददातु॥नूरोदसी०॥
यछंतुचं०॥७॥प्रातरग्निंप्रातरिंद्रंहवामहेप्रातर्मित्रावरुणाप्रातरश्वि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पं॰सं॰

४९ नः॥प्रातर्भगंपूषणंब्रह्मणस्पतिंप्रातःसोममुतरुद्रंहुवेम॥प्रातर्जितंभ
गमुग्रंहुवेमवयंपुत्रमदितेर्योविधर्ता॥आध्रश्चिद्यंमन्यमानस्तुर
श्चिद्राजाचिद्यंभगंभक्षीत्याह॥भगप्रणेतर्भगसत्यराधोभगेमांधि
यमुदवाददन्नः॥भगप्रणोजनयगोभिरश्वैर्भगप्रनृभिर्नृवंतःस्याम॥
उतेदानींभगवंतःस्यामोतप्रपित्वउतमध्येअन्हां॥उतोदितामघवन्सू
र्यस्यवयंदेवानांसुमतौस्याम॥भगएवभगवांअस्तुदेवास्तेनव
यंभगवंतःस्याम॥तंत्वाभगसर्वइज्जोहवीतिसनोभगपुरएता
भवेह॥समध्वरायोषसोनमंतदधिक्रावेवशुचयेपदाय॥अ
र्वाचीनंवसुविदंभगंनोरथमिवाश्वावाजिनआवहंतु॥अश्वावती
र्गोमतीर्नऽउषासोवीरवतीःसदमुच्छंतुभद्राः॥घृतंदुहानावि ५९

स्ता श्वतःप्रपीतायूयं०॥८॥प्रब्रह्मणोअंगिरसोनक्षंतप्रक्रंदनुर्नभस्यवेतु॥प्रधे न्य
नवउदप्रुतोनवंतयुज्यातामद्रीअध्वरस्यपेशः॥सुगस्तेअग्नेसनवित्तो
अध्वायुक्ष्वासुतेहरितोरोहितश्च॥येवासद्मन्नरुषावीरवाहोहुवेदेवा
नांजनिमानिसत्तः॥समुवोयज्ञंमहयंनमोभिःप्रहोतामंद्रोरिरिचउपा
के॥यजस्वसुपुर्वणीकदेवानायज्ञियामरमतिंववृत्याः॥यदावीरस्यरे
वतोदुरोणेस्योनशीरतिथिराचिकेतत्॥सुप्रीतोअग्निःसुधितोदमः
आसविशेदातिवार्यंप्रियत्वै॥इमंनोअग्नेअध्वरंजुषस्वमरुत्स्विंद्रे
यशसंकृधीनः॥आनक्तावर्हिःसदतामुषासोशंतामित्रावरुणायजेह॥
एवाग्निंसहस्यं१वसिष्ठोरायस्कामोविश्वप्स्न्यस्यस्तौत्॥इषंरयिं
पप्रथद्वाजमस्मेयूयं०॥९॥प्रवोयज्ञेषुदेवयंतोअर्चंद्यावानमोभिःपृ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥५०॥ थिवीइ॒षध्यै॥ येषां ब्रह्माण्यसमानि विप्रा विष्वग्वियंति वनिनो न शाखाः॥
प्रयज्ञ एतु हेत्वो न सप्तिरुद्यच्छध्वं समनसो घृताचीः॥ स्तृणीत बर्हिरध्वरा
यसाधूर्ध्वा शोचींषि देवयून्यस्थुः॥ आ पुत्रासो न मातरं विभृत्राः सानौ
देवासो बर्हिषः सदंतु॥ आ विश्वाची विदथ्यामनक्त्वग्ने मा नो देवताता मृ
धस्कः॥ ते सीषपंत जोषमा यजत्रा ऋतस्य धाराः सुदुघा दुहानाः॥ ज्ये
ष्ठं वो अद्य मह आ वसूनामा गंतन समनसो यति ष्ठ॥ एवा नो अग्ने वि
क्ष्वा दशस्य त्वया वयं सहसावन्नास्क्राः॥ राया युजा सधमादो अरि
ष्टा यूयं०॥ १०॥ दधिक्रां वः प्रथममश्विनोषसमग्निं समिद्धं भगमू
तये हुवे॥ इंद्रं विष्णुं पूषणं ब्रह्मणस्पतिमादित्यान्द्यावापृथिवी अ ५०
पः स्वः॥ दधिक्रामु नमसा बोधयंत उदीराणा यज्ञमुपप्रयंतः॥ इळां देवीं

बर्हिषि सादयंतोश्विना विप्रा सुहवा हुवेम॥ दधिक्रावाणं बुबुधानो अग्निमु
प ब्रुव उषसं सूर्यं गां॥ ब्रध्नं मश्चतोर्वरुणस्य बभ्रुं ते विश्वास्मद्दुरिता या
वयंतु॥ दधिक्रावा प्रथमो वाज्यर्वाग्ने रथानां भवति प्रजानन्॥ संविदा
न उषसा सूर्येणादित्येभिर्वसुभिरंगिरोभिः॥ आ नो दधिक्राः पथ्यामन
क्तृतस्य पंथामन्वेतवा उ॥ शृणोतु नो दैव्यं शर्द्धो अग्निः शृण्वंतु वि
श्वे महिषा अमूराः॥ ११॥ आ देवो यातु सविता सुरत्नोंतरिक्षप्रा व
हमानो अश्वैः॥ हस्ते दधानो नर्या पुरूणि निवेशयंच प्रसुवंच भूम॥
उदस्य बाहू शिथिरा बृहंता हिरण्यया दिवो अंतां अनष्टां॥ नूनं सो
अस्य महिमा पनिष्ट सूरश्चिदस्मा अनु दादपस्यां॥ स घा नो देवः सवि
ता सहावा साविषद्वसुपतिर्वसूनि॥ विश्रयमाणो अमतिमुरूचीं म

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पं·सं·

॥५१॥

र्त्तभोजनमधरासतेनः॥ इमागिरःसवितारंसुजिह्वंपूर्णगभस्तिमीळतेसु
पाणिं॥ चित्रंवयोबृहदस्मेदधातुयूयं०॥१२॥ इमारुद्रायस्थिरधन्वनेगि
रः क्षिप्रेषवेदेवायस्वधा व्ने॥ अषाळ्हायसहमानायवेधसेतिग्मा
युधायभरताशृणोतुनः॥ सहिक्षयेणक्षम्यस्यजन्मनःसाम्राज्येनदि
व्यस्यचेतति॥ अवन्नवंतीरुपनोदुरश्चरानमीवोरुद्रजासुनोभव॥ या
तेदिद्युदवसृष्टादिवस्परिक्ष्मयाचरतिपरिसावृणक्तुनः॥ सहस्रं
तेस्वपिवातभेषजामानस्तोकेषुतनयेषुरीरिषः॥ मानोवधीरुद्रमा
परादामातेभूमप्रसितौहीळितस्य॥ आनोभजबर्हिषिजीवशंसेयू
यं०॥१३॥ आपोयंवःप्रथमंदेवयंतइंद्रपानमूर्मिमकृण्वतेळः॥ ५१
तंवोवयंशुचिमरिप्रमद्यघृतप्रुषंमधुमंतंवनेम॥ तन्मूर्मिमापोम

धुमत्तमंवोपांनपादवत्वाशुहेमा॥ यस्मिन्निंद्रोवसुभिर्मादयातेतमश्या
मदेवयंतोवोअद्य॥ शतपवित्राःस्वधयामदंतीर्देवीर्देवानामपियं
तिपाथः॥ ताइंद्रस्यनमिनंतिव्रतानिसिंधुभ्योहव्यंघृतवज्जुहोत॥
याःसूर्योरश्मिभिराततानया भ्यइंद्रोअरदद्गातुमूर्मिं॥ तेसिं
धवोवरिवोधातनानोयूयंपा०॥१४॥ ऋभुक्षणोवाजमादयध्वमस्मे
नरोमघवानःसुतस्य॥ आवोर्वाचःक्रतवोनयातांविभ्वोरथंव नर्यं
र्त्तयंतु॥ ऋभुर्ऋभुभिरभिवःस्यामविभ्वोविभुभिःशवसाशवांसि॥
वाजोअस्माँअवतुवाजसाताविंद्रेणयुजातरुषेमवृ त्रं॥ तेचि
द्धिपूर्वीरभिसंतिशासाविश्वाँअर्यउपरतातिवन्वन्॥ इंद्रोविभ्वाँऋ
भुक्षावाजोअर्यःशत्रोर्मिथत्याकृणवन्विनृम्णं॥ नूदेवासोवरिवः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वेम

सं·पं०

५२

कर्त्तनानोभूतानोविश्वेसजोषाः॥समस्मेदूर्षवसवोददीरन्यूयं०॥१५॥
समुद्रज्येष्ठाःसलिलस्यमध्यात्पुनानायंत्यनिविशमानाः॥इंद्रोया
वज्रीवृषभोररादताआपोदेवीरिहमामवंतु॥याऽआपोदिव्याउत
वास्रवंतिखनित्रिमाउतवायाःस्वयंजाः॥समुद्रार्थायाःशुचयः
पावकास्ताआपो०॥यासांराजावरुणोयातिमध्येसत्यान
तेअवपश्यंजनानां॥मधुश्चुतःशुचयोयाःपावकास्ताआ०॥
यासुराजावरुणोयातिमध्येसत्यानृतेअवपश्यंजनानां॥
सुसोमोविश्वेदेवायास्मूर्जंमदंति॥वैश्वानरोयास्वग्निःप्र
विष्टस्ताऽआपो०॥१६॥आमांमित्रावरुणेहरक्षतंकुलाय ५२
यद्विश्वयन्मानऽआगन्॥अजकावंदुर्दृशीकंतिरोदधेमामांपद्येन

रपसाविदत्सरुः॥यद्विजामन्परुषिवंदनंभुवदष्ठीवंतौपरि त्यौचदेहत्॥ कु
अग्निष्टछोचंनपबाधतामितोमामांपद्येनरपसाविदत्सरुः॥यच्छ म मलो
भवतियन्नदीषुयदोषधीभ्यःपरिजायतेविषं॥विश्वेदेवानिरितस्तत्सुवंतु
मामांपद्येनरपसाविदत्सरुः॥याःप्रवतोनिवतउद्वतउदन्वतीरनुदकाश्च
याः॥ताऽअस्मभ्यंपयसापिन्वमानाःशिवादेवीरशिपदाभवंतुसर्वा
नद्योअशिमिदाभवंतु॥१७॥आदित्यानामवसानूतनेनसक्षीमहिशर्मणा
शंतमेन॥अनागास्त्वेअदितित्वेतुरासइमंयज्ञंदधतुश्रोषमाणाः॥आदित्या
सोअदितिर्मादयंतांमित्रोअर्यमावरुणोरजिष्ठाः॥अस्माकंसंतुभुवन
स्यगोपाःपिबंतुसोममवसेनोअद्य॥आदित्याविश्वेमरुतश्चविश्वेदेवा
श्चविश्वऋभवश्चविश्वे॥इंद्रोअग्निरश्विनातुष्टुवानायूयं०॥१८॥
आदित्यासोअदितयःस्यामपूर्देवत्रावसवोमर्त्यत्रा॥सनेममित्रावरुणा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संपं॰

सनंतो भवेम द्यावापृथिवी भवंतः॥ मित्रस्तन्नो वरुणो मामहंत शर्म तोकाय तनय

५३ याय गोपाः॥ मा वो भुजेमान्यजातमेनो मा तत्कर्म वसवो यच्चयध्वे॥ तुरण्य

वो ऽंगिरसो नक्षंत रत्नं देवस्य सवितुरियानाः॥ पिता च तन्नो महान्यजत्रो वि

श्वे देवाः समनसो जुषंत॥ १९॥ प्र द्यावा यज्ञैः पृथिवी नमोभिः सबाध ईळे

बृहती यजत्रे॥ ते चिद्धि पूर्वे कवयो गृणंतः पुरो मही दधिरे देवपुत्रे॥ प्र पूर्व

जे पितरा नव्यसीभिर्गीर्भिः कृणुध्वं सदने ऋतस्य॥ आ नो द्यावापृथि

वी दैव्येन जनेन यातं महि वां वरूथं॥ उतो हि वां रत्नधेयानि संति पुरूणि

द्यावापृथिवी सुदासे॥ अस्मे धत्तं यदसदस्कृधोयु यूयं॰॥ २०॥ वा

स्तोष्पते प्रति जानीह्यस्मान्स्वावेशो अनमीवो भवा नः॥ यत्त्वेमहे प्रति ५३

तन्नो जुषस्व शं नो भव द्विपदे शं चतुष्पदे॥ वास्तोष्पते प्रतरणो न ए

धि गयस्फानो गोभिरश्वेभिरिंदो॥ अजरासस्ते सख्ये स्याम पितेव पुत्रान्प्रति नो

जुषस्व॥ वास्तोष्पते शग्मया संसदा ते सक्षीमहि रण्वया गातुमत्या॥ पाहि

क्षेम उत योगे वरं नो यूयं॰॥ २१॥ अमीवहा वास्तोष्पते विश्वा रूपाण्या

विशन्॥ सखा सुशेव एधि नः॥ यदर्जुन सारमेय दतः पिशंग यच्छसे।

वीव भ्राजंत ऋष्टय उप स्रक्वेषु बप्सतो नि षु स्वप॥ स्तेनं राय सारमेय तस्करं

वा पुनःसर॥ स्तोतॄनिंद्रस्य रायसि किमस्मान्दुच्छुनायसे नि षु स्वप॥ त्वं सू

करस्य दर्दृहि तव दर्दर्तु सूकरः॥ स्तोतॄ निं॰॥ सस्तु माता सस्तु पिता स

स्तु श्वा सस्तु विश्पतिः॥ ससंतु सर्वे ज्ञातयः सस्त्वयमभितो जनः॥ य आ

स्ते यश्च चरति यश्च पश्यति नो जनः॥ तेषां सं हन्मो अक्षाणि यथेदं हर्म्यं

था॥ सहस्रशृंगो वृषभो यः समुद्रादुदाचरत्॥ तेना सहस्येना वयं नि

जनान्स्वापयामसि॥ प्रोष्ठेशया वह्येशया नारीर्यास्तल्पशीवरीः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं॰पं॰

५४ स्त्रियो याः पुण्यगंधास्ताः सर्वास्स्वापयामसि ॥ २२ ॥ स्वप्नस्वप्नाधिकरणे सर्वं
निषापयाजनं ॥ आसूर्यमन्यांन्स्वापयव्युष्टं १ जाग्रियादहं ॥ भजंगरो
नामसर्पः सर्पिरविषोमहान् ॥ तस्यश्रुष्का कालिंधवस्तस्यगाधमशीम
हि ॥ कालिकोनामसर्पोनवनागसहस्त्रबलः ॥ यमुनन्हदेहसोजातो यो
नारायणवाहनः ॥ यदि कालिकदूतस्य यदि काः कालिकाद्भयो जन्मभूमि
मतिक्रांतो निर्विषो याति कालिकः ॥ आयाही द्रूपथिभिरीळिते भिर्यज्ञ
मिमंनो भागधेयं जुषस्व ॥ तत्तांजङ्कर्मी तुळस्येव योषा भागस्तेपैतृत्वसे
यी वपामिव ॥ यशस्करं बलवंतं प्रभुत्वं तमेव राजाधिपतिर्बभूव ॥ संकी
र्णनागा श्वपतिर्नराणां सुमंगल्यं सततं दीर्घमायुः ॥ कर्कोटकोनामसर्पो
योदृष्टी विषउच्यते ॥ तस्यसर्पस्य सर्पत्वं तस्मैसर्पनमोस्कृते ॥ २२ ॥ के ५४

दृ॑ंव्यक्तानरः सनीळारुद्रस्यमर्या अधास्वश्वाः ॥ नकिर्ह्येषां जनूं षिवेदते अंगवि
द्रे मिथो जनित्रं ॥ अभिस्वपूभिर्मिथो वपंत वातस्वन संश्येनाऽस्पृध्रन् ॥
के एतानिधीरोनिण्याचिकेत पृश्निर्यदूधो मही जभार ॥ सा विद्वुवीरा मरुद्भिरस्तु रस्तु
नात्स हंती पुष्यंतीन्रृण्मं ॥ यामेयेष्ठाः शुभाशोभिष्ठाः श्रिया संमिश्ला ओ
जोभिरुग्राः ॥ उग्रंवः ओजस्थिरा शवांस्यधामरुद्भिर्गणस्तु विष्मान्
॥ शुभ्रोवः शुष्मः क्रुध्मीमनांसि धुनिर्मुनिरिव शर्धस्य धृष्णोः ॥ सनेम्यस्म
द्युयोत दिद्युंमावोदुर्मतिरिह प्रणङ्नः ॥ प्रियावो नाममङ्घवेतुराणामायत्त
पन्मरुतो वावशानाः ॥ २२ ॥ स्वायुधासद्वष्मणः सुनिष्का उत स्वयं तन्व
ः शुंभमानाः ॥ शुची वो हव्यामरुतः शुचीनां शुचिं हिनोम्यध्वरं शुचि
भ्यः ॥ ऋतेन सत्यमृतसाप आयं शुचिजन्मानः शुचयः पावकाः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं॰पे॰ अंसेष्वामरुतःखादयोवोवक्षःसुरुक्माउपशिश्रियाणाः॥विविद्युतोन
५५ वृष्टिभीरुचानअनुस्वधामायुधैर्यच्छमानाः॥प्रबुध्न्यावईरतेमहांसिप्र
धे नामानिप्रयज्यवस्तिरध्वं॥सहस्रियंदम्यंभागमेतंगृहमेधीयंमरुतोजु
षध्वं॥यदिस्तुतस्यमरुतोअधीथेत्थाविप्रस्यवाजिनोहवीमन्॥मक्षूरायः
सुवीर्यस्यदातनूचिद्यमन्यआदभदरावा॥२४॥ अत्यासोनयेमरुतः
स्वंचोयक्षदृशोनशुभयंतमर्याः॥तेहर्म्येष्ठाःशिशवोनशुभ्रावत्सासोन
प्रक्रीळिनःपयोधाः॥दशस्यंतोनोमरुतोमृळंतुवरिवस्यंतोरोदसीसुमेके॥आ
मे रेगोहानृहावधोवोअस्तुसुम्नेभिरस्मेवसवोनमध्वं॥आवोहोताजोहवीति
सत्तःसत्राचींरातिंमरुतोगृणानः॥यईवतोवृषणोअस्तिगोपाःसोअ ५५
द्वयावीहवतेवउक्थैः॥इमेतुरंमरुतोरामयंतीमेसहःसहसआनमंति॥

मरुतो

इमेशंसंवनुष्यतोनिपांतिगुरुद्वेषोअररुषेदधंति॥इमेरध्रंचिन्मरुतोजुनंतिभृमिं
चिद्यथावसवोजुषंत॥अपबाधध्वंवृषणस्तमांसिधत्तविश्वंतनयंतोकमस्मे॥
॥२५॥मावोदात्रान्मरुतोनिररामभापश्चाद्दघ्मरथ्योविभागे॥आनःस्पार्हेभज
तनावसव्येयदींसुजातंवृषणोवोअस्ति॥संयद्धनंतमन्युभिर्जनासःशूरा
यह्वीष्वोषधीषुविक्षु॥अधस्मानोमरुतोरुद्रियासस्त्रातारोभूतपृतनास्वर्यः॥
भूरिचक्रमरुतःपित्र्याण्युक्थानियावःशस्यंतेपुराचित्॥मरुद्भिरुग्रःपृत
नासुसाळ्हामरुद्भिरित्सनितावाजमर्वा॥अस्मेवीरोमरुतःशुष्म्यस्तु नं
जनानांयोअसुरोविधर्ता॥अपोयेनसुक्षितयेतरेमाधस्वमोकोअभिव
स्याम॥तंनइंद्रोवरुणोमित्रोअग्निरापओषधीर्वनिनोजुषंत॥शर्म[redacted]
न्स्म्याममुपस्थेयूयं॰॥२६॥मध्वोवोनाममारुतंयजत्राःप्रयज्ञेषुशव
सामदंति॥येरेजयंतिरोदसीचिदुर्वीपिन्वंत्युत्संयदयासुरुग्राः॥निचे

मरुतो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मरुती॰

सं॰पं॰ ५६ तारो हि गृणंतं प्रणेतारो यजमानस्य मन्म ॥ अस्माकमद्य विदथेषु बर्हिरा वीतये
सदत पिप्रियाणाः ॥ नैतावदन्ये मरुतो यथेमे भ्राजंते रुक्मैरायुधैस्तनूभिः ।
आ रोदसी विश्वपिशः पिशानाः समानमंज्यंजते शुभे कं ॥ ऋधक्सा वो धृः
मरुतो दिद्युदस्तु यद्व आगः पुरुषता कराम ॥ मा वस्तस्यामपि भूमा यज
त्रा अस्मे वो अस्तु सुमतिश्चनिष्ठा ॥ कृते चिदत्र मरुतो रणंतानवद्यासः
शुचयः पावकाः ॥ प्र णोवत सुमतिभिर्यजत्राः प्र वाजेभिस्तिरत पुष्यसे
नः ॥ उत स्तुतासो मरुतो व्यंतु विश्वेभिर्नामभिर्नरो हवींषि ॥ ददात नो अ
मृतस्य प्रजायै जिगृत रायः सूनृता मघानि ॥ आ स्तुतासो मरुतो विश्व ऊ रामः
ती अछा सूरीन्सर्वताता जिगात ॥ ये नस्त्मना शतिनो वर्द्धयंति यूयं०॥ ५६
॥२७॥ प्र साकमुक्षे अर्चता गणाय यो दैव्यस्य धाम्नस्तुविष्मान् ।
उत क्षोदंति रोदसी महित्वा नक्षंते नाकं निर्ऋतेरवंशात् ॥ जनूश्चिद्वो मरुतस्त्वे

२

ष्येण भीमासस्तुविमन्यवोयासः ॥ प्र ये महोभिरोजसोत संति विश्वो वो या
मन्भयते स्वर्दृक् ॥ बृहद्वयो मघवद्भ्यो दधात जुजोषन्निन्मरुतः सुष्टुतिं नः ।
गतो नाध्वा वि तिराति जंतुं प्र णः स्पार्हाभिरूतिभिस्तिरेत ॥ युष्मोतो विप्रो
तो मरुतः शतस्वी युष्मोतो अर्वा सहुरिः सहस्री ॥ युष्मोतः सम्राळुत हंति वृ
त्रं प्र तद्वो अस्तु धूतयो देष्णं ॥ तां आ रुद्रस्य मीळ्हुषो विवासे कुविन्नंसं
ते मरुतः पुनर्नः ॥ यत्स्वस्ता जिहीळिरे यदाविरव तदेन ईमहे तुराणां ॥
प्र सा वाचि सुष्टुतिर्मघोनामिदं सूक्तं मरुतो जुषंत ॥ आराच्चिद्द्वेषो
वृषणो युयोत यूयं०॥२८॥ यं त्रायध्व इदमिदं देवासो यं च नयथ ॥
तस्मा अग्ने वरुण मित्रार्यमन्मरुतः शर्म यच्छत ॥ युष्माकं देवा अ
वसाहनि प्रिय ईजानस्तरति द्विषः ॥ प्र स क्षयं तिरते वि महीरि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं॰पं॰ योयोवोवरायदाशति॥ नहि वश्चरमंचन वसिष्ठः परिमंसते॥ अस्माक
॥५७॥ मद्यमरुतः सुतेसचा विश्वेपिबंत कामिनः॥ नहिवऊतिः पृतनासुम
ईतियस्माअराध्वंनरः॥ अभिवआवत्सुमतीयसी तूयेयात पिपीषवः॥
ओषुघृष्विराधसोयातनांधांसिपीतये॥ इमावोहव्यामरुतोररेहिकं
च मोष्वश्न्यांगंतन॥ आचनो बर्हिः सदताविताचनःस्पार्हाणिदातवेवसु।
अस्त्रेधंतोमरुतः सोम्येमधौस्वाहेहमादयाध्वै॥ २९॥ सस्व श्चिद्धि
म तन्वः शुंभमानाआहंसासोनीलपृष्ठाअपप्तन्॥ विश्वंशर्द्धो
अभितोमानिषेद्य नरोनरण्वाः सवनेमदंतः॥ योनोमरुतोऽभि
दुर्हृणायुस्तिरश्चित्तानिवसवोजिघांसति॥ द्रुहः पाशा ॥५७॥

न्प्रतिसमुचीष्टतपिष्ठेनहन्मनाहंतनातं॥ सांतपनाइदंहविर्मरुतस्तज्जुजुष्टना।
युष्माकोती रिशादसः॥ गृहमेधासऽआगतमरुतोमापभूतन॥ युष्मा
कोती सुदानवः॥ इहेहवः स्वतवसः कवयः सूर्यत्वचः॥ यज्ञंमरुतऽआ
वृणे॥ त्र्यंबकंयजामहे सुगंधिंपुष्टिवर्द्धनं॥ उर्वारुकमिवबंधनान्मृत्यो
र्मुक्षीयमामृतात्॥ ३०॥ इतिपंचमाष्टके चतुर्थोध्यायः॥ ओम्॥ यद
द्यसूर्यब्रवोनागाउद्यन्मित्रायवरुणायसत्यं॥ वयंदेवत्रादितेस्या
मतवप्रियासोऽअर्यमन्गृणंतः॥ एषस्यमित्रावरुणानृचक्षाउभे
उदेतिसूर्योअभिज्मन्॥ विश्वस्यस्थातुर्जगतश्चगोपाऋजुमर्त्तेषु श्व
वृजिनाचपश्यन्॥ अयुक्तसप्तहरितः सधस्थाद्याईसूर्यं घृ

सु वर्हीतु

सं॰पं॰ ताचीः॥ धामानि मित्रावरुणा युवाकुः संयो यूथेव जनिमानि चष्टे॥ उद्वांपृ
॥५[illegible]॥ क्षासो मधुमंतो अस्थुरा सूर्यो अरुहच्छुक्रमर्णः॥ यस्मा आदित्या अध्व
नोरदंति मित्रो अर्यमा वरुणः सजोषाः॥ इमे चेतारो अनृतस्य भूरेर्मि
त्रो ऽर्यमा वरुणो हि संति॥ इम ऋतस्य वावृधुर्दुरोणे शग्मासः पु
त्रा अदितेरदब्धाः॥ इमे मित्रो वरुणो दूळभासो ऽचेतसंचिच्चितयंति द
क्षैः॥ अपि क्रतुं सुचेतसं वतंतस्तिरश्चिदंहः सुपथा नयंति॥ ६॥ इमे
दिवो अनिमिषा पृथिव्याश्चिकित्वांसो अचेतसं नयंति॥ प्रव्राजे चि
न्नद्यो गाधमस्ति पारं नो अस्य वि[illegible]ष्पितस्य पर्षन्॥ यद्गोपावददि
तिः शर्म भद्रं मित्रो यच्छंति वरुणः सुदासे॥ तस्मिन्ना तोकं तन ॥५८॥

षि२

यं दधाना मा कर्म देवहेळनं तुरासः॥ अव वेदिं होत्राभिर्यजेत रिपः का
भि श्चिद्वरुणध्रुतः सः॥ परि द्वेषोभिरर्यमा वृणक्तूरुं सुदासे वृषणा उ लोकं॥
सस्वश्चिद्धि समृतिस्त्वेष्येषामपीच्येन सहसा सहंते॥ युष्मद्भिया वृ
षणो रेजमाना दक्षस्य चिन्महिना मृळता नः॥ यो ब्र[illegible]णे सुमतिमा ऋ४
यः। यजाते वाजस्य सातौ परमस्य रा[illegible]॥ सीक्षंत मन्युं मघवानो अर्य उरु
क्षयाय चक्रिरे सुधातु॥ इयं देव पुरोहितिर्युवभ्यां यज्ञेषु मित्राव
रुणावकारि॥ विश्वानि दुर्गा पिपृतं तिरो नो यूयं॥ २॥ उद्वां चक्षु
र्वरुण सुप्रतीकं देवयोरेति सूर्यस्ततन्वान्॥ अभि यो विश्वा भुव
नानि चष्टे स मन्युं मर्त्येष्वा चिकेत॥ प्र वां स मित्रावरुणावृतावा वि
प्रो मन्मानि दीर्घश्रुदियर्ति॥ यस्य ब्रह्माणि सुक्रतू अवाथ आ यत्क्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं॰पं॰ त्वान्नृआरदः पृणेथे॥ प्रोरो मित्रावरुणा पृथिव्याः प्रदिव ऋष्वाद्बृहतः सु
५९ दानू॥ स्पशोदधाथे ओषधीषु विक्ष्वृधग्यतो अनिमिषं रक्षमाणा॥
शंसा मित्रस्य वरुणस्य धाम शुष्मो रोदसी बद्बधे महित्वा॥ अयन्मासा
अयज्वनामवीराः प्र यज्ञमन्मा वृजनं तिराते॥ अमूरा विश्वा वृष
णा विमा वां न यासु चित्रं ददृशे न यक्षं॥ द्रुहः सचंते अनृता ज
नानां न वां निण्यान्यचिते अभूवन्॥ समु वां यज्ञं महयं नमोभि
र्हुवे वां मित्रावरुणा सबाधः॥ प्र वां मन्मान्यृचसे नवानि कृतानि
ब्रह्म जुजुषन्निमानि॥ इयं देव पुरो०॥ विश्वानि०॥ ३॥ उत्सूर्यो
बृहदर्चींष्यश्रेत्पुरु विश्वा जनिम मानुषाणां॥ समो दिवा ददृशे ५९
रोचमानः क्रत्वा कृतः सुकृतः कर्तृभिर्भूत्॥ स सूर्य प्रति पुरो

न उद्गा एभिः स्तोमेभिरेतशेभिरेवैः॥ प्र नो मित्राय वरुणाय वोचो ना
गसो अर्यम्णे अग्नये च॥ वि नः सहस्रं शुरुधो रदंत्वृतावानो वरु
णो मित्रो अग्निः॥ यच्छंतु चंद्रा उपमं नो अर्कमा नः कामं पूपुर
न्तु स्तवानाः॥ द्यावाभूमी अदिते त्रासीथां नो ये वां जज्ञुः सुजनि
मान ऋष्वे॥ मा हेळे भूम वरुण वायोर्मा मित्रस्य प्रियतमस्य नृणां॥
प्र बाहवा सिसृतं जीवसे न आ नो गव्यूतिमुक्षतं घृतेन॥ आ
नो जने श्रवयतं युवाना श्रुतं मे मित्रावरुणा हवेमा॥ नू मित्रो
वरुणो अर्यमा नस्त्मने तोकाय वरिवो दधंतु॥ सुगा नो विश्वा
सुपथानि संतु यूयं०॥ ४॥ उद्वेति सुभगो विश्वचक्षाः साधार
णः सूर्यो मानुषाणां॥ चक्षुर्मित्रस्य वरुणस्य देवश्चर्मेव यः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

से पे समविव्यक्तमों सि॥ उद्वेतिप्रसवीताजनानां महान्केतुरर्णवः सूर्यस्य।
समानं चक्रं पर्याविवृत्सन्यदेतशो वहति धूर्षुयुक्तः॥ विभ्राजमानः
॥६०॥ उषसामुपस्थाद्रेभैरुदेत्यनुमद्यमानः॥ एषमेदेवः सविताचछं
दयः समानं न प्र मिनातिधाम॥ दिवोरुक्मउरुचक्षाउदेतिदूरेअ
र्थस्तरणि र्भ्राजमानः॥ नूनंजनाः सूर्येणप्रसूताअयंनर्थानि
कृणवंनपांसि॥ यत्राचक्रुरमृतागातुमस्मैश्येनोनदीयन्नन्वे
तिपाथः॥ प्रतिवांसूरउदितेविधेमनमोभिर्मित्रावरुणोतहव्यैः
व्यैः॥ नूमित्रो०॥ [illegible] सुगानोविश्वा०॥५॥ दिवि
क्षयंताराजसः पृथिव्यांप्रवांघृतस्यनिर्णिजोददीरन्॥ हव्यं ६०
कार्युमा नोमित्रोवस्त्रम सुजातोराजासुक्षत्रोवरुणोजुषंत॥ आराजाना

महऋतस्यगोपासिंधुपतीक्षत्रियायातमर्वाक्॥ इळांनोमित्रावरुणो
तवृष्टिमवदिवइन्वतंजीरदानू॥ मित्रस्तन्नोवरुणोदेवोअर्यः प्रसाधि
ष्ठेभिः पथिभिर्नयंतु॥ ब्रवद्यथानआदरिः सुदासइषामदेमस
हदेवगोपाः॥ योवांगर्तंमनसातक्षदेतमूर्ध्वांधीतिंकृणवद्धारयच्च॥
उक्षेथांमित्रावरुणाघृतेनताराजानासुक्षितीं [illegible] स्तर्पयेथां॥ ए
षस्तोमोवरुणमित्रतुभ्यंसोमः शुक्रोनवायवेयामि॥ अविष्टंधि
योजिगृतंपुरंधीर्यू०॥६॥ प्रतिवांसूरउदितेसूक्तैर्मित्रंहुवेवरु
णंपूतदक्षं॥ ययोरसुर्यंमक्षितंज्येष्ठंविश्वस्ययामंनाचिता
जिगत्नु॥ ताहिदेवानामसुरातावर्यातानः क्षितीःकरतमूर्जयंतीः॥
अश्यामामित्रावरुणावयंवांद्यावाचयत्रपीपयन्नहाच॥ ताभूरिपा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं·पं· ग्रावन्नृतस्यसेतुर्दुरत्येतु रिपवेमर्त्याय॥ऋतस्यमित्रावरुणापथावाम
॥६१॥ पोननावादुरिता तरेम॥आनोमित्राहव्यजुष्टिंघृतैर्गव्यूतिमुक्षत
मिळ्हाभिः॥प्रतिवामत्रवरमाजनायपृणीतमुद्नोदिव्यस्यचारोः॥
एषस्तोमो०॥अविष्टं०॥७॥प्रमित्रयोर्वरुणयोस्तोमोनऽएतुशूष्यः॥
नमस्वांतुविजातयोः॥याधारयंतदेवाःसुदक्षादक्षपितरा॥असु
र्यायप्रमहसा॥तानस्तिपातनूपावरुणजरितॄणां॥मित्रसाध
यतंधियः॥यदद्यसूरउदितेनागामित्रोअर्यमा॥सुवातिसविताभ
स गः॥सुप्रावीरस्तुसक्षयःप्रनुयामन्त्सुदानवः॥येनोअंहोतिपि
प्रति॥८॥उतस्वराजोअदिति रदब्धस्यव्रतस्ययो॥महोरा

जानऽईशाते॥प्रतिवांसूरउदितेमित्रंगृणीषेवरुणं॥अर्यमणंरिशाद
सं॥रायाहिरण्ययामतिरियमवृकायशवसे॥इयंविप्रामेधसात
ये॥तेस्यामदेववरुणतेमित्रसूरिभिःसह॥इषंस्वश्चधीमहि॥
बहवःसूरचक्षसोग्निजिह्वाऋतावृधः॥त्रीणियेयेमुर्विदथानि
धीतिभिर्विश्वानिपरिभूतिभिः॥१०॥वियेदधुःशरदंमासमाद
६ हर्यज्ञमक्तुंचादृचं॥अनाप्यंवरुणोमित्रोअर्यमाक्षत्रंराजानऽआ
शत॥तद्वोअद्यमनामहेसूक्तैःसूरउदिते॥यदोहतेवरुणोमित्रो
अर्यमायूयमृतस्यरथ्यः॥ऋतावानऋतजाताऋतावृधोघोरा
सोअनृतद्विषः॥तेषांवःसुम्नंसुछर्दिष्टमंनरःस्यामयेचसूरयः॥
उदुत्यदर्शतंवपुर्दिवएतिप्रतिह्वरे॥यदीमाशुर्वहतिदेवएतशोवि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं पं॰ श्वस्मै च क्षसे अरं ॥ शीर्ष्णः शीर्ष्णो जगतस्तस्थुषस्पतिं समया विश्वमार
॥६२॥ जः ॥ सप्त स्वसारः सुविताय सूर्यं वहन्ति हरितो रथे ॥१५॥ तच्चक्षुर्देवहि
तं शुक्रमुच्चरत् ॥ पश्येम शरदः शतं जीवेम शरदः शतं ॥ काव्येभिरदा
भ्या यातं वरुण द्युमत् ॥ मित्रश्च सोमपीतये ॥ दिवो धामभिर्वरुण
मित्रश्चा यातमद्रुहा ॥ पिबतं सोममातुजी ॥ आ यातं मित्रावरुणा
जुषाणावाहुतिं नरा ॥ पातं सोममृतावृधा ॥१९॥ प्रति वां रथं नृ
पती जरध्यै हविष्मता मनसा यज्ञियेन ॥ यो वां दूतो न धिष्ण्यावजी
गरच्छा सूनुर्न पितरा विवक्मि ॥ अशोच्यग्निः समिधानो अस्मे
उपो अदृश्रं तमसश्चिदंताः ॥ अचेति केतुरुषसः पुरस्ताच्छ्रिये
दिवो दुहितुर्जायमानः ॥ अभि वां नूनमश्विना सुहोता स्तोमैः सि ६२

षक्ति नासत्या विवक्वान् ॥ पूर्वीभिर्यातं पथ्याभिरर्वाक् स्वर्विदा वसुमता
रथेन ॥ अवोर्वां नूनमश्विना युवाकुर्हुवे यद्वां सुते माध्वी वसूयुः ॥
आ वां वहंतु स्थविरासो अश्वाः पिबाथो अस्मे सुषुता मधूनि ॥ प्रा
चीमु देवाश्विना धियं मेऽमृध्रां सातये कृतं वसूयुं ॥ विश्वा अविष्टं
वाज आ पुरंधीस्ता नः शक्तं शचीपती शचीभिः ॥२२॥ अविष्टं
धीष्वश्विना न आसु प्रजावद्रेतो अह्रयं नो अस्तु ॥ आ वां तोके त
नये तूतुजानाः सुरत्नासो देववीतिं गमेम ॥ एष स्य वां पूर्वगत्वे
व सख्ये निधिर्हितो माध्वी रातो अस्मे ॥ अहेळता मनसा यातम
र्वाग् अश्नंता हव्यं मानुषीषु विक्षु ॥ एकस्मिन्योगे भुरणा समाने
परि वां सप्त स्रवतो रथो गात् ॥ न वायंति सुभ्वो देवयुक्ता ये

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं॰पं॰ ।।६३।। वांधूर्षुतरत्नायोवहंति।।असश्चतामघवद्भ्योहिभूतंयेरायामघदेयंजुनं
ति।।प्रयेबंधूंसूनृताभिस्तिरंतेगव्यापृंचंतोअश्व्यामघानि।।नूमेहवमा
शृणुतंयुवानायासिष्टंवर्तिरश्विनाविरावत्।।धत्तंरत्नानिजरतंचसू
रीन्यूयं०।।१३।।आशुभ्रायातमश्विनास्वश्वागिरोदस्राजुजुषाणायु
वाकोः।।हव्यानिचप्रतिभृतावीतंनः।।प्रवामंधांसिमद्यान्यस्थुररंगं
तंहविषोवीतयेमे।।तिरोऽअर्योहवनानिश्रुतंनः।।प्रवांरथोमनोज
वाइयर्तितिरोरजांस्यश्विनाशतोतिः।।अस्मभ्यंसूर्यावसूइयानः।।
अयंहयद्वांदेवयाउअद्रिरूर्ध्वोविवक्तिसोमसुद्युवभ्यां।।आव राम
ल्गूविप्रोववृतीतहव्यैः।।चित्रंहयद्वांभोजनंन्वस्तिन्यत्रयेमहि ६३
ष्मंतंयुयोतं।।योवामोमानंदधतेप्रियःसन्।।१४।।उतत्यद्वांजुर

तेअश्विनाभूच्च्यवानायप्रतीत्यंहविर्दे।।अधियद्वर्पइतऊतिधत्थः।।उ
तत्यंभुज्युमश्विनासखायोमध्येजहुर्दुरेवासःसमुद्रे।।निरींपर्षदरावा
योयुवाकुः।।वृकायचिज्जसमानायश[illegible]मुतश्रुतंशयवेहूयमाना।। रा
यावघ्न्यामपिन्वतमपोनस्तर्यंचिच्छक्त्यश्विनाशचीभिः।।एषस्यका
रुर्जरतेसूक्तैरग्रेबुधानउषसांसुमन्मा।।इषातंवर्धदघ्न्यापयोभिर्
यूयं०।।१५।।आवांरथोरोदसीबद्बधानोहिरण्ययोवृषभिर्यात्वश्वैः।
घृतवर्त्तनिःपविभीरुचानइषांवोळ्हानृपतिर्वाजिनीवान्।।सप
प्रथानोअभिपंचभूमात्रिवंधुरोमनसायातुयुक्तः।।विशोयेनगच्छ
थोदेवयंतीःकुत्राचिद्यामश्विनादधाना।।स्वश्वायशसायातम
र्वाग्दस्रानिधिंमधुमंतंपिबाथः।।विवांरथोवध्वायादमानोंतान्दिवो।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वां

सं.पं. बाधतेवर्तनिभ्यां॥युवोःश्रियंपरियोषावृणीततसूरोदुहितापरितक्म्या
६४ यां॥यद्देवयंतमवथःशचीभिःपरिघ्रंसमोमनांवयोगात्॥योह म२
स्यवांरथिरावस्तउस्रारथोयुजानःपरियातिवर्तिः॥तेननःशंयो
रुषसोव्युष्टौन्यश्विनावहतंयज्ञेअस्मिन्॥नरागौरेवविद्युतंतृषा
णास्माकमद्यसवनोपयातं॥पुरुत्राहिवांमतिभिर्हवंतेमावामन्ये
नियमंदेवयंतः॥युवंभुज्युमवविद्धंसमुद्रउदूहथुरर्णसोअस्रिधा
नैः॥पतत्रिभिरश्रमैरव्यथिभिर्दंसनाभिरश्विनापारयंता॥नूमे
हवमाशृणुतंयुवानायासिष्टंवर्तिरश्विनाविरावत्॥धत्तंरत्नानि ६४
जरतंचसूरीन्यूयं॥२६॥आविश्ववाराश्विनागतंनःप्रतत्स्था

नमवाचिवांपृथिव्यां॥अश्वोनवाजीशुनपृष्ठोअस्थादायत्सेदथु
र्ध्रुवसेनयोनिं॥सिषक्तिसावांसुमतिश्चनिष्ठातापिघर्मोमनुषोदुरो
तः णे॥योवांसमुद्रान्सरितःपिपर्त्येतग्वाचिंनसुयुजायुजानः॥यानि
पद्को स्थानान्यश्विनादधाथेदिवोयह्वीष्वोषधीषुविक्षु॥निपर्वतस्यमू
र्धनिसदंतेषंजनायदाशुषेवहंता॥चनिष्टंदेवाओषधीष्वप्सुयद्यो
ग्याअश्नवैथेऋषीणां॥पुरूणिरत्नादधतौन्यस्मेअनुपूर्वा
णिचख्यथुर्युगानि॥शुश्रुवांसाचिदश्विनापुरूण्यभिब्रह्माणि
चक्षाथेऋषीणां॥प्रतिप्रयातंवरमाजनायास्मेवामस्तु
सुमतिश्चनिष्ठा॥योवांयज्ञोनासत्याहविष्मान्कृतब्रह्मासम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०पं० योरुभवाति॥ उपप्रयातंवरमावसिष्ठमिमाब्रह्माण्यृच्यंतेयुवाभ्यां॥इ
॥६५॥ यंमनीषाइयमश्विनागीरिमांसुवृक्तिंवृषणाजुषेथां॥इमाब्रह्माणि
युवयून्यग्मन्यूयं०॥१७॥ अपस्वसुरुषसोनग्जिहीतेरिणक्तिकृ
ष्णीररुषायपंथां॥अश्वामघागोमघावांहुवेमदिवानक्तंशारुमस्म
द्युयोतं॥उपायातंदाशुषेमर्त्यायरथेनवाममश्विनावहंता॥युयु
युतमस्मदनिराममीवांदिवानक्तंमाध्वीत्रासीथांनः॥आवां
य रथमवमस्यांव्युष्टौसुम्नायवोवृषणोवर्तयंतु॥स्यूमगभस्तिमृ
तयुग्भिरश्वैराश्विनावसुमंतंवहेथां॥योवांरथोनृपतीअ
स्तिवोळ्हात्रिवंधुरोवसुमांउस्रयामा॥आनएनानासत्यो ६५

पयातमभियद्वांविश्वप्स्न्योजिगाति॥युवंच्यवानंजरसोमुमुक्तंनिपेदवऊ
हथुराशुमश्वं॥निरंहसस्तमसस्पर्तमत्रिंनिजाहुषंशिथिरेधातमंतः॥
इयंमनी०॥इमाब्रह्माणि०॥१८॥आगोमतानारथेनाश्वावतापुरुश्चंद्रे सत्या३
णयातं॥अभिवांविश्वानियुतःसचंतेस्पार्हयाश्रियातन्वाशुभाना॥आ
नोदेवेभिरुपयातमर्वाक्सजोषसानासत्यारथेन॥युवोर्हिनःसख्यापि
त्र्याणिसमानोबंधुरुततस्यवित्तं॥उदुस्तोमासोअश्विनोरबुध्रंजामिब्र
ह्माण्युषसश्चदेवीः॥आविवासन्रोदसीधिष्ण्येमेअछाविप्रोनास
त्याविवक्ति॥विचेदुछंत्यश्विनाउषासःप्रवांब्रह्माणिकारवोभरंते॥
ऊर्ध्वंभानुंसविताद्देवोअश्रेद्बृहदग्नयःसमिधाजरंते॥आपश्चातान्ना
सत्यापुरस्तादाश्विनायातमधरादुदक्तात्॥आविश्वतःपांचजन्येनरा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं.पं. याय्यूयेण॥२१॥ अतारिष्म तमसस्पारमस्य प्रतिस्तोमं देवयंतो दधानाः॥ पुरु
दंसा पुरुतमा पुराजामर्त्या हवते अश्विना गीः॥ न्यु प्रियो मनुषः सादि होता
॥६६॥ नासत्या यो यजते वंदते च॥ अश्नीतं मध्वो अश्विना उपाक आ वां वोचे विदथे
षु प्रयस्वान्॥ अहेम यज्ञं पथामुराणा इमां सुवृक्तिं वृषणा जुषेथां॥ श्रुष्टी
वेव प्रेषितो वामबोधि प्रतिस्तोमैर्जरमाणो वसिष्ठः॥ उप त्या वन्ही गम
तो विशं नो रक्षोहणा संभृता वीळुपाणी॥ स मंधांस्यग्मत मत्सराणि
मा नो मर्धिष्टमा गतं शिवेन॥ आ पश्चातात्॰॥ आ विश्वतः पांचजन्येन॰
॥२०॥ इमा उ वां दिविष्टय उस्रा हवंते अश्विना॥ अयं वामह्वेवसे शचीव
सू विशं विशं हि गच्छथः॥ युवं चित्रं ददथुर्भोजनं नरा चोदेथां सूनृता ६६
वते॥ अर्वाग्रथं समनसा नियच्छतं पिबतं सोम्यं मधु॥ आ यातमुपभू

षतं मध्वः पिबतमश्विना॥ दुग्धं पयो वृषणा जेन्यावसू मा नो मर्धिष्टमा गतं॥
अश्वासो ये वामुप दाशुषो गृहं युवां दीयंति बिभ्रतः॥ मक्षूयुभिर्नरा हये
भिरश्विना देवा यातमस्मयू॥ अधा ह यंतो अश्विना पृक्षः सचंत सूरयः॥
ता यंसतो मघवद्भ्यो ध्रुवं यशश्छर्दिरस्मभ्यं नासत्या॥ प्र ये ययुरवृका
सो रथाऽइव नृपातारो जनानां॥ उत स्वेन शवसा शूशुवुर्नर उत क्षियं
ति सुक्षितिं॥२१॥ व्युषा आवो दिविजा ऋतेनाविष्कृण्वाना महिमान
मागात्॥ अप द्रुहस्तम आवरजुष्टमंगिरस्तमा पथ्या अजीगः॥ म
हे नो अद्य सुविताय बोध्युषो महे सौभगाय प्र यंधि॥ चित्रं रयिं यशसं धे
ह्यस्मे देवि मर्तेषु मानुषि श्रवस्युं॥ एते त्ये भानवो दर्शता या श्चित्रा उषसो
अमृतासऽआगुः॥ जनयंतो दैव्यानि व्रतान्यापृणंतो अंतरिक्षा व्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं·पं· स्थुः॥ एषा स्या युजाना पराकात्पंच क्षितीः परि सद्यो जिगाति॥ अभिपश्यं
॥६७॥ ती वयुना जनानां दिवो दुहिता भुवनस्य पत्नी॥ वाजिनीवती सूर्यस्य
योषा चित्रामघा राय ईशे वसूनां॥ ऋषिष्टुता जरयंती मघोन्युषा उ
छति वह्निभिर्गृणाना॥ प्रति द्युतानामरुषासो अश्वाश्चित्रा अदृश्र
व न्नुषसं वहंतः॥ याति शुभ्रा विश्वपिशा रथेन दधाति रत्नं विधते जनाय॥
सत्या सत्येभिर्महती महद्भिर्देवी देवेभिर्यजता यजत्रैः॥ रुजद्दृळ्हा
नि ददद् उस्रियाणां प्रति गाव उषसं वावशंत॥ नू नो गोमद्वीरवद्धेहि र
त्नमुषो अश्वावत्पुरुभोजो अस्मे॥ मा नो बर्हिः पुरुषता निदे कर्यूयं०॥ ६७
॥२२॥ उदु ज्योतिरमृतं विश्वजन्यं विश्वानरः सविता देवो अश्रेत्॥ क्र

त्वा देवानामजनिष्ट चक्षुराविरकर्भुवनं विश्वमुषाः॥ प्र मे पंथा देवयाना अ
दृश्रन्नमर्धंतो वसुभिरिष्कृतासः॥ अभूदु केतुरुषसः पुरस्तात्प्रतीच्यागाद स्र
धि हर्म्येभ्यः॥ तानीदहानि बहुलान्यासन्या प्राचीनमुदिता सूर्यस्य॥
यतः परि जार इवाचरंत्युषो ददृक्षे न पुनर्यतीव॥ त इद्देवानां सधमा
द आसन्नृतावानः कवयः पूर्व्यासः॥ गूळ्हं ज्योतिः पितरो अन्वविंद
न्सत्यमंत्रा अजनयन्नुषासं॥ समान ऊर्वे अधि संगतासः संजा
तं नते न यतंते मिथस्ते॥ ते देवानां न मिनंति व्रतान्यमर्धंतो वसुभिर्याद
मानाः॥ प्रति त्वा स्तोमैरीळते वसिष्ठा उषर्बुधः सुभगे तुष्टुवांसः॥
गवां नेत्री वाजपत्नी न उछोषः सुजाते प्रथमा जरस्व॥ एषा नेत्री राध
सः सूनृतानामुषा उछंती रिभ्यते वसिष्ठैः॥ दीर्घश्रुतं रयिमस्मे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं॰पे॰ ॥६०॥ दधानायूयं०॥२३॥ उपोरुरुचेयुवतिर्नयोषाविश्वंजीवंप्रसुवंतीचरायै॥अ
भूदग्निःसमिधेमानुषाणामकर्ज्योतिर्बाधमानातमांसि॥ विश्वंप्रतीची
सप्रथाउदस्थाद्रुशद्वासोबिभ्रतीशुक्रमश्वैत्॥ हिरण्यवर्णासुदृशीक
संदृग्गवांमाताने त्र्यह्नामरोचि॥ देवानांचक्षुःसुभगावहंतीश्वेतंनयं
तीसुदृशीकमश्वं॥ उषाऽअदर्शिरश्मिभिर्व्यक्ताचित्रामघाविश्वमनु
प्रभूता॥ अंतिवामादूरेअमित्रमुछोर्वींगव्यूतिमभयंकृधीनः॥ यावयद्वे
षआभरावसूनिचोदयराधोगृणतेमघोनि॥ अस्मेश्रेष्ठेभिर्भानुभि
र्विभाह्युषोदेविप्रतिरंतीनऽआयुः॥ इषंचनोदधतीविश्ववारेगोमद
श्वावद्रथवच्चराधः॥ यांत्वादिवोदुहितर्व र्धयंत्युषःसुजातेमतिभि
र्वसिष्ठाः॥ सास्मासुधारयिमृष्वंबृहंतंयूयं०॥२४॥ प्रतिकेतवःप्रथ ६०
माअदृश्रन्नूर्ध्वाअस्याअंजयोविश्रयंते॥ उषोअर्वाचाबृहतारथेनज्योति
ष्मतावाममस्मभ्यंवक्षि॥ प्रतिषीमग्निर्जरतेसमिद्धःप्रतिविप्रासोमति
भिर्गृणंतः॥ उषायातिज्योतिषाबाधमानाविश्वातमांसिदुरितापदेवी॥
एताउत्याःप्रत्यदृश्रन्पुरस्ताज्ज्योतिर्यछंतीरुषसोविभातीः॥ अजीजनन्सू
र्यंयज्ञमग्निमपाचीनंतमोऽअगादजुष्टं॥ अचेतिदिवोदुहितामघोनीवि
श्वेपश्यंत्युषसंविभातीं॥ आस्थाद्रथंस्वधयायुज्यमानमायमश्वासःसु
युजोवहंति॥ प्रतित्वाद्यसुमनसोबुधंतास्माकासोमघवानोवयंच॥ ति
ल्विलायध्वमुषसोविभातीर्यूयं०॥२५॥ व्यु१षाआवःपथ्या३जनानां
पंचक्षितीर्मानुषीर्बोधयंती॥ सुसंदृग्भिरुक्षभिर्भानुमश्रेद्विसूर्यो
रोदसीचक्षसावः॥ व्यंजतेदिवोऽअंतेष्वक्तून्विशोनयुक्ताउषसोयतं
ते॥ संतेगावस्तमऽआवर्तयंतिज्योतिर्यछंतिसवितेवबाहू॥ अभूदुषा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं॰पं॰ इंद्रतमामघोन्यजीजनत्सुवितायश्रवांसि॥ विदिवोदेवीदुहितादधात्यंगि
॥६१॥ रस्तमासुकृतेवसूनि॥ तावदुषोराधोअस्मभ्यंरास्वयावत्स्तोतृभ्योअ
रदोगृणाना॥ यांत्वाजज्ञुर्वृषभस्यारवेणविदृह्ळस्यदुरोअद्रेरौर्णोः
॥ देवंदेवंराधसेचोदयंत्यस्मद्र्य क्सूनृताईरयंती॥ व्युछंतीनः
सनयेधियोधायूयं०॥ २६॥ प्रतिस्तोमेभिरुषसंवसिष्ठागीर्भिर्विप्रा
सःप्रथमाअबुध्रन्॥ विवर्त्तयंतीरजसीसमंतेआविष्कृण्वतीभुव
नानिविश्वा॥ एषास्यानव्यमायुर्दधानागूढ्वीतमोज्योतिषोषाअ
बोधि॥ अग्रएतियुवतिरह्रयाणा प्राचिकितत्सूर्यंयज्ञमग्निं॥
अश्वावतीर्गोमतीर्नउषासोवीरवतीः सदमुछंतुभद्राः॥ घृतं ६९

दुहानाविश्वतःप्रपीतायूयं०॥ २७॥ ॥ इतिपंचमाष्टकेपंचमोध्यायः॥
ओं॥ प्रत्युअदर्श्यायत्यु१छंतीदुहितादिवः॥ अपोमहिव्ययतिचक्ष
सेतमोज्योतिष्कृणोतिसूनरी॥ उदुस्त्रियाःस[illegible]तेसूर्यःसचाँउद्यन्नक्ष
त्रमर्चिवत्॥ तवेदुषोव्युषिसूर्यस्यचसंभक्तेनगमेमहि॥ प्रतित्वादु
हितर्दिवउषोजीराऽअभुत्स्महि॥ यावहसिपुरुस्पार्हंवनन्वतिरत्नंन
दाशुषेमयः॥ उछंतीयाकृणोषिमंहनामहिप्रख्यैदेविस्वर्दृशे॥ तस्या
स्तेरत्नभाजईमहेवयंस्याममातुर्नसूनवः॥ तच्चित्रंराधआभरोषोय
द्दीर्घश्रुत्तमं॥ यत्तेदिवोदुहितर्मर्तभोजनंतद्रा स्वभुनजामहै॥ श्र
वःसूरिभ्योअमृतंवसुत्वनंवाजाँअस्मभ्यंगोमतः॥ चोदयित्रीसू मघोन
नृतावत्युषाउछदपस्त्रिधः॥ १॥ इंद्रावरुणायुवमध्वरायनोविशेज

सं॰पं॰ नायमहिशर्मयच्छतं॥दीर्घप्रयज्युमतियोवनुष्यतिवयंजयेमपृतनासुदूढ्यः॥
॥७०॥ सम्राळन्यःस्वराळन्यउच्यतेवांमहान्ताविंद्रावरुणामहावसू॥विश्वेदेवा
सःपरमेव्योमनिसंवामोजोवृषणासंबलंदधुः॥अन्वपांखान्यतृंतमोज पां॰२
सासूर्यमैरयतंदिविप्रभुं॥इंद्रावरुणामदेअस्यमायिनोपिन्वतमपितः त
पिन्वतंधियः॥युवामिद्युत्सुपृतनासुवह्नयोयुवांक्षेमस्यप्रसवेमितज्ञ
वः॥ईशानावस्वउभयस्यकारवइंद्रावरुणासुहवाहवामहे॥इंद्राव
रुणायदिमानिचक्रथुर्विश्वाजातानिभुवनस्यमज्मना॥क्षेमेणमित्रो
वरुणंदुवस्यतिमरुद्भिरुग्रःशुभमन्यईयते॥२॥महेशुल्कायवरु
णस्यनुत्विषओजोमिमातेध्रुवमस्ययत्स्वं॥अजामिमन्यःश्नथयंतमा ७०
तिरद्दभ्रेभिरन्यःप्रवृणोतिभूयसः॥नतमंहोनदुरितानिमर्त्यमिंद्रा

वरुणानतपःकुतश्चन॥यस्यदेवागच्छथोवीथोअध्वरंनतंमर्तस्यनशतेपरि
ह्वृतिः॥अर्वाङ्नरादैव्येनावसागतंशृणुतंहवंयदिमेजुजोषथः॥युवोर्हि
सख्यमुतवायदाप्यंमार्डीकमिंद्रावरुणानियच्छतं॥अस्माकमिंद्रावरु
णाभरेभरेपुरोयोधाभवतंकृष्ट्योजसा॥यद्वांहवंतउभयेअधस्पृधिन
रस्तोकस्यतनयस्यसातिषु॥अस्मेइंद्रोवरुणोमित्रोअर्यमाद्युम्नंयच्छं
तुमहिशर्मसप्रथः॥अवध्रंज्योतिरदितेर्ऋतावृधोदेवस्यश्लोकंसवि
तुर्मनामहे॥३॥युवांनरापश्यमानासआप्यंप्राचागव्यंतःपृथुप
र्शवोययुः॥दासाचवृत्राहतमार्याणिचसुदासमिंद्रावरुणावसाव
तं॥यत्रानरःसमयंतेकृतध्वजोयस्मिन्नाजाभवतिकिंचनप्रियं॥य
त्राभयंतेभुवनास्वर्दृशस्तत्रानइंद्रावरुणाधिवोचतं॥संभूम्याअं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं॰पे॰ ताध्वसिरा अदृक्षतेंद्रावरुणा दिवि घोष आरुहत् ॥ अस्थुर्जनानामुप मामरात
७१ योर्वागवसा हवनश्रुता गतं ॥ इंद्रावरुणा वधनाभिरप्रति भेदं वन्वंता प्र सुदास
मावतं ॥ ब्रह्माण्येषां शृणुतं हवीमनि सत्या तृत्सूनामभवत्पुरोहितिः ॥ इं
द्रावरुणावभ्या तपंति माघान्यर्यो वनुषामरातयः ॥ युवं हि वस्व उभयस्य
राजथोध स्मा नोवतं पार्ये दिवि ॥४॥ युवां हवंत उभयास आजिष्विंद्रं च वस्वो
वरुणं च सातये ॥ यत्र राजभिर्दशभिर्निबाधितं प्र सुदासमावतं तृत्सुभिः
सह ॥ दश राजानः समिता अयज्यवः सु[illegible] समिंद्रावरुणा न युयुधुः ॥ स दा॰
त्या नृणामद्मसदामुपस्तुतिर्देवा एषामभवं देवहूतिषु ॥ दाशराज्ञे
इं॰ परियत्ताय विश्वतः सुदास[illegible]द्रावरुणावशिक्षतं ॥ श्वित्यंचो यत्र नम ७१
सा कपर्दिनो धिया धीवंतो असपंत तृत्सवः ॥ वृत्राण्य[illegible]ः समिथेषु न्य॰:१

जिघ्नते व्रतान्यन्यो अभि रक्षते सदा ॥ हवामहे वां वृषणा सुवृक्तिभि
रस्मे इंद्रावरुणा शर्म यछतं ॥ अस्मे इंद्रो वरुणो मित्रो अर्यमा द्युम्नं
यछंतु महि शर्म सप्रथः ॥ अवध्रं॰ ॥५॥ आ वां राजानावध्वरे ववृ
त्यां हव्येभिरिंद्रावरुणा नमोभिः ॥ प्र वां घृताची बाह्वोर्दधाना परि
त्मना विषुरूपा जिगाति ॥ युवो राष्ट्रं बृहदिन्वति द्यौर्यौ सेतृभिररु
ज्जुभिः सिनीथः ॥ परि नो हेळो वरुणस्य वृज्या उरुं न इंद्रः कृणव
दु लोकं ॥ कृतं नो यज्ञं विदथेषु चारुं कृतं ब्रह्माणि सूरिषु प्रशस्ता ॥
उपो रयिर्देवजूतो न एतु प्र णः स्पार्हाभिरूतिभिस्तिरेतं ॥ अस्मे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पं॰सं॰

॥७२॥ इंद्रावरुणा विश्ववारं रयिं धत्तं वसुमंतं पुरुक्षुं॥ प्र य आदित्यो अ
नृता मिनात्य मिता शूरो दयते वसूनि॥ इयमिंद्रं वरुणमष्ट
मे गीः प्रावत्तोके तनये तूतुजाना॥ सुरत्नासो देववीतिंग
मेमयूयं॰॥६॥ पुनीषे वामरक्षसं मनीषां सोममिंद्राय
वरुणाय जुह्वत॥ घृतप्रतीकामुषसं न देवीं ता नो यामं नुरु
ष्यताम भीके॥ स्पर्धंते वा उदेवहूये अत्र येषु ध्वजेषु दिद्य
वः पतंति॥ युवं तां इंद्रावरुणावमित्रान्हतं पराचः शार्वा विषू ७२
चः॥ आपश्चिद्धि स्वयशसः सदः सुदेवीरिंद्रं वरुणं दे

वताधुः॥ कृष्टीरन्यो धारयति प्रविक्ता वृत्राण्यन्यो अप्रतीनि हंति॥ स सुक्र
तुर्ऋतचिदस्तु होता य आदित्य शवसा वां नमस्वान्॥ आववर्तदवसे
वांहविष्मान सदित्सुवितायप्रयस्वान्॥ इयमिंद्रं॰॥ सुरत्नासो
देव॰॥७॥ धीरात्वस्य महिना जनूंषि वियस्तस्तंभ रोदसी चिदुर्वी॥ प्र
नाकमृष्वं नुनुदे बृहंतं द्विता नक्षत्रं पप्रथच्च भूम॥ उत स्वया तन्वा३ सं
वदे तत्कदान्वं१तर्वरुणे भुवानि॥ किं मे हव्यमहृणानो जुषेत कदाम
ळीकं सुमना अभिख्यं॥ पृ छे तदेनो वरुण दिदृक्षूपो एमि चिकि
तुषो विपृछं॥ समानमिन्मे कवयश्चिदाहुरयं ह तुभ्यं वरुणो हृ
णीते॥ किमाग आस वरुण ज्येष्ठं य स्तोतारं जिघांससि सखा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं॰पं॰ यं॥ प्रतन्मे वोचो दूळभस्वधावोवत्वानेनानमसातुरईयां॥ अवद्रुग्धानि पित्र्या
७३ सृजानोवयावयंचकृमातनूभिः॥ अवराजन्पशुतृपंनतायुंसृजावत्संन
दांनोवसिष्ठं॥ नसस्वोदक्षोवरुणध्रुतिःसासुरामन्युर्विभीदकोअ
चित्तिः॥ अस्तिज्यायान्कनीयसउपारेस्वप्नश्चनेदनृतस्यप्रयोता॥
अरंदासोनमीळ्हुषेकराण्यहंदेवायभूर्णयेनागाः॥ अचेतयदचि
तोदेवोअर्योगृत्संरायेकवितरोजुनाति॥ अयंसुतुभ्यंवरुणस्वधा
वोहृदिस्तोमउपश्रितश्चिदस्तु॥ शंनःक्षेमेशमुयोगेनोअस्तु
यूयं०॥ ८॥ रदत्पथोवरुणःसूर्यायप्रार्णांसिसमुद्रियानदीनां॥
सर्गोनसृष्टोअर्वतीऋतायंचकारमहीरवनीरहभ्यः॥ आत्माते ७३

वातोरजआनवीनोत्पशुर्नभूर्णिर्यवसेससवान्॥ अंतर्महीबृहतीरोदसी
मेविश्वातधामवरुणप्रियाणि॥ परिस्पशोवरुणस्यस्मदिष्टाउभेप
श्यंतिरोदसीसुमेके॥ ऋतावानःकवयोयज्ञधीराःप्रचेतसोयइषयं
तमन्म॥ उवाचमेवरुणोमेधिरायत्रिःसप्तनामाघ्न्याबिभर्ति॥ विद्वा
न्पदस्यगुह्यानवोचद्युगायविप्रउपरायशिक्षन्॥ तिस्रोद्यावोनिहि
ताअंतरस्मिंतिस्रोभूमीरुपराःषड्विधानाः॥ गृत्सोराजावरुणश्च
क्रएतंदिविप्रेंखं [illegible] हिरण्ययंशुभेकं॥ अवसिंधुंवरुणो
द्यौरिवस्थाद्द्रप्सोनश्वेतोमृगस्तुविष्मान्॥ गंभीरशंसोरजसोविमानः
सुपारक्षत्रःसतोअस्यराजा॥ योमृळयातिचक्रुषेचिदागोवयंस्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं॰पं॰

७४ मवरुणोचनागाः॥अनुव्रतान्यदितेर्ऋधंतोयूयं॰॥९॥प्रशुंध्युवंवरुणाय
प्रेष्ठांमतिंवसिष्ठमीळ्हुषेभरस्व॥यईमर्वांचंकरतेयजत्रंसहस्रामघं
वृषणंबृहंतं॥अधान्वस्यसंदृशंजगन्वानग्नेरनीकंवरुणस्यमं
सि॥स्वर्यदश्मन्नधिपाउअंधोभिमावपुर्दृशयेनिनीयात्॥आय
द्रुहावववरुणश्चनावंप्रयत्समुद्रमीरयावमध्यं॥अधियदपां
मिश्चरावप्रप्रेंखईंखयावहैशुभेकं॥वसिष्ठंहवरुणोनाव्याधा
दृषिंचकारस्वपामहोभिः॥स्तोतारंविप्रःसुदिनत्वेअन्हांया
नुद्यावस्ततनंन्यादुषासः॥क॰१त्यानिनौसख्याबभूवुःस ७४
चावहेयदवृकंपुराचित्॥बृहंतंमानंवरुणस्वधावःसहस्रद्वा

रंजगमागृहंते॥यआपिर्नित्योवरुणप्रियःसंत्वामागांसिकृणवःसखा
ते॥मातएनस्वंतोयक्षिन्भुजेमयंधिष्माविप्रस्तुवतेवरूथं॥ध्रुवासु
त्वासुक्षितिषुक्षियंतोव्य१स्मत्पाशंवरुणोमुमोचत्॥अवोवन्वा
नाअदितेरुपस्थायूयं॥१०॥मोषुवरुणमृन्मयंगृहंराजन्नहंगमं।
मृळासुक्षत्रमृळय॥१॥यदेमिप्रस्फुरन्निवदृतिर्नध्मातोअद्रिवः॥
मृळासु॰॥क्रत्वःसमहदीनताप्रतीपंजगमाशुचे॥मृळासु॰॥अ
पांमध्येतस्थिवांसंतृष्णाविदज्जरितारं॥मृळा॰॥यत्किंचेदंवरुण
दैव्येजनेभिद्रोहंमनुष्याश्चरामसि॥अचित्तीयत्तवधर्मायुयो
पिममानस्तस्मादेनसोदेवरीरिषः॥११॥प्रवीरयाशुचयोद

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं॰पं॰
॥७५॥

द्रिरे वामध्वर्युभिर्मधुमंतः सुतासः॥ वह वायो नियुतो याह्यच्छा पिबा सुतस्यां
धसो मदाय॥ ईशानाय प्रहुतिं यस्त आनट् शुचिं सोमं शुचिपास्तुभ्यं वायो
॥ कृणोषि तं मर्त्येषु प्रशस्तं जातोजातो जायते वाज्यस्य॥ राये नु यं जज्ञ
तू रोदसी मे राये देवी धिषणा धाति देवं॥ अध वायुं नियुतः सश्चत स्वा
उत श्वेतं वसुधितिं निरेके॥ उछंनुषसः सुदिना अरिप्रा उरु ज्योति
र्विविदुर्दीध्यानाः॥ गव्यं चिदूर्वमुशिजो वि वव्रुस्तेषामनु प्रदिवः
सस्रुरापः॥ ते सत्येन मनसा दीध्यानाः स्वेन युक्तासः क्रतुना वहं
ति॥ इंद्रवायू वीरवाहं रथं वामीशानयोरभि पृक्षः सचंते॥ ईशा ७५
नासो ये दधते स्वर्णो गोभिरश्वेभिर्वसुभिर्हिरण्यैः॥ इंद्रवायू सू

रयो विश्वमायुरर्वद्भिर्वीरैः पृतनासु सह्युः॥ अर्वंतो न श्रवसो भिक्षमा
णा इंद्रवायू सुष्टुतिभिर्वसिष्ठाः॥ वाजयंतः स्ववसे हुवेम यूयं॰॥२२॥
कुविदंग नमसा ये वृधासः पुरा देवा अनवद्यास आसन्॥ ते वा
यवे मनवे बाधितायावासयन्नुषसं सूर्येण॥ उशंता दूता न दभा
य गोपा मासश्च पाथः शरदश्च पूर्वीः॥ इंद्रवायू सुष्टुतिर्वामियाना
मार्डीकमीट्टे सुवितं च नव्यं॥ पीवो अन्नां रयिवृधः सुमेधाः
श्वेतः सिषक्ति नियुतामभिश्रीः॥ ते वायवे समनसो वि तस्थुर्वि
श्वेन्नरः स्वपत्यानि चक्रुः॥ यावत्तरस्तन्वो यावदोजो याव
न्नरश्चक्षसा दीध्यानाः॥ शुचिं सोमं शुचिपा पातमस्मे इंद्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं॰पं॰

॥७६॥ वायू सदतं बर्हिरिदं ॥ नियुवाना नियुतः स्पार्हवीरा इंद्रवायू सरथं
यातमर्वाक् ॥ इदं हि वां प्रभृतं मध्वो अग्रमध प्रीणाना वि मुमु
क्तमस्मे ॥ या वां शतं नियुतो याः सहस्रमिंद्रवायू विश्ववाराः
सचंते ॥ आभिर्यातं सुविदत्राभिर[illegible]क्पातं नरा प्रतिभृतस्य म र्वा
ध्वः ॥ अर्वंतो न० ॥ वाजयंतः० ॥ १३ ॥ आ वायो भूष शुचिपा उ
प नः सहस्रं ते नियुतो विश्ववार ॥ उपो ते अंधो मद्यमयामि य
स्य देव दधिषे पूर्वपेयं ॥ प्र सोता जीरो अध्वरेष्वस्थात्सोममिं
द्राय वायवे पिबध्यै ॥ प्र यद्वां मध्वो अग्रियं भरंत्यध्वर्यवो ७६
देवयंतः शचीभिः ॥ प्र याभिर्यासि दाश्वांसमच्छा नियुद्भिर्वा

यविष्टये दुरोणे ॥ नि नो रयिं सुभोजसं युवस्व नि वीरं गव्यमश्व्यं च राधः ॥
ये वायव इंद्रमादनास आदेवासो नितोशनासो अर्यः ॥ घ्नंतो वृत्राणि
सूरिभिः ष्याम सासह्वांसो युधा नृभिरमित्रान् ॥ आ नो नियुद्भिः श
तिनीभिरध्वरं सहस्रिणीभिरुप याहि यज्ञं ॥ वायो अस्मिन्सवने मा
दयस्व यूयं० ॥ १४ ॥ शुचिं नु स्तोमं नवजातमद्येंद्राग्नी वृत्रहणा जुषे
थां ॥ उभा हि वां सुहवा जोहवीमि ता वाजं सद्य उशते धेष्ठा ॥ ता सानसी
शवसाना हि भूतं साकंवृधा शवसा शूशुवांसा ॥ क्षयंतौ रायो य
वसस्य भूरेः पृंक्तं वाजस्य स्थविरस्य घृष्वेः ॥ उपो ह यद्विदथं वाजि
नो गुर्धीभिर्विप्राः प्रमतिमिच्छमानाः ॥ अर्वंतो न काष्ठां नक्षमाणा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं॰पं॰

७७ इंद्राग्नी जोऽकुवतो नरस्ते॥ गीर्भिर्विप्रः प्रमतिमिच्छमान ईट्टे रयिंय
शसं पूर्वभाजं॥ इंद्राग्नी वृत्रहणा सुवज्रा प्रनो नव्येभिस्तिरतं देष्णैः।
सं यन्मही मिथती स्पर्धमाने तनूरुचा शूरसाता यतैते॥ अदेवयुं विद
थे देवयुभिः सत्रा हतं सोमसुता जनेन॥१५॥ इमामु षु सोमसुति
मुप न एंद्राग्नी सौमनसाय यातं॥ नू चिद्धि परिमम्नाथे अस्माना
वा वां शश्वद्भिर्ववृती यद्वैः॥ सो अग्न एना नमसा समिद्धोच्छा मित्रं व
रुणमिंद्रं वोचेः॥ यत्सीमागश्चकृमा त[illegible] तत्सु मृळ तदर्यमादि
शि तिः श्रथंतु॥ एता अग्न आशुषाणास इष्टीर्युवोः सचा भ्यश्याम ७७
वाजान्॥ मेंद्रो नो विष्णुर्मरुतः परिख्यन्यूयं०॥१६॥ यूयं वा मस्य

यामश्शरणं न वृक्षं॥ अयमु ते सरस्वति वसिष्ठो द्वारावृतस्य सुभगे व्या
वः॥ वर्द्ध शुभ्रे स्तुवते रासि वाजान्यूयं०॥१७॥ बृहदु गायिषे वचो सु
र्या नदीनां॥ सरस्वतीमिन्महया सुवृक्तिभिः स्तोमैर्वसिष्ठ रोदसी॥
उभे यत्ते महिना शुभ्रे अंधसी अधिक्षियंति पूरवः॥ सा नो बोध्य
रा वित्री मरुत्सखा चोद धो मघोनां॥ भद्रमिद्भद्रा कृणवत्सरस्व
त्यकवारी चेतति वाजिनीवती॥ गृणाना जमदग्निवत्स्तुवाना च व
सिष्ठवत्॥ जनीयंतो न्वग्रवः पुत्रीयंतः सुदानवः॥ सरस्वंतं हवा
महे॥ ये ते सरस्व ऊर्मयो मधुमंतो घृतश्चुतः॥ तेभिर्नोऽविता भ
व॥ पीपिवांसं सरस्वतः स्तनं यो विश्वदर्शतः॥ भक्षीमहि प्रजा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं·पं०
॥७१॥
मिषं॥२०॥ यज्ञे दिवो नृषदने [illegible]पृथिव्या नरो यत्र देवयवो मदंति।
इंद्राय यत्र सवनानि सुन्वे गमन्मदाय प्रथमं वयश्च॥ आ दैव्यानि वृणी
महे वांसि बृहस्पतिर्नो मह आ सखायः॥ यथा भवेम मीढुषे अनागा
यो नो दाता परावतः पितेव॥ तमु ज्येष्ठं नमसा हविर्भिः सुशेवं ब्रह्मण
स्पतिं गृणीषे॥ इंद्रं श्लोको महि दैव्यः सिषक्तु यो ब्रह्मणो देवकृतस्य
राजा॥ सऽआ नो योनिं सदतु प्रेष्ठो बृहस्पतिर्विश्ववारो यो अस्ति॥
कामो रायः सुवीर्यस्य तं दात्पर्षनो अति सश्चतो अरिष्टान्॥ तमा
नो अ[illegible]र्कममृताय जुष्टमिमे धासुरमृतासः पुराजाः॥ शुचिक्रं
दं यजतं पस्त्यानां बृहस्पतिमनर्वाणं हुवेम॥२१॥ तं शग्मासो अ ७९

रुषासो अश्वा बृहस्पतिं सहवाहो वहंति॥ सहश्चिद्यस्य नीलवत्सधस्थं नभो न
रूपमरुषं वसानाः॥ स हि शुचिः शतपत्रः स शुंध्युर्हिरण्यवाशीरिषिरः स्वर्षाः॥
॥ बृहस्पतिः स स्वावेश ऋष्वः पुरू सखिभ्य आसुतिं करिष्ठः॥ देवी देवस्य रो
दसी जनित्री बृहस्पतिं वावृधतुर्महित्वा॥ दक्षाय्याय दक्षता सखायः कर
वें द्ब्रह्मणे सुतरा सुगाधा॥ इयं वां ब्रह्मणस्पते सुवृक्तिर्ब्रह्मेंद्राय वज्रिणे॥
अकारि॥ अविष्टं धियो जिगृतं पुरंधीर्जजस्तमर्यो वनुषामरातीः॥ बृ
हस्पते युवमिंद्रश्च वस्वो दिव्यस्येशाथे उत पार्थिवस्य॥ धत्तं रयिं स्तु २
वते कीरये चिद्यूयं०॥२२॥ अध्वर्यवोरुणं दुग्धमंशुं जुहोतन वृषभा
य क्षितीनां॥ गौराद्वेदीयां अवपानमिंद्रो विश्वाहेद्याति सुतसोममि
च्छन्॥ यद्दधिषे प्रदिवि चार्वन्नं दिवे दिवे पीतिमिदस्य वक्षि॥ उत हृदो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०पं० तमनसान्नुषाण उन्नन्निंद्रप्रस्थितान्पाहिसोमान्॥जज्ञानःसोमंसहसेप
॥८०॥ पाथप्रतेमातामहिमानमुवाच॥एंद्रपप्राथोर्वंतरिक्षंयुधादेवेभ्योव
रिवश्चकर्थ॥यद्योधयामहतोमन्यमानान्साक्षामतान्बाहुभिः
शाशदानान्॥यद्वानृभिर्वृतइंद्राभियुध्यास्तंत्वयाजिंसौश्रव
संजयेम॥प्रेंद्रस्यवोचंप्रथमाकृतानिप्रनूतनामघवायाचकार॥
॥यदेददेवीरसहिष्टमायाअथाभवत्केवलःसोमोअस्य॥तवेदं
विश्वमभितःपशव्यंयत्पश्यसिचक्षसासूर्यस्य॥गवामसि
गोपतिरेकइंद्रभक्षीमहितेप्रयतस्यवस्वः॥बृहस्प०॥ध्नंतरथिं ८०
वृते कीणा॥२७॥परोमात्रयातन्वावृधाननतेमहित्वमन्वश्नुवंति॥उभे
ति३

तेविद्मरजसीपृथिव्याविष्णोदेवत्वंपरमस्यवित्से॥नतेविष्णोजायमा
नोनजातोदेवमहिम्नःपरमंतमाप॥उदस्तभ्नानाकमृष्वंबृहंतं
दाधर्थप्राचींककुभंपृथिव्याः॥इरावतीधेनुमतीहिभूतंसूय
वसिनीमनुषेदशस्या॥व्यस्तभ्नारोदसीविष्णवेतेदाधर्थ
पृथिवीमभितोमयूखैः॥उरुंयज्ञायचक्रथुरुलोकंजन
यंतासूर्यमुषासमग्निं॥दासस्यचिद्वृषशिप्रस्यमायाजघ्नथु
र्नरापृतनाज्येषु॥इंद्राविष्णूदृंहिताःशंबरस्यनवपुरोनव
तिंचश्नथिष्टं॥शतंवर्चिनःसहस्रंचसाकंहथोअप्रत्यसु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं·पं·

८१ रस्य वीरान्॥ इयं मनीषा बृहती बृहंतोरुक्रमा तवसं वर्द्धयंती॥
ररे वां स्तोमं विदथेषु विष्णो पिन्वत मिषो वृजनेष्विंद्रा॥ वष
ट्ते विष्णवास आकृणोमि तन्मे जुषस्व शिपिविष्ट हव्यं॥ वर्द्ध
तु त्वा सुष्टुतयो गिरो मे यूयं पा॥२४॥ नू मर्तो दयते सनिष्यन्यो
विष्णव उरुगायाय दाशत्॥ प्र यः सत्राचा मनसा यजात ए
तावंतं नर्यमाविवासात्॥ त्वं विष्णो सुमतिं विश्वजन्यामप्रयु
तामेवयावो मतिं दाः॥ पर्चो यथा नः सुवितस्य भूरेरश्वाव ८१

तः पुरुश्चंद्रस्य रायः॥ त्रिर्देवः पृथिवीमेष एतां विचक्रमे शतर्चसं
महित्वा॥ प्र विष्णुरस्तु तवसस्तवीयांत्वेषं ह्यस्य स्थविरस्य ना
म॥ विचक्रमे पृथिवीमेष एतां क्षेत्राय विष्णुर्मनुषे दशस्य
न्॥ ध्रुवासो अस्य कीरयो जनास उरुक्षितिं सुजनिमा
चकार॥ प्र तत्ते अद्य शिपिविष्ट नामार्यः शंसामि वयुना
नि विद्वान्॥ तं त्वा गृणामि तवसमतव्यान्क्षयंतमस्य
रजसः पराके॥ किमित्ते विष्णो परिचक्ष्यं भूत्प्र यद्व

सं·पं·

८२ क्षेशिपिविष्टोअस्मि॥मावर्पोअस्मदपगूहएतद्यदन्य

रूपःसमिथेबभूथ॥वषंट्तेविष्णवासआकृणोमि

तन्मेजुषस्वशिपिविष्टहव्यं॥वर्द्धंतुत्वासुष्टुतयोगिरो

मेयूयंपातस्वस्तिभिःसदानः॥२५॥ ॥इतिपंचमा

ष्टकेषष्ठोध्यायः॥ छ॥ हरिःओम्॥ तिस्रोवाचःप्र राम

वदज्योतिरग्रायाएतद्दुह्रेमधुदोघमूधः॥सवत्सं ८२

कृण्वनगर्भमोषधीनांसद्योजातोवृषभोरोरवीति॥

अपांयो

योवर्द्धनओषधीनांयोविश्वस्यजगतोदेवईशे॥सत्रिधातुशरणंशर्म

यंसत्त्रिवर्तुज्योतिःस्वभिष्ट्यस्मे॥ स्तरीरुत्वद्भवतिसूतउत्वद्य

थावशंतन्वंचक्रएषः॥पितुःपयःप्रतिगृभ्णातिमातातेनपितावर्

द्धतेतेनपुत्रः॥यस्मिन्विश्वानिभुवनानितस्थुस्तिस्रोद्यावस्

त्रेधासस्रुरापः॥त्रयःकोशासउपसेचनासोमध्वश्चोतंत्यभि

तोविरप्शं॥इदंवचःपर्जन्यायस्वराजेहृदोअस्त्वंतरंतज्जुजो

षत्॥मयोभुवोवृष्टयःसंत्वस्मेसुपिप्पलाओषधीर्देवगोपाः॥

सरेतोधावृषभःशश्वतीनांतस्मिन्नात्माजगतस्तस्थुषश्च॥तन्म

ऋतंपातुशतशारदाययूयं०॥२॥पर्जन्यायप्रगायतदिवस्पुत्रा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं·पं·

॥८३॥ यमीळ्हुषे॥ सनोयवसमिच्छतु॥ योगर्भमोषधीनांगवांकृणोत्य
र्वतां॥ पर्जन्यःपुरुषीणां॥ तस्माइदास्येहविर्जुहोतामधुमत्त
मं॥ इळांनःसंयतंकरत्॥२॥ संवत्सरंशशयानाब्राह्मणाव्रतचा
रिणः॥ वाचंपर्जन्यजिन्वितांप्रमंडूकाअवादिषुः॥ दिव्याआपो
अभियदेनमायंदृतिंनशुष्कंसरसीशयानं॥ गवामहनमा
युर्वत्सिनीनांमंडूकानांवग्नुरत्रासमेति॥ यदीमेनांउशतोअभ्य
वर्षीत्तृ॥ ष्यावतःप्रावृष्यागतायां॥ अख्खलीकृत्यापितरं
नपुत्रोअन्योअन्यमुपवदंतमेति॥ अन्योअन्यमनुगृभ्णा ८३

त्येनोरपांप्रसर्गेयदमंदिषातां॥ मंडूकोयदभिवृष्टःकनिष्क
न्पृश्निःसंपृंक्तेहरितेनवाचं॥ यदेषामन्योअन्यस्यवाचंशाक्त
स्येववदतिशिक्षमाणः॥ सर्वंतदेषांसमृधेवपर्वयत्सुवाचो
वदथनाध्यप्सु॥३॥ गोमायुरेकोअजमायुरेकःपृश्निरेको
हरितएकएषां॥ समानंनामबिभ्रतोविरूपाःपुरुत्रावाचंपि
पिशुर्वदंतः॥ ब्राह्मणासोअतिरात्रेनसोमेसरोनपूर्णमभि
तोवदंतः॥ संवत्सरस्यतदहःपरिष्ठयन्मंडूकाःप्रावृषीणं
बभूव॥ ब्राह्मणासःसोमिनोवाचमक्रत ब्रह्मकृण्वंतः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं·पं·
॥८७॥ परिवत्सरीणं॥ अध्वर्यवो घर्मिणः सिष्विदाना आविर्भवंति
गुह्या न के चित्॥ देवहितिं जुगुपुर्द्वादशस्य ऋतुं नरो न प्रमि
नंत्येते॥ संवत्सरे प्रावृष्यागतायां तप्ता घर्मा अश्नुवते विसर्गं॥
गोमायुरदादजमायुरदात्पृश्निरदाद्धरितो नो वसूनि॥ ग
वां मंडूका ददतः शतानि सहस्रसावे प्रतिरंत आयुः॥ उपप्लु
द३ वं मंडूकी वर्षमा वद ताडुरि॥ मध्ये ह्रदस्य प्लवस्व विगृह्य
ह्य चतुरः परः॥ ६॥ इंद्रासोमा तपतं रक्ष उब्जतं न्यर्पयतं ८७
वृषणा तमोवृधः॥ परा शृणीतमचितो न्योषतं हतं नुदेथां

निशिशीतमत्रिणः॥ इंद्रासोमा समघशंसमभ्य१घं तपुर्ययस्तु
चरुरग्निवां इव॥ ब्रह्मद्विषे क्रव्यादे घोरचक्षसे द्वेषो धत्तमन
वायं किमीदिने॥ इंद्रासोमा दुष्कृतो वव्रे अंतरनारंभणे तमसि
प्रविध्यतं॥ यथा ना... तः पुनरेकश्चनोदयत्तद्वामस्तु सहसे
मन्युमच्छवः॥ इंद्रासोमा वर्तयतं दिवो वधं सं पृथिव्या अघशं
साय तर्हणं॥ उत्तक्षतं स्वर्य१ं पर्वतेभ्यो येन रक्षो वावृधानं निजू नि
र्वथः॥ इंद्रासोमा वर्तयतं दिवस्पर्यग्नितप्तेभिर्युवमश्महन्मभिः॥
तपुर्वधेभिरजरेभिरत्रिणो निपर्शाने विध्यतं यंतु निस्वरं॥ ५॥
प

सं॰पं॰

॥८५॥ इंद्रासोमापरिवांभूतुविश्वतइयंमतिःकक्ष्याश्वेववाजिना॥यां
वांहोत्रांपरिहिनोमिमेधयेमाब्रह्माणिनृपतीवजिन्वतं॥प्रति
स्मरेथांतुजयद्भिरेवैर्हतंद्रुहोरक्षसोभंगुरावतः॥इंद्रासोमादु
ष्कृतेमासुगंभूद्योनःकदाचिदभिदासतिद्रुहा॥योमापाकेनम
नसाचरंतमभिचष्टेअनृतेभिर्वचोभिः॥आपइवाकाशिनासं
गृभीताअसन्नस्त्वासतइंद्रवक्ता॥येपाकशंसंविहरंतएवैर्ये
वाभद्रंदूषयंतिस्वधाभिः॥अहयेवातान्प्रददातुसोमआवा
दधातुनिर्ऋतेरुपस्थे॥योनोरसंदिप्सतिपित्वोअग्नेयोअ ८५

श्वानांयोगवांयस्तनूनां॥रिपुस्तेनस्तेयकृद्दभ्रमेतुनिषहीय
तांतन्वातनाच॥१०॥परःसोअस्तुतन्वातनाचतिस्रःपृथि
वीरधोअस्तुविश्वाः॥प्रतिशुष्यतुयशोअस्यदेवायोनोदि
वादिप्सतियश्चनक्तं॥सुविज्ञानंचिकितुषेजनायसच्चास
च्चवचसीपस्पृधाते॥तयोर्यत्सत्यंयतरदृजीयस्तदित्सोमो
वतिहंत्यासत्॥नवाउसोमोवृजिनंहिनोतिनक्षत्रियंमिथुया
धारयंतं॥हंतिरक्षोहंत्यासद्वदंतमुभाविंद्रस्यप्रसितौश
याते॥यदिवाहमनृतदेवआसमोघंवादेवाँअप्यूहेअग्ने॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं.पं. किमस्मभ्यंजातवेदोहृणीषेद्रोघवाचस्तेनिर्ऋथंसचंतां॥अद्यामुरी ऋं ७
८६ ययदियातुधानोअस्मियदिवायुस्तंपपूरुषस्य॥अधासवी त२
रैर्दशभिर्वियूयायोमामोघंयातुधानेत्याह॥७॥योमायातुंया
तुधानेत्याहयोवारक्षाःशुचिरस्मीत्याह॥इंद्रस्तंहंतुमहतावु
धेनविश्वस्यजंतोरधरमस्पदीष्ट॥प्रयाजिगातिखर्गलेवन
क्तमपद्रुहातन्वंगूहमाना॥वव्रांअनंतांअवसापदीष्टग्रा
वाणोघ्नंतुरक्षसउपब्दैः॥वितिष्ठध्वंमरुतोविक्ष्वीछ ८६
तगृभायतरक्षसःसंपिनष्टन॥वयोयेभूत्वीपतयंति

नक्तभिर्येवारिपोदधिरेदेवेअध्वरे॥प्रवर्त्तयदिवोअश्मानमिंद्रसोम
शितंमघवन्संशिशाधि॥प्राक्तादपाक्तादधरादुदक्तादभिजहिर
क्षसःपर्वतेन॥एतउत्येपतयंतिश्वयातवइंद्रंदिप्संतिदिप्सवोदाभ्यं॥
शिशीतेशक्रःपिशुनेभ्योवधंनूनंसृजदशनिंयातुमद्भ्यः॥८॥इं
द्रोयातूनामभवत्पराशरोहविर्मथीनामभ्याविवासतां॥अभी
दुशक्रःपरशुर्यथावनंपात्रेवभिंदंत्सतएतिरक्षसः॥उलूकयातुं
शुशुलूकयातुंजहिश्वयातुमुतकोकयातुं॥सुपर्णयातुमुतगृ
ध्रयातुंदृषदेवप्रमृणरक्षइंद्र॥मानोरक्षोअभिनड्यातुमावतां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

से·पं·
॥८७॥ मपोछतु मिथुनायाकिमीदिना॥ पृथिवी नः पार्थिवात्पात्वंहसोंत
रिक्षं दिव्यात्पात्वस्मान्॥ इंद्र जहि पुमांसं यातुधानमुत स्त्रियं माय
याशाशदानां॥ विग्रीवासो मूरदेवा ऋदंतु मोदृश न्सूर्यमु ते
च्चरंतं॥ प्रति चक्ष्व वि चक्ष्वेंद्रश्च सोम जागृतं॥ रक्षोभ्यो वधम
स्यतमशनिं यातुमद्भ्यः॥१४॥ इति मंडलं॥ मा चिदन्यद्विशंसत स
खायो मा रिषण्यत॥ इंद्रमित्स्तोता वृषणं सचा सुते मुहुरुक्था
च शंसत॥ अवक्रक्षिणं वृषभं यथाजुरं गां न चर्षणीसहं॥ विद्वे ४
षणं संवननोभयंकरं मंहिष्ठमुभयाविनं॥ यच्चिद्धि त्वा जना

इमे नाना हवंत ऊतये॥ अस्माकं ब्रह्मेदमिंद्र भूतु तेहा विश्वा च वर्धनं॥
वितर्त्तूर्यंते मघवन्विपश्चितोर्यो विपो जनानां॥ उप क्रमस्व पुरु
रूपमाभर वाजं नेदिष्ठमूतये॥ महे चन त्वामद्रिवः परा शु ल्का
य देयां॥ न सहस्राय नायुताय वज्रिवो न शताय शतामघ॥१०॥
वस्यां इंद्रासि मे पितुरुत भ्रातुरभुंजतः॥ माता च मे छदय स थः
मा वसो वसुत्वनाय राधसे॥ क्वेयथ क्वेदसि पुरुत्रा चिद्धि ते मनः॥
अलर्षि युध्म खजकृत्पुरंदर प्र गायत्रा अगासिषुः॥ प्रास्मै गा
यत्रमर्चत वावातुर्यः पुरंदरः॥ याभिः काण्वस्योप बर्हिरासदं या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं·पे· संहूत्रीभिनतुरः॥येतेसंतिदशग्विनःशतिनोयेसहस्रिणः॥अ
॥८८॥ श्वासोयेतेवृषणोरघुद्रुवस्तेभिर्नस्तूयमागहि॥आत्वा१द्यस
बर्दुघांहुवेगायत्रवेपसं॥इंद्रंधेनुंसुदुघामन्यामिषमुरुधा
रामरंकृतं॥११॥यत्तुदत्सूरएतशंवंकूवातस्यपर्णिना॥वह
त्कुत्समार्जुनेयंशतक्रतुःत्सरद्गंधर्वमस्तृतं॥यऋतेचिदभि
श्रिषःपुराजत्रुभ्यआतृदः॥संधातासंधिंमघवापुरूवसुरि
ष्कर्ताविह्रुतंपुनः॥मामूमनिष्ट्याइवेंद्रत्वदरणाइव॥वना ॥८८॥

निनप्रजहितान्यद्रिवोदुरोषासो॥अमन्महिदनाशवोनु
ग्रासश्चवृत्रहन्॥सकृत्सुतेमहतासूररराधसानुस्तोमंमुदीमहि॥
यदिस्तोमंममश्रवदस्माकमिंद्रमिंदवः॥तिरःपवित्रंससृवांस
आशवोमंदंतुतुग्र्यावृधः॥१२॥आत्व१द्यसधस्तुतिंवावातुः
सख्युरागहि॥उपस्तुतिर्मघोनांप्रत्वावत्वधातेवश्मिसुष्टुतिं॥
सोताहिसोममद्रिभिरेमेनमप्सुधावत॥गव्यावस्त्रेववासयंतइ
न्नरोनिर्धुक्षन्वक्षणाभ्यः॥अधज्मोअधवादिवोबृहतोरोचनाद
धि॥अयावर्धस्वतन्वागिराममाताःसुक्रतोइष्टण॥इंद्रायसुमदिं जा१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं.पं.
॥८१॥ तमुं सोमं सोता वरेण्यं॥ शुक्रेणं पीपयद्विश्वया धिया हिन्वानं न वा
जयुं॥ मा त्वा सोमस्य गल्दया सदा याचन्नहं गिरा॥ भूर्णिं मृग
न्न सवनेषु चुक्रुधं कः ईशानं न याचिषत्॥२०॥ मदेनेषितं मद
मुग्रमुग्रेण शवसा॥ विश्वेषां तरुतारं मदच्युतं मदे हि ष्मा दद
ति नः॥ शेवारे वार्या पुरु देवो मर्ताय दाशुषे॥ स सुन्वते च स्तुवते च
रासते विश्वगूर्तो अरिष्टुतः॥ एंद्र याहि म त्स्व चित्रेण देव रा
धसा॥ सरो न प्रास्युदरं सपीतिभिरा सोमेभिरुरु स्फिरं॥ आ
त्वा सहस्रमा शतं युक्ता रथे हिरण्यये॥ ब्रह्मयुजो हरय इं ८९

द्र केशिनो वहंतु सोमपीतये॥ आ त्वा रथे हिरण्यये हरी मयूरशेप्या॥
शितिपृष्ठा वहतां मध्वो अंधसो विवक्षणस्य पीतये॥२५॥ पिबा त्वस्
य गिर्वणः सुतस्य पूर्वपा इव॥ परिष्कृतस्य रसिन इयमासुतिश्चा
रुर्मदाय पत्यते॥ य एको अस्ति दंसना महाँ उग्रो अभि व्रतैः॥ ग
मत्स शिप्री न स योषदा गम[illegible]॥ द्धवं न परि वर्जति॥
त्वं पुरं चरिष्णुं वधैः शुष्णस्य सं पिणक्॥ त्वं भा अनु चरो अध द्वि
ममर ता यदिंद्र हव्यो भुवः॥ मम त्वा सूर उदिते [illegible] मध्यंदिने दिवः॥
मम प्रपित्वे अपिशर्वरे वसवा स्तोमासो अवृत्सत॥ स्तुहि स्तु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं·पं·
॥९॥

ह्यद्रुतघोतेमंहिष्ठासोमघोनां॥निंदितोश्वः प्रपथी परमज्यामघस्य
मेध्यातिथे॥१५॥आयदश्वान्वनन्वतः श्रद्धयाहंरथेरुहं॥उतवाम
स्यवसुनश्चिकेततियोअस्तियाद्रुःपशुः॥यऋज्रामह्यंमामहेस
हत्वचाहिरण्यया॥एषविश्वान्यभ्यस्तुसोभगासंगस्यस्वनद्रथः॥
अधप्लायोगिरतिदासदन्यानासंगोअग्नेदशभिःसहस्रैः॥अ
धोक्षणोदशमह्यंरुशंतोनळाइवसरसोनिरतिष्ठन्॥अन्वस्य
स्थूरंददृशेपुरस्तादनस्थऊरुरवरंबमाणः॥शश्वतीनार्यभिच
क्ष्याहसुभद्रमर्यभोजनंबिभर्षि॥१६॥इत्यष्टः॥ इंद्रंवसा १०

सुतमंधः पिबासुपूर्णमुदरं॥अनाभयिन्नरिमाते॥नृभिर्धूतः सु
तोअश्नैरव्यो वारैः परिपूतः॥अश्वोननिक्तोनदीषु॥तंते यवं यथा
गोभिःस्वादुमकर्मश्रीणंतः॥इंद्रत्वास्मिन्सधमादे॥इंद्रइत्सो
मपाएकइंद्रःसुतपाविश्वायुः॥अंतर्देवान्मर्त्यांश्च॥नयंशुक्रो
नदुराशीर्नतृप्राउरुव्यचसं॥अपस्पृण्वतेसुहार्दं॥१७॥गोभि
र्यदीमन्येअस्मन्मृगंनव्रामृगयंते॥अभित्सरंतिधेनुभिः॥त्रयः
इंद्रस्यसोमाःसुतासःसंतुदेवस्य॥स्वेक्षयेसुतपाव्नः॥त्रयःको
शासश्चोतंतितिस्रश्चम्वःसुपूर्णाः॥समानेअधिभार्मन्॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं॰पं॰ शुचिरसिपुरुनिष्ठाः क्षीरैर्मध्यत आशीर्तः ॥ दध्ना मंदिष्ठः शूरस्य ॥ इमे
॥९१॥ तइंद्र सोमाः स्तीव्रा अस्मे सुतासः ॥ शुक्रा आशिरं याचंते ॥ १८ ॥ तां
मं३ आशिरं पुरोळाशमिंद्रेमं सोमं श्रीणीहि ॥ रेवंतं हि त्वा शृणोमि ॥ हृ
त्सु पीतासो युध्यंते दुर्मदासो न सुरायां ॥ ऊधर्न नग्ना जरंते ॥ रे
वाँ इद्रेवतः स्तोता स्यात्त्वावतो मघोनः ॥ प्रेदु हरिवः श्रुतस्य ॥ उ
क्थं चन शस्यमानमगोररिरा चिकेत ॥ न गायत्रं गीयमानं ॥ मा
न इंद्र पीयत्नवे मा शर्धते परा दाः ॥ शिक्षा शचीवः शचीभिः ॥ १९ ॥
वयमु त्वा तदिदर्था इंद्र त्वायंतः सखायः ॥ कण्वा उक्थेभिर्जरंते ॥ ९१

न घेमन्यदा पपन वज्रिन्नपसो नविष्टौ ॥ तवेदु स्तोमं चिकेत ॥ इच्छंति दे
वाः सुन्वंतं न स्वप्नाय स्पृहयंति ॥ यंति प्रमादमतंद्राः ॥ ओ षु प्र याहि
वाजेभिर्मा हृणीथा अभ्यस्मान् ॥ महाँ इव युवजानिः ॥ मो ष्व१द्य
दुर्हणावान्सायं करदारे अस्मत् ॥ अश्रीर इव जामाता ॥ २० ॥ वि
द्मा ह्यस्य वीरस्य भूरिदावरीं सुमतिं ॥ त्रिषु जातस्य मनांसि ॥ आ
तू षिंच कण्वमंतं न घा विद्म शवसानात् ॥ यशस्तरं शतमूतेः ॥ ज्ये
ष्ठेन सोतरिंद्राय सोमं वीराय शक्राय ॥ भरा पिबन्नर्याय ॥ यो
वेदिष्ठो अव्यथिष्वश्वावंतं जरितृभ्यः ॥ वाजं स्तोतृभ्यो गोमंतं ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पं॰ सं॰ पन्यंपन्य मित्सोतार आधावतमद्याय॥ सोमंवीराय शूराय॥२१॥
॥९२॥ पाताद्धृत्रहासुतमाघागमन्मारे अस्मत्॥ नियमते शतमूतिः॥
एह हरी ब्रह्मयुजा शग्मा वक्षतः सखायं॥ गीर्भिः श्रुतं गिर्वण
सं॥ स्वादवः सोमा आयाहि श्रीताः सोमा आयाहि॥ शिप्रिन्नृ
षीवः शचीवो नायमछा सधमादं॥ ते श्वयास्त्वा वर्धंति म स्तु
हेराधसेन्नम्णाय॥ इंद्रकारिणंवृधंतः॥ गिरश्वयास्ते गिर्वाह
उक्था च तुभ्यं तानि॥ सत्रा दधिरे शवांसि॥२२॥ एवे ... देषतु
विकूर्मिर्वाजां एको वज्रहस्तः॥ सनादमृक्तो दयते॥ हंता वृत्रं ९२

दक्षिणेनेंद्रः पुरूपुरुहूतः॥ महान्महीभिः शचीभिः॥ यस्मिन्विश्वाश्च
र्षणय उत च्यौत्ना ज्रयांसि च॥ अनु घेन्मंदी मघोनः॥ एषएतानि चका
रेंद्रो विश्वा योति शृण्वे॥ वाजदावा मघोनां॥ प्रभर्तारथं गव्यंतमपाका
च्चिद्यमवति॥ इनो वसु सहि वोढ्हा॥२३॥ सनिता विप्रो अर्वद्भिर्हंता वृ
त्रं नृभिः शूरः॥ सत्यो विता विधंतं॥ यजध्वैनं प्रियमेधा इंद्रं सत्रा चा
मनसा॥ यो भूत्सोमैः सत्यमद्वा॥ गाथश्रवसं सत्पतिं श्रवस्कामं पुरु
त्मानं॥ कण्वासो गात वाजिनं॥ य ऋते चिद्गास्पदेभ्यो दात्सखा
नृभ्यः शचीवान्॥ ये अस्मिन्काममश्रियन्॥ इत्था धीवंतमद्रिवः
काण्वं मेध्यातिथिं॥ मेषो भूतो ३ भियंनयः॥ शिक्षा विभिंदो अ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं·पं· स्मेचत्वार्ययुतादद्दत्॥अष्टापरःसहस्रा॥उतसुत्येपयोवृधामाकीरणस्य
॥९३॥ नप्त्या॥जनित्वनायमामहे॥२४॥पिबासुतस्यरसिनोमत्स्वानइंद्रगो
मतः॥आपिर्नोबोधिसधमाद्योवृधेऽस्माँअवंतुतेधियः॥भूयामते
सुमतौवाजिनोवयंमानस्तरभिमातये॥अस्माँचित्राभिरवतादभि
म ष्टिभिरानःसुम्नेषुयामय॥इमाउत्वापुरूवसोगिरोवर्द्धंतुयाममा॥पा
वकवर्णाःशुचयोविपश्चितोभिस्तोमैरनूषत॥अयंसहस्रमृषि
भिःसहस्कृतःसमुद्रइवपप्रथे॥सत्यःसोअस्यमहिमागृणेशवो
यज्ञेषुविप्रराज्ये॥इंद्रमिद्देवतातयइंद्रंप्रयत्यध्वरे॥इंद्रंसमी
केवनिनोहवामहइंद्रंधनस्यसातये॥२५॥इंद्रोमह्नारोदसीपप्र ९३

थच्छवइंद्रःसूर्यमरोचयत्॥इंद्रेहविश्वाभुवनानियेमिरइंद्रेसु
वानासइंदवः॥अभित्वापूर्वपीतयइंद्रस्तोमेभिरायवः॥समी
चीनासऋभवःसमस्वरन्रुद्रागृणंत पूर्व्यं॥अस्येदिंद्रोवावृ
धेवृष्ण्यंशवोमदेसुतस्यविष्णवि॥अद्यातमस्यमहिमानमाय
वोनुष्टुवंतिपूर्वथा॥तत्वायामिसुवीर्यंतद्ब्रह्मपूर्वचित्तये॥येना
यतिभ्योभृगवेधनेहितेयेनप्रस्कण्वमाविथ॥येनासमुद्रमसृ
जोमहीरपस्तदिंद्रवृष्णितेशवः॥सद्यःसोअस्यमहिमानसंन
शेयंक्षोणीरनुचक्रदे॥२६॥शग्धीनइंद्रयत्वारयिंयामिसुवी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं॰पं॰ यै॥अग्धि वाजाय प्रथमं सिषासतेअग्धि स्तोमाय पूर्व्य॥अग्धी नो अस्य
॥९४॥ यद्धपौर माविथ धियइंद्र सिषासतः॥अग्धि यथारुशमं श्यावकं
कृप[illegible]मिंद्र प्राव स्वर्णरं॥कं नव्यो अतसीनां तुरो
गृणीत मर्त्यः॥नही न्वस्य महिमान मिंद्रियं स्वर्गृणंत आनशुः॥
कदु स्तुवंत ऋतयंदेवत ऋषिः को विप्र ओहते॥कदा हवं मघव
न्निंद्र सुन्वतः कदु स्तुवत आ गमः॥उदु त्ये मधु मत्तमा गिरस्तोमा
सा सईरते॥सत्राजितो धन[illegible]अक्षितोतयो वाजयंतो रथाइव॥२७॥ राम
कण्वाइव भृगवः सूर्याइव विश्वमिद्धी तमानशुः॥इंद्रं स्तोमेभि ९४

मिरश्विनेवेत्काण्वस्य बोधतं॥यद्वांकक्षीवांउत यद्व्यश्व ऋषि
र्यद्वां दीर्घतमाजुहाव॥पृथी यद्वां वैन्यः सादनेष्वेवेदतो अश्वि
ना चेतयेथां॥३१॥यातं छर्दिष्पा उत नः परस्पा भूतं जगत्पा उ
तू तनस्तनू[illegible]पा॥वर्तिस्तोकाय तनयाय यातं॥यदिंद्रेण सरथं याथो
अश्विना यद्वा वायुना भवथः समोकसा॥यदादित्येभिरृभु
भिः सजोषसा यद्वा विष्णोर्विक्रमणेषु तिष्ठथः॥यदद्याश्वि
नावहं हुवेय वाजसातये॥यत्पृत्सु तुर्वणे सहस्तच्छ्रेष्ठम ९४
म॰ श्विनोरवः॥आ नूनं यातमश्विनेमा हव्यानि वां हिता॥इमे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०पं० सोमासो अधितुर्वशे यदाविमेकण्वेषुवामथ॥ येनासत्या परा
१००८ के अर्वाके अस्ति भेषजं॥ तेन नूनं विमदाय प्रचेतसा [illegible] छर्दि
र्वत्साय प्र[illegible]य छतं॥३॥ अभुत्स्यु प्रदेव्या साकं वाचाह
मश्विनोः॥ व्यावर्देव्या मतिं विरातिं मर्त्येभ्यः॥ प्रबोधयो
षो अश्विना प्रदेवि सूनृते महि॥ प्रयज्ञहोतरानुषक्प्रम
दाय श्रवो बृहत॥ यदुषो यासि भानुना संसूर्येण रोचसे।
आहायमश्विनोरथो वर्तिर्याति नृपाय्यं॥ यदापीतासो अं १

शवो गावो न दुह्र ऊधभिः॥ यद्वा वाणीरनूषत प्रदेवयंतो अश्वि
से नो॥ प्रद्युम्नाय प्रशवे प्रनृषाह्याय शर्मणे॥ प्रदक्षाय प्रचेतसा
धीभिर ॥ यन्नूनं[illegible]श्विना पितुर्योना निषीदथः॥ यद्वा सुम्नेभिरुक्थ्या
॥३३॥ यत्स्यो दीर्घप्रस[illegible]द्मनि यद्वादो रोचने दिवः॥ यद्वा स
मुद्रे अध्याकृते गृहे त आयातमश्विना॥ यद्वा यज्ञं मनवे सं
मिमिक्षथुरेवेत्काण्वस्य बोधतं॥ बृहस्पतिं विश्वां देवां अहं
हुव इंद्राविष्णू अश्विनावाशुहेषसा॥ त्यान्वश्विना हुवे सुदं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मे

सं०पं०

ससाग्ने ... ता॥ ययोरस्ति प्रणः सख्यं देवेष्वध्याप्यं॥ ययोरधि
॥१००१॥ प्रयज्ञा असूरे संति सूरयः॥ ता यज्ञस्याध्वरस्य प्रचेतसा स्वधा
भिर्या पिबतः सोम्यं मधु॥ यदद्याश्विनावपाग्यत्प्राक्स्थो वा
जिनीवसू॥ यद्द्रुह्यव्यनवि तुर्वशे यदौ हुवे वामथ मा गतं॥ य
दंतरिक्षे पतथः पुरुभुजा यद्वेमे रोदसी अनु॥ यद्वा स्वधाभि
रधितिष्ठथो रथमत आ यातमश्विना॥ ३७॥ त्वमग्ने व्रतपा अ
सि देव आ मर्त्येष्वा॥ त्वं यज्ञेष्वीड्यः॥ त्वमसि प्रशस्यो विदथेषु १००१

अदेवीरग्ने अरातीः॥ अंति चित्संतमह यज्ञं मर्तस्य रिपोः॥ नोप वेषि जातवेदः॥

सहंत्य॥ अग्ने रथीरध्वराणां॥ स त्वमस्मदप द्विषो युयोधि जात
वेदः॥ मर्ता अमर्त्यस्य ते भूरि नाम मनामहे॥ विप्रासो जातवे
दसः॥ ३८॥ विप्रं विप्रासोऽवसे देवं मर्तास ऊतये॥ अग्निं गी
र्भिर्हवामहे॥ आ ते वत्सो मनो यमत्परमाच्चित्सधस्थात्॥ अ
ग्ने त्वांकामया गिरा॥ पुरुत्रा हि सदृङ्ङसि विशो विश्वा अनु प्र
भुः॥ समत्सु त्वा हवामहे॥ समत्स्वग्निमवसे वाजयंतो हवाम
हे॥ वाजेषु चित्रराधसं॥ प्रत्नो हि कमीड्यो अध्वरेषु सनाच्च

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं०पं० होतानव्यश्चसत्सि॥ स्वांचाग्नेतन्वंपिप्रयस्वास्मभ्यंचसौभग
१० मायजस्व॥३६॥ ॥इतिपंचमाष्टके अष्टमोध्यायः॥ शुभं
भवतु॥छ॥ ॥ शाके१७०३ शुभकृन्नामसंवत्सरे। अधीकज्येष्ठ
वद्यद्वादशीभृगुवासरे॥ इदंपुस्तकंभोवे इत्युपनामनारा
यणेनलिखितं॥छ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ अथ पंचमाष्टके समाप्तः॥

पुपना॰

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=12.09.19 11:31
,TRANSFERRED=2019/09/12 at 13:28:23
,PAGES=412
,TYPE=STD
,NAME=S0001770
,Book Name=M-253-SANHITA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF
,FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF
,FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF
,FILE127=00000127.TIF
,FILE128=00000128.TIF
,FILE129=00000129.TIF
,FILE130=00000130.TIF
,FILE131=00000131.TIF
,FILE132=00000132.TIF
,FILE133=00000133.TIF
,FILE134=00000134.TIF
,FILE135=00000135.TIF
,FILE136=00000136.TIF
,FILE137=00000137.TIF
,FILE138=00000138.TIF
,FILE139=00000139.TIF
,FILE140=00000140.TIF
,FILE141=00000141.TIF
,FILE142=00000142.TIF
,FILE143=00000143.TIF
,FILE144=00000144.TIF
,FILE145=00000145.TIF
,FILE146=00000146.TIF
,FILE147=00000147.TIF
,FILE148=00000148.TIF
,FILE149=00000149.TIF
,FILE150=00000150.TIF
,FILE151=00000151.TIF
,FILE152=00000152.TIF
,FILE153=00000153.TIF
,FILE154=00000154.TIF
,FILE155=00000155.TIF
,FILE156=00000156.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE157=00000157.TIF
,FILE158=00000158.TIF
,FILE159=00000159.TIF
,FILE160=00000160.TIF
,FILE161=00000161.TIF
,FILE162=00000162.TIF
,FILE163=00000163.TIF
,FILE164=00000164.TIF
,FILE165=00000165.TIF
,FILE166=00000166.TIF
,FILE167=00000167.TIF
,FILE168=00000168.TIF
,FILE169=00000169.TIF
,FILE170=00000170.TIF
,FILE171=00000171.TIF
,FILE172=00000172.TIF
,FILE173=00000173.TIF
,FILE174=00000174.TIF
,FILE175=00000175.TIF
,FILE176=00000176.TIF
,FILE177=00000177.TIF
,FILE178=00000178.TIF
,FILE179=00000179.TIF
,FILE180=00000180.TIF
,FILE181=00000181.TIF
,FILE182=00000182.TIF
,FILE183=00000183.TIF
,FILE184=00000184.TIF
,FILE185=00000185.TIF
,FILE186=00000186.TIF
,FILE187=00000187.TIF
,FILE188=00000188.TIF
,FILE189=00000189.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE190=00000190.TIF
,FILE191=00000191.TIF
,FILE192=00000192.TIF
,FILE193=00000193.TIF
,FILE194=00000194.TIF
,FILE195=00000195.TIF
,FILE196=00000196.TIF
,FILE197=00000197.TIF
,FILE198=00000198.TIF
,FILE199=00000199.TIF
,FILE200=00000200.TIF
,FILE201=00000201.TIF
,FILE202=00000202.TIF
,FILE203=00000203.TIF
,FILE204=00000204.TIF
,FILE205=00000205.TIF
,FILE206=00000206.TIF
,FILE207=00000207.TIF
,FILE208=00000208.TIF
,FILE209=00000209.TIF
,FILE210=00000210.TIF
,FILE211=00000211.TIF
,FILE212=00000212.TIF
,FILE213=00000213.TIF
,FILE214=00000214.TIF
,FILE215=00000215.TIF
,FILE216=00000216.TIF
,FILE217=00000217.TIF
,FILE218=00000218.TIF
,FILE219=00000219.TIF
,FILE220=00000220.TIF
,FILE221=00000221.TIF
,FILE222=00000222.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE223=00000223.TIF
,FILE224=00000224.TIF
,FILE225=00000225.TIF
,FILE226=00000226.TIF
,FILE227=00000227.TIF
,FILE228=00000228.TIF
,FILE229=00000229.TIF
,FILE230=00000230.TIF
,FILE231=00000231.TIF
,FILE232=00000232.TIF
,FILE233=00000233.TIF
,FILE234=00000234.TIF
,FILE235=00000235.TIF
,FILE236=00000236.TIF
,FILE237=00000237.TIF
,FILE238=00000238.TIF
,FILE239=00000239.TIF
,FILE240=00000240.TIF
,FILE241=00000241.TIF
,FILE242=00000242.TIF
,FILE243=00000243.TIF
,FILE244=00000244.TIF
,FILE245=00000245.TIF
,FILE246=00000246.TIF
,FILE247=00000247.TIF
,FILE248=00000248.TIF
,FILE249=00000249.TIF
,FILE250=00000250.TIF
,FILE251=00000251.TIF
,FILE252=00000252.TIF
,FILE253=00000253.TIF
,FILE254=00000254.TIF
,FILE255=00000255.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE256=00000256.TIF
,FILE257=00000257.TIF
,FILE258=00000258.TIF
,FILE259=00000259.TIF
,FILE260=00000260.TIF
,FILE261=00000261.TIF
,FILE262=00000262.TIF
,FILE263=00000263.TIF
,FILE264=00000264.TIF
,FILE265=00000265.TIF
,FILE266=00000266.TIF
,FILE267=00000267.TIF
,FILE268=00000268.TIF
,FILE269=00000269.TIF
,FILE270=00000270.TIF
,FILE271=00000271.TIF
,FILE272=00000272.TIF
,FILE273=00000273.TIF
,FILE274=00000274.TIF
,FILE275=00000275.TIF
,FILE276=00000276.TIF
,FILE277=00000277.TIF
,FILE278=00000278.TIF
,FILE279=00000279.TIF
,FILE280=00000280.TIF
,FILE281=00000281.TIF
,FILE282=00000282.TIF
,FILE283=00000283.TIF
,FILE284=00000284.TIF
,FILE285=00000285.TIF
,FILE286=00000286.TIF
,FILE287=00000287.TIF
,FILE288=00000288.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE289=00000289.TIF
,FILE290=00000290.TIF
,FILE291=00000291.TIF
,FILE292=00000292.TIF
,FILE293=00000293.TIF
,FILE294=00000294.TIF
,FILE295=00000295.TIF
,FILE296=00000296.TIF
,FILE297=00000297.TIF
,FILE298=00000298.TIF
,FILE299=00000299.TIF
,FILE300=00000300.TIF
,FILE301=00000301.TIF
,FILE302=00000302.TIF
,FILE303=00000303.TIF
,FILE304=00000304.TIF
,FILE305=00000305.TIF
,FILE306=00000306.TIF
,FILE307=00000307.TIF
,FILE308=00000308.TIF
,FILE309=00000309.TIF
,FILE310=00000310.TIF
,FILE311=00000311.TIF
,FILE312=00000312.TIF
,FILE313=00000313.TIF
,FILE314=00000314.TIF
,FILE315=00000315.TIF
,FILE316=00000316.TIF
,FILE317=00000317.TIF
,FILE318=00000318.TIF
,FILE319=00000319.TIF
,FILE320=00000320.TIF
,FILE321=00000321.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE322=00000322.TIF
,FILE323=00000323.TIF
,FILE324=00000324.TIF
,FILE325=00000325.TIF
,FILE326=00000326.TIF
,FILE327=00000327.TIF
,FILE328=00000328.TIF
,FILE329=00000329.TIF
,FILE330=00000330.TIF
,FILE331=00000331.TIF
,FILE332=00000332.TIF
,FILE333=00000333.TIF
,FILE334=00000334.TIF
,FILE335=00000335.TIF
,FILE336=00000336.TIF
,FILE337=00000337.TIF
,FILE338=00000338.TIF
,FILE339=00000339.TIF
,FILE340=00000340.TIF
,FILE341=00000341.TIF
,FILE342=00000342.TIF
,FILE343=00000343.TIF
,FILE344=00000344.TIF
,FILE345=00000345.TIF
,FILE346=00000346.TIF
,FILE347=00000347.TIF
,FILE348=00000348.TIF
,FILE349=00000349.TIF
,FILE350=00000350.TIF
,FILE351=00000351.TIF
,FILE352=00000352.TIF
,FILE353=00000353.TIF
,FILE354=00000354.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE355=00000355.TIF
,FILE356=00000356.TIF
,FILE357=00000357.TIF
,FILE358=00000358.TIF
,FILE359=00000359.TIF
,FILE360=00000360.TIF
,FILE361=00000361.TIF
,FILE362=00000362.TIF
,FILE363=00000363.TIF
,FILE364=00000364.TIF
,FILE365=00000365.TIF
,FILE366=00000366.TIF
,FILE367=00000367.TIF
,FILE368=00000368.TIF
,FILE369=00000369.TIF
,FILE370=00000370.TIF
,FILE371=00000371.TIF
,FILE372=00000372.TIF
,FILE373=00000373.TIF
,FILE374=00000374.TIF
,FILE375=00000375.TIF
,FILE376=00000376.TIF
,FILE377=00000377.TIF
,FILE378=00000378.TIF
,FILE379=00000379.TIF
,FILE380=00000380.TIF
,FILE381=00000381.TIF
,FILE382=00000382.TIF
,FILE383=00000383.TIF
,FILE384=00000384.TIF
,FILE385=00000385.TIF
,FILE386=00000386.TIF
,FILE387=00000387.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE388=00000388.TIF
,FILE389=00000389.TIF
,FILE390=00000390.TIF
,FILE391=00000391.TIF
,FILE392=00000392.TIF
,FILE393=00000393.TIF
,FILE394=00000394.TIF
,FILE395=00000395.TIF
,FILE396=00000396.TIF
,FILE397=00000397.TIF
,FILE398=00000398.TIF
,FILE399=00000399.TIF
,FILE400=00000400.TIF
,FILE401=00000401.TIF
,FILE402=00000402.TIF
,FILE403=00000403.TIF
,FILE404=00000404.TIF
,FILE405=00000405.TIF
,FILE406=00000406.TIF
,FILE407=00000407.TIF
,FILE408=00000408.TIF
,FILE409=00000409.TIF
,FILE410=00000410.TIF
,FILE411=00000411.TIF
,FILE412=00000412.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection